स्यानज्ञाननिबन्धनं च समयज्ञानैकतानात्मनां साधूनां बहुशास्त्रपुस्तकततेर्विश्राणनं गीयते ॥ १३ ॥

तन्मोक्षलक्ष्मिपरिरम्भमहोत्सवोत्कैः श्राद्धैर्विशुद्धहृदयैर्विकसद्विवेकैः ।
जैनागमावगमसङ्गतसंयतेभ्यः सिद्धान्तपुस्तकततिः सततं प्रदेया ॥ १४ ॥
इति हि तदुपदेशं सान्द्रचन्द्रातपाभं विशदवदनचन्द्रात् सादरं पुश्वकोरः ।
किमपि कुमरपालः पुण्यलक्ष्म्या विशालः स्म पिबति वत तृष्णग् सद्विवेकप्रवेकः ॥ १५ ॥

छेदग्रन्थपुरावतारसरणेः श्रीकल्पचूर्णेः कलं, संलेख्याक्षरचञ्चुलेखकवरात् पुस्तं प्रशस्ताक्षरम् ।
पुण्यात्मा च कुमारपाल उदयद्धर्माशयः श्रेयसे ज्ञानाक्षीणनिधानवत् सुगुरवे विश्राणयामासिवान् ॥ १६ ॥
ब्रह्माण्डालयमण्डपप्रतिकृति व्योमाङ्गणे तीर्थकृत्कीर्त्तिः कीर्त्यनटीस्फुटीकृतगतिर्नृत्यं परं पुष्णती ।
यावत् खेचरचक्रवालपरिषत् प्रीतिप्रदा पद्यते, तावत् क्रीडतु भृङ्गवत् कृतिकराम्भोजेष्वदः पुस्तकम् ॥ १७ ॥
श्रीजिनकुशलयतीशां निकटे कर्पूरपूरगण्डूपान् । विदधल्लब्धिनिधानोऽभिषेक आधात् प्रशस्तिमिमाम् ॥ १८ ॥

॥ इति श्रीकल्पचूर्णिपुस्तकप्रशस्तिः ॥ छ ॥

क्रमाङ्क ५१

कल्पचूर्णी अपूर्ण पत्र २४–३५६ । **भा.** प्रा.।

ले. सं. अनु. १५ शताब्दी उत्तरार्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । ३१॥।×२। **लं. प.** ३१॥।×२।
पत्र ३–२३, २६, २८, २९, ४४, ४५, ४८, ३२१, ३२६–३२९, ३३१, ३३४–३३५, ३३८, ३४०, ३४२, ३४४, ३४८, ३५०–३५३ नथी ।

क्रमाङ्क ५२

कल्पवृत्ति प्रथमखंड मासकल्पप्रकृतपर्यन्त पत्र ३३१। **भा.** प्रा. सं.। **वृ. क.** आचार्य मलयगिरिं तथा तपा. क्षेमकीर्त्ति। **ले. सं.** १४८८। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३॥×२॥.

अन्त—

॥ इति **मास**कल्पप्रकृतं समाप्तम् ॥छ॥

चूर्णिश्रीवृद्धभाष्यप्रभृतिवहुतिथग्रन्थसार्थाभिरामा-
रामादर्थप्रसूनैस्त्वरितमवचितैः सूक्तिसौरभ्यसारैः।
चेतःपट्टे निधाय स्वगुरुशुचिवचस्तन्तुभिर्गुम्फितेयं,
श्रीकल्पे मासकल्पप्रकृतविवरणस्रग् मया भव्ययोग्या ॥छ॥१॥

इति श्री**कल्प**प्रथमखण्डपुस्तकं ॥ छ ॥ श्री ॥ सम्वत् १४८८ वर्षे मार्गशीर्ष शुदि पञ्चम्यां तिथौ गुरुवासरे श्रीमति श्री**स्तम्भ**तीर्थे अविचलत्रिकालज्ञाऽऽज्ञापालनपट्टतरे विजयिनि श्रीमत्**खरतर**गच्छे श्री**जिनराज**सूरिपट्टे लब्धिलीलानिलयवन्धुरवहुबुद्धिवोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचन्दनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्री**जिनभद्र**सूरीश्वराणामुपदेशेन परीक्ष**गूज**रसुतेन रेपाप्राप्तसुश्रावकेन परीक्ष**धरणा**केन पुत्र सा. **साईया**सहितेन श्रीसिद्धान्तकोशे श्री**कल्प**वृत्ति**प्र**थमखण्डपुस्तकं लिखापितम्। मङ्गलमस्तु ॥ ॥ छ ॥श्री॥

क्रमाङ्क ५३

कल्पवृत्ति द्वितीयखंड पत्र ३०८। **भा.** प्रा. सं.। **वृ. क.** तपा. क्षेमकीर्त्ति। **ग्रं.** १४१६०। **ले. सं.** १४९०। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३॥×२॥

अन्त—

एवमस्माकमपि प्राघूर्णकाः प्रधानपुरुषकल्पास्ततस्तेषां यथायोग्यमवकाशान् दत्वा वृषभाः संस्तारकभूमीः संक्षिप्य प्रयच्छन्तः पूर्वानपि साधून् मापयन्ति ॥ छ ॥

समाप्तं **वृ**हत्कल्पवृत्तिद्वितीयखण्डम् ॥ छ ॥ ग्रं. १४१६० ॥ संवत् १४९० वर्षे वैशाख सुदि पञ्चम्यां तिथौ गुरुवासरे श्रीमति श्री**स्तम्भ**तीर्थे अविचलत्रिकालज्ञाज्ञापालनपट्टतरे विजयिनि श्रीमत्**खरतर**गच्छे श्री**जिनराज**सूरिपट्टे लब्धिलीलानिलयवन्धुरवहुबुद्धिवोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचन्दनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्री**जिन**भद्रसूरीश्वराणामुपदेशेन परीक्ष**गूज**रसुतेन रेपाप्राप्तसुश्रावकेन परीक्ष**धरणा**केन पुत्र सा. **साइया**सहितेन श्रीसिद्धान्तकोशे **वृ**हत्कल्पवृत्तिद्वितीयखण्डपुस्तकम्।

क्रमाङ्क ५४

कल्पवृत्ति तृतीयखंड. पत्र २९६। **भा.** प्रा. सं। **वृ. क.** आचार्य क्षेमकीर्त्ति। **र. सं.** १३३२। **ले. सं.** १४८९। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३४×२।

अन्त—

सूत्रे वा भाष्ये वा यन्मतिमोहाद् मयाऽन्यथा किमपि। लिखितं वा विवृतं वा तन्मिथ्यादुष्कृतं भूयात् ॥२६॥
ग्रन्थ ९५५१ सर्वाग्रं १२६५१ श्रीः ॥छ॥श्रीः॥

सम्वत् १४८९ वर्षे मार्ग सुदि ५ गुरु दिने श्रीमति श्री**स्तम्भ**तीर्थे अविचलत्रिकालज्ञाज्ञापालनपट्टतरे विजयिनि श्रीमत**खरतर**गच्छे श्री**जिन**राजसूरिपट्टे लब्धिलीलानिलय**ब**न्धुरवहुबुद्धिवोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचन्दनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमत्गच्छेशभट्टारकश्री**जिन**भद्रसूरीश्वराणामुपदेशेन परीक्ष**गू**जरसुतेन रेपाप्राप्तसुश्रावकेन परीक्ष**धरणा**केन पुत्र**साई**यासहितेन श्रीसिद्धान्तकोशे **बृ**हत्कल्पतृतीयखंडपुस्तकं लिखापितम्। पुरोहित **ह**रीयाकेन लिखितम्। शुभं भवतु कल्याणमस्तु ॥छ॥

क्रमाङ्क ६३

व्यवहारसूत्र वृत्ति द्वितीयखंड २-६ उद्देश पर्यन्त पत्र ३७५। **भा.** प्रा. सं.। **वृ. क.** आचार्य मलयगिरि। **ग्रं.** १३७१९। **ले. सं.** १४९०। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३२।×२।

॥ स्वस्ति संवत् १४९० वर्षे मार्गशीर्ष सुदि पञ्चम्यां तिथौ गुरुवारे। श्रीमति श्री**स्तम्भ**तीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे विजयिनि श्रीमत्**खरतर**गच्छे श्री**जिन**राजसूरिपट्टे लब्धिलीलानिलयबन्धुरबहुबुद्धिबोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचन्दनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्री**जिन**भद्रसूरीश्वराणामुपदेशेन परीक्ष सा. **गूजर**सुतेन रेषाप्राप्तसुश्रावकेन सा. परीक्ष्य**धरणा**केन पुत्र सा. **साईया**सहितेन श्रीसिद्धान्तकेशो लेखितः स्वश्रेयसे।

यावन्मेरुः पवित्रो जिनवरजननस्नात्रसम्भूततोयैर्यावद्दिव्या विमानस्थितिरतिसुखदा सिद्धिसंस्थाश्च सिद्धाः।
यावल्लोकप्रकाशं सकलजनहितं जैनसिद्धान्ततत्त्वं विद्वद्भिर्वाच्यमानं चिरमवनितले पुस्तकं तावदास्ताम् ॥छ॥
॥श्रीसङ्घस्य शुभं भवतु ॥छ॥ श्रीः॥

क्रमाङ्क ६४

व्यवहारसूत्रवृत्ति तृतीय खंड ७-१०उद्देश पर्यन्त संपूर्ण पत्र ३०७। **भा.** प्रा. सं.। **वृ. क.** आचार्य मलयगिरि.। **ले. सं.** १४९०। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३२×२।.

अन्त—

॥ इति श्री**व्यवहारवृत्तिः** संपूर्णाः ॥ छ ॥ शुभं भवतु ॥ छ ॥

संवत् १४९० वर्षे मार्गशीर्ष सुदि पञ्चम्यां तिथौ गुरुवारे। श्रीमति श्री**स्तम्भ**तीर्थे अविचलत्रिकालज्ञाऽऽज्ञापालनपटुतरे विजयिनि। श्रीमत्**खरतर**गच्छे श्री**जि**नराजसूरिपट्टे लब्धिलीलानिलयवन्धुरवहुबुद्धिबोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचन्दनतरुमलययुगपवरमिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्री**जिन**भद्रसूरीश्वराणामुपदेशेन परीक्षसाह**गू**जरसुतेन रेषाप्राप्तसुश्रावकेन सा. परीक्ष्य**धरणा**केन पुत्र सा. **सा**इयायुतेन श्रीसिद्धान्तकोशो लेखितः स्वश्रेयसे।

यावन्मेरुः पवित्रो जिनवरजननस्नात्रसम्भूततोयैर्यावद्दिव्या विमानस्थितिरतिसुखदा सिद्धिसंस्थाश्च सिद्धाः।
यावल्लोकप्रकाशं सकलजनहितं जैनसिद्धान्ततत्त्वं, विद्वद्भिर्वाच्यमानं चिरमवनितले पुस्तकं तावदास्ताम् ॥छ॥
॥ श्रीसंघस्य शुभं भवतु ॥ छ ॥ श्रीः ॥

क्रमाङ्क ६५

(१) **निशीथसूत्र** पत्र १-१५। **भा.** प्रा.। **क.** भद्रबाहुस्वामी।
(२) **निशीथसूत्र भाष्य** पत्र १-१७८। **भा.** प्रा.। **गा.** ६४३९। **ग्रं.** ७४००।
ले. सं. अनु. १२ मी शताब्दीनुं उत्तरार्द्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २६॥।×२।

पट्टिका उपर—

५ **नि**सीहभास्यपुस्तकं श्री**जय**सिंहाचार्याणाम् ॥

क्रमाङ्क ६६

निशीथसूत्र भाष्य पत्र २१४। **भा.** प्रा.। **ले. सं.** अनु. १५ मी शताब्दीनुं उत्तरार्द्ध [धरणाक लेखित?]। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २५॥×२

क्रमाङ्क ६७

निशीथसूत्रचूर्णी प्रथमखंड. ११ मा उद्देश पर्यन्त किंचिदपूर्ण पत्र ४६४ । **भा.** प्रा. ।

ले. सं. अनु. १२ मी शताब्दी प्रारंभ । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** २४॥।×२।. । पत्र १८-३२, ४१, ४३, ४६, ४७, १८४, २७१ नथी ।

प्रथम पत्रनी पहेली पूंठी उपर—

॥ श्रीजिनदत्ताचार्याणां निशीथसूत्रचूर्णिप्रथमखंडपुस्तकं ॥

क्रमाङ्क ६८

(१) **निशीथसूत्र** पत्र १८ । **भा.** प्रा. । **क.** भद्रबाहुस्वामी । **ग्रं.** ८१२ । पत्र ८, १०, ७४, ७७, २१५, २१९-२२३, २२५-२२८, २४१ नथी.

(२) **निशीथसूत्रचूर्णी प्रथमखंड अपूर्ण** पत्र १-३२४ । **भा.** प्रा. ।

ले. सं. अनु. १५ शताब्दी उत्तरार्ध [धरणाक लेखित ?]। **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३२×२॥

पट्टिका उपरि—

॥ सं. १५४९ वर्षे श्रीजिनसमुद्रसूरिविजयराज्ये महोपाध्यायश्रीकमलसंयमशिष्यश्रीमुनिमेरूपाध्यायैर्ग्रंथोऽयमवाच्यत ॥

॥ सं. १६३४ वर्षे श्रीजिनचंद्रसूरिराजानां शिष्यैः पं० कल्याणकमल पं० महिमराजमुनि पं० समयराज पं० धर्म्मनिधान पं० रत्ननिधानमुनिभिः पंचभिः प्रत्यंतरे लेलिखितो ग्रंथोऽयमवाचि च ॥ अथ वाच्यमानश्चिरं नंदतादिति श्रीजिनकुशलसूरिप्रसत्त्यासत्त्या ॥ श्रीः

क्रमाङ्क ६९

निशीथसूत्रचूर्णी द्वितीयखंड. पत्र. २९४ । **भा.** प्रा.। **ले. सं.** अनु. १५ शताब्दी उत्तरार्ध [धरणाक लेखित ?]। **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३१॥×२।

क्रमाङ्क ७०

निशीथसूत्रचूर्णी प्रथमखंड दशम उद्देश पर्यंत. पत्र. ३३८ । **भा.** प्रा. । **ग्रं.** १७८८४ ।

ले. सं. १३ मी शताब्दी पूर्वार्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३३॥×२॥

क्रमाङ्क ७१

निशीथसूत्रचूर्णी द्वितीयखंड. पत्र. ४१९ । **भा.** प्रा. ।

ले. सं. अनु. १३मी शताब्दीनुं पूर्वार्द्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** २८॥।×२।

क्रमाङ्क ७२

महानिशीथसूत्र. पत्र. ८७ **भा.** प्रा. । **ग्रं.** ४५४४ ।

ले. सं. अनु. १५ मी शताब्दीनुं उत्तरार्द्ध. [धरणाक लेखित ?]। **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३१॥।×२।

क्रमाङ्क ७३

निशीथसूत्र लघुभाष्य पत्र. ४-१०० । **भा.** प्रा. । **ले. सं.** अनु. १२ मी शताब्दीनुं उत्तरार्द्ध । **संह.** अतिजीर्ण । **द.** श्रेष्ठ । **लं. प.** ११।×२।. । पत्र ९३मुं नथी ।

पत्र ७९ मां—णिसीथभाष्ये प्रथम उद्देशक ॥ छ ॥

क्रमाङ्क ७४

(१) **दशवैकालिकसूत्र** पत्र. १–९६। **भा.** प्रा.। **क.** शय्यंभवसूरि। **ग्रं.** ७००।
(२) **पाक्षिकसूत्र** पत्र ९७–१४२। **भा.** प्रा.। **ग्रं.** ३००। पत्र ८४ नथी।
ले. सं. अनु. १४ मी शताब्दी उत्तरार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ११×२

क्रमाङ्क ७५

निशीथचूर्णी विंशोद्देशक व्याख्या अपूर्ण पत्र. १७२। **भा.** सं.। **क.** श्रीचंद्रसूरि।
ले. सं. अनु. १४ शताब्दी पूर्वार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ८॥×१॥।
पत्र. १–५, ५५–५८, ६०, ६१ नथी।

क्रमाङ्क ७६

नंदीदुर्गपदवृत्ति पत्र. ३–२२१। **भा.** सं.। **क.** श्रीचंद्रसूरि। **ग्रं.** ३३००।
ले. सं. १२२६। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२॥।×२।

अन्त—

इति समाप्ता श्री**शी**लभद्रप्रभुश्री**ध**नेश्वरसूरिशिष्य**श्री**चन्द्रसूरिविरचिता **न**न्दिटीकाया **दु**र्गपदव्याख्या ॥छ॥

स्वं कष्टेऽतिनिधाय कष्टमधिकं मा मेऽन्यदा जायतां,
व्याख्यानेऽस्य तथाविधे कुमनसामल्पश्रुतानाममुम्।
इत्यालोचयता तथापि किमपि प्रोक्तं मया तत्र च,
दुर्व्याख्यानविशोधनं विदधतु प्राज्ञाः परार्थोद्यताः ॥१॥
दुःसम्प्रदायादसदूहनाद्वा प्रकाशितं यद् वितथं मयेह।
तद् धीधनैर्मामनुकंपयद्भिः शोध्यं मतार्थक्षतिरस्तु मैवम् ॥२॥छ॥

ग्रथाग्रं ३३०० ॥छ॥ मङ्गलमस्तु ॥छ॥ संवत् १२२६ वर्षे द्वितीय श्रावण शुदि ३ सोमेऽद्येह **मं**डली-वास्तव्यश्री**जा**ल्योधरगच्छे **मो**ढवंसे श्रावकश्री**स**देवसुतेन ले. **प**ल्हणेन लिखिता। लिखापिता च श्री**गु**णभद्रसूरिभिः ॥छ॥ मङ्गलमस्तु ॥छ॥

सकलभुवनप्रकाशनभानुश्री**हे**मचन्द्रसुगुरूणाम्। स्थापयिताऽऽसीद् **भा**ण्डागारिक**सो**माकरसुश्राद्धः ॥१॥
मरुदेवागर्भजया तत्सुतया **सो**मिकाह्वया क्रीत्वा। **न**न्द्यध्ययनसुविवरणटिप्पितपुस्तकमिदमुदारम् ॥२॥
मुनि**बा**लचन्द्रशिष्यश्रीमद्**गु**णभद्रसूरिसुगुरुभ्यः। दत्तमुपलभ्य वर्यं फलममलं ज्ञानदानस्य ॥३॥६॥

सं. १३९३ श्री**जि**नपद्मसूरिसुगुरूपदेशेन सा. **के**लीपुत्ररत्न सा.**कि**रतासुश्रावकेण सत्पुत्र सा. **वि**जमल सा. **क**र्मसिंह पौत्र**की**का सकलपरिवारेण ससूत्रा **न**न्दीटीका गृहीता। भगिनी**ना**यकसुश्राविकाश्रेयोऽर्थम्। आचन्द्रार्कं नन्दतात् ॥ श्रीः ॥

क्रमाङ्क ७७

(१) **नंदीसूत्र** पत्र २६। **भा.** प्रा.। **क.** देववाचक। **ग्रं.** ७००।
(२) **नंदीसूत्रवृत्ति** पत्र १–२९७। **भा.** सं.। **क.** आचार्य मलयगिरि। **ग्रं.** ७७३२।
ले. सं. १४८८। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३॥।×२॥.। शुद्ध प्रति।

अन्त—

स्वस्ति संवत् १४८८ वर्षे श्री**स**त्यपुरे पौषवदि १० दिने श्री**पा**र्श्वदेवजन्मकल्याणके श्री**ख**रतरगणाधिपैः

श्रीजिनराजसूरिपट्टालंकारसारैः प्रभुश्रीमज्जिनभद्रसूरिसूर्यावतारैः श्रीनंदिसिद्धान्तपुस्तकं स्वहस्तेन शोधितं पाठितं च। तच्च श्रीश्रमणसङ्घेन वाच्यमानं चिरं नंदतु ॥

क्रमाङ्क ७८

अनुयोगद्वारचूर्णी पत्र. ६९। **भा.** प्रा.। **क.** जिनदासगणि महत्तर। **ग्रं.** २२६८।
ले. सं. अनु. १५ मी शताब्दी उत्तरार्द्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २२॥।×२।

क्रमाङ्क ७९

(१) **अनुयोगद्वारसूत्र** पत्र १-६६। **भा.** प्रा.।
(२) **अनुयोगद्वारसूत्रलघुवृत्ति** पत्र ६७-१६३। **भा.** सं.। **क.** आचार्य हरिभद्र।
ले. सं. अनु. १५ शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३०।×२

क्रमाङ्क ८०

अनुयोगद्वारसूत्रवृत्ति पत्र १८१। **भा.** सं.। **क.** मलधारी हेमचंद्रसूरि।
ले. सं. अनु. १४ शताब्दी पूर्वार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३०॥×२।.। संशोधिता प्रति।

क्रमाङ्क ८१

अनुयोगद्वारसूत्रवृत्ति किंचिदपूर्ण पत्र १९४। **भा.** सं.। **क.** मलधारी हेमचंद्रसूरि।
ले. सं. अनु. १५ मी शताब्दी उत्तरार्ध [धरणाशाह लेखित ?]। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३२॥।×२।.। संशोधिता प्रति।

क्रमाङ्क ८२

(१) **दशवैकालिकसूत्र सटीक** पत्र १-१८६। **भा.** प्रा. सं.। **मू. क.** शय्यंभवसूरि। **टी. क.** तिलकाचार्य। **ग्रं.** ७०००। **वृ. र. सं.** १३०४।
(२) **संग्रहणीप्रकरण सटीक** पत्र १८७-२७५। **मू. क.** श्रीचंद्रसूरि। **टी. क.** देवभद्रसूरि। **ग्रं.** ३५००।
(३) **कल्पसूत्र (पर्युषणाकल्प)** पत्र २७६-३०५। **भा.** प्रा.। **क.** भद्रबाहुस्वामी।
(४) **कल्पसूत्रचूर्णी** पत्र ३०५-३२१। **भा.** प्रा.।
(५) **कल्पसूत्रनिर्युक्ति** पत्र ३२१-३२३। **भा.** प्रा.। **क.** भद्रबाहुस्वामी। **गा.** ६८।
३-५ ना **ग्रं.** १९००।
✓(६) **कल्पसूत्र टिप्पनक** पत्र ३२३-३३८। **भा.** सं.। **क.** पृथ्वीचंद्रसूरि। **ले. सं.** अनु. १४ शताब्दी उत्तरार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३।×२॥.

आ प्रतिमां भगवान् श्रीपार्श्वनाथना जीवनप्रसंगने लगतां चित्रो छे। चित्रोनी यादी—

चित्रक्रमांक	पत्रांक	चित्र
१	१	वामा माता अंतनां पांच स्वप्न जुए छे.
२	,,	वामा माताए जोएलां प्रारंभनां गज-वृषभादि नव स्वप्न.
३	२	स्वप्नपाठकनो फलादेश.
४	,,	भगवान् श्रीपार्श्वनाथनो जन्म.
५	१८५	हरिणेगमेषि देव पार्श्वनाथ भगवानने मेरु उपर लई जाय छे.
६	,,	मेरुपर्वत उपर श्रीपार्श्वनाथनो जन्माभिषेक.

७	१८६	भगवान् पार्श्वनाथ घोडा उपर बेसी फरवा नीकळ्या छे.
८	,,	श्रीपार्श्वनाथनुं लग्न.
९	२७६	श्रीपार्श्वस्वामी अने राणी प्रभावती रंगभवनमां.
१०	,,	वामा माता अने भगवान्-दीक्षानी अनुज्ञा.
११	,,	भगवान् पार्श्वनाथ कमठ तापस पासे जाय छे.
१२	२७७	कमठ तापसनुं पंचाग्नितप अने नागदहन.
१३	,,	वार्षिकदान.
१४	,,	भगवान् शिविकामां बेसी दीक्षा माटे जाय छे.
१५	३३७	भगवाननुं केशलुंचन अने दीक्षा.
१६	,,	कमठ-मेघमालिदेवकृत जलोपसर्ग.
१७	,,	आचार्य महाराज शिष्योने वाचना आपे छे.
१८	३३८	समवसरण.
१९	,,	पार्श्वनाथ भगवाननुं निर्वाण.
२०	,,	अष्टमंगल.

क्रमाङ्क ८३

(१) **दशवैकालिकसूत्र वृत्ति** पत्र १-२०२। **भा.** सं.। **क.** हरिभद्रसूरि। **ग्रं.** ७०००। **ले. सं.** १२८९।

पत्र २०२ मां—

॥ संवत् १२८९ फाल्गुन सुदि ४ सोमे स्तंभतीर्थनगरनिवासिना। श्रीश्रीमालवंशोद्भवेन ठ. साढासुतेन। ठ. कुमरसिंहेन दशवैकालिकश्रुतस्कंधवृत्ति १ निर्युक्ति २ सूत्र ३ पुस्तकं लेखयांचक्रे ॥छ॥ शुभं भवतु ॥छ॥ मंगलमस्तु ॥छ॥

(२) **दशवैकालिकसूत्रनिर्युक्ति** पत्र २०३-२२१। **क.** भद्रबाहुस्वामी। गा. ४४०.

॥ संवत् १२८९. इत्यादि पुष्पिका उपर प्रमाणे.

(३) **दशवैकालिकसूत्र** पत्र २२२-२४७। **भा.** प्रा.। **क.** शय्यंभवसूरि। **ग्रं.** ७०००। **ले. सं.** १२८९। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१॥×२॥.

अन्त—

॥ संवत् १२८९ फाल्गुन सुदि ४ सोमे स्तंभतीर्थनगरनिवासिना। श्रीश्रीमालवंशोद्भवेन ठ. साढासुतेन ठ. कुमरसिंहेन दशवैकालिकश्रुतस्कंधवृत्ति १ निर्युक्ति २ सूत्र ३ पुस्तकं लेखयांचक्रे श्रीजिनराजसूरीणां ॥छ॥

क्रमाङ्क ८४

✓(१) **ओघनिर्युक्ति वृत्ति** पत्र १-१०५। **भा.** प्रा. सं.। **क.** द्रोणाचार्य। **ले. सं.** १११७। पत्र १०, ४६ नथी। पत्र १०५ मां हाथी अने कमळनां शोभनो छे।

अन्त—

॥ ओघनिर्युक्तिटीका समाप्ता ॥छ॥

दोपारुचि चन्द्रकुलं प्रजनितबहुलक्षपापहरणं च। यच्चरिते सदा सान्तं तज्जयति महातपोहितं सकलम् ॥१॥

तस्मिन् बभूव भुवनत्रयगीतकीर्तिः श्रीमान् कृती सुकृतवान् मुनिचन्द्रसूरिः ।
यस्याद्भुतैकचरिताम्बुनिधेर्गुणानां शक्या न जातु परिमा गुरुणाऽपि कर्तुम् ॥२॥
सूरिः श्रीमानाम्रदेवाभिधानस्तच्छिष्योऽभूद् भूषणं भूरमण्याः ।
बद्धस्पर्धा यद्गुणाः कीर्त्तिवध्वा सार्द्धं भ्रेमुर्विश्वदृक्कौतुकेन ॥३॥
शिष्यस्तस्याऽजनि बहुमतः श्रीयशोदेवसूरिर्यस्यात्यर्थं गुरुगुणगणाः प्रत्यहं वृद्धिभाजः ।
ब्रह्माण्डान्तर्निजनिवसनस्थानसम्बाधभीत्या शङ्के भ्रेमुस्त्रिभुवनमदो वीक्षितुं सर्वदैव ॥४॥
नागपालसुतः श्रीमान् श्रीधराख्योऽभवद् वणिक् । जगदानन्दनस्तस्याभूदानन्दाभिधः सुतः ॥५॥
स इदं लेखयामास ओघनिर्युक्तिपुस्तकम् । तस्मै श्रीसूरये भक्त्या ज्ञानदानधिया सुधीः ॥६॥
यावच्चन्द्रदिवाकरौ प्रकुरुतो निर्ध्वान्तमस्त्रैर्नभो यावत्तुङ्गतरङ्गभङ्गगहना गङ्गापगा गीयते ।
यावच्चोन्नतिमान् महानिह गिरिर्मेरुर्नगग्रामणीस्तावत् पुस्तकरत्नमेतदमलं कुर्वन्तु कण्ठेऽशठाः ॥७॥छ॥
सम्वत् १११७ मङ्गलं महाश्रीः ॥छ॥ पाहिलेन लिखितम् । मङ्गलं महाश्री ॥छ॥छ॥छ॥

✓(२) **दशवैकालिकसूत्र वृत्ति** पत्र १०६-२१२ । **भा.** सं. । **क.** आचार्य हरिभद्र । पत्र २१२ मां हाथी, कळश, श्रीदेवी आदि चित्ररूप शोभनो छे ।

अन्त—

दोषारुचि चन्द्रकुलं प्रजनितबहुलक्षपापहरणं च । यच्चरिते सदा सांतं तज्जयति महालपोहितं सकलम् ॥
तस्मिन् बभूव भुवनत्रयगीतकीर्त्तिः श्रीमान् कृती सुकृतवान् मुनिचन्द्रसूरिः ।
यस्याद्भुतैकचरिताम्बुनिधेर्गुणानां शक्या न जातु परिमा गुरुणाऽपि कर्तुम् ॥
सूरिः श्रीमानाम्रदेवाभिधानस्तच्छिष्योऽभूद् भूषणं भूरमण्याः ।
बद्धस्पर्धा यद्गुणाः कीर्त्तिवध्वा सार्धं भ्रेमुर्विश्वदृक्कौतुकेन ॥
शिष्यस्तस्याऽजनि बहुमतः श्रीयशोदेवसूरिर्यस्यात्यर्थं गुरुगुणगणाः प्रत्यहं वृद्धिभाजः ।
ब्रह्माण्डान्तर्निजनिवसनस्थानसम्बाधभीत्या शङ्के भ्रेमुस्त्रिभुवनमदो वीक्षितुं सर्वदैव ॥
नागपालसुतः श्रीमान् श्रीधराख्योऽभवद्वणिक् । जगदानन्दनस्तस्याभूदानन्दाभिधः सुतः ॥
स इदं लेखयामास दशवैकालिकाभिधम् । पुस्तकं सूरये तस्मै श्रीमते शुद्धमानसः ॥
यावच्चन्द्रदिवाकरौ प्रकुरुतो निर्ध्वान्तमस्त्रैर्नभो यावत्तुङ्गतरङ्गभङ्गगहना गङ्गापगा गीयते ।
यावच्चोन्नतिमान् महानिह गिरिर्मेरुर्नगग्रामणीस्तावत् पुस्तकरत्नमेतदमलं कुर्वन्तु कण्ठेऽशठाः ॥छ॥छ॥
मङ्गलं महाश्रीः ॥छ॥ पाहिलेन लिखितम् । मङ्गलं महाश्रीः ॥

(३) **दशवैकालिकनिर्युक्ति अपूर्ण** पत्र. १० । **भा.** प्रा. । **क.** भद्रबाहुस्वामी । **गा.** ३७९ पर्यन्त । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** २५॥×२॥. । पत्र ८ मुं नथी ।

क्रमाङ्क ८५

✓(१) **दशवैकालिकसूत्र वृत्ति** पत्र. १-१७३ । **भा.** सं. । **क.** आचार्य हरिभद्र । **ग्रं.** ७००४ । पत्र. १७३ मां शोभन छे ।

✓(२) **दशवैकालिकचूर्णी** पत्र. १७४-३४१ । **भा.** प्रा. । **क.** स्थविर अगस्त्यसिंह । **ले. सं.** अनु. १२ मी शताब्दी पूर्वार्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** २९॥।×२।. । पत्र ३३४ मां शोभन छे ।

पट्टिका उपर—

॥छ॥ श्रीमज्जिनदत्तसूरीणां दशवैकालिकवृत्तिश्चूर्णिश्च ॥ छ ॥ प्रधानाक्षरा ॥

अन्त—

छहि मासेहिं अधीतं० गाधा। छहिं इति परिमाणसद्दो। मास इति कालपरिसंखाणं, तेहिं छहिं अधीतं। एत्तिएण कालेण पढितं। अज्झयणसद्दो सव्वम्मि दसकालिये वट्टति। अधवा अज्झयणमिणं तु जं इमं पच्छिमं चूलियज्झयणं, एतम्मि आणुपुव्वीए अहीते सगलं सत्थमधीतं भवति। अज्जमणएणं ति अज्जसद्दो सामिपज्जाय-वयणो, मणयो पुव्वं भणितो। तेण तस्स एत्तियो चेव छम्मासो परियाओ। अह कालगतो अधसद्दो अणंतरत्थे अज्झयणपरियायाणंतरं। अह तदणु कालगतो समाधीए जीवणकालो जस्स गतो सो कालगतो, समाधीए त्ति जधा तेण एत्तिएण चेव सुतनाणेण आराधित एवमण्णे वि एत्तिएणेव आराधगा भवंतीति। द्वितीया निज्जुत्ति-गाधा ॥

आणंदअंसु०गाधा। आणंदणमाणंदो तेण अंसुपातो। जधा इट्ठसमादो आराधितमिमेणं ति। एतेण अत्थेण कासी इति अकार्षीत्। अतिक्कंतकालवयण। सेज्जंभवथेरा इति जे पढमं परूविता। तहिं ति तम्मि काले। सेज्जंभवसामिपधाणसीसाण जसभद्दाण पुच्छा अंसुपातं प्रति। किं खमासमणो ! इमम्मि खुड्डए कालगते अंसुपातो अकतपुव्वो कतो। कधणा य अज्जसेज्जंभवाण जधा हरिसो संसारसंबंधो त्ति। एस मम सुतो। अज्जजसभद्देहि य एस गुरूणं सुतो एवं कधावियालणा सघे। सव्वेहि य आणंदअंसुपातो मिच्छादुक्कडाणि य कताणि पडिचोदणादिसु गुरुसुतो आसाइतो त्ति। सेज्जंभवसामिणा वि मा गोरवेण ण पडिचोदेज्ज त्ति अतो पढमं न कधियं। एवमणुगमे परिसमत्ते णया। तत्थ णायम्मि गेण्हितव्वे० गाधा। गाधाविवरणं जधा आवस्सए। वितिया सव्वेसिं पि णयाणं० गाधा। अक्खरत्थविचारो से तधेव। एवमेतं धम्मसमुक्कित्तणादिचरणकरणाणेगपरूवणागब्भं नेव्वाणगमण-फलावसाणं भवियजणाणंदिकरं। चुण्णिसमासवयणेण दसकालियं परिसमत्तं ॥ ॥ नमः ॥

वीरवरस्स भगवतो तित्थे कोडीगणे सुविपुलम्मि। गुणगणवइराभस्सा वैरसामिस्स साहाए ॥
महरिसिसरिससभावा भावाभावाण मुणितपरमत्था। रिसिगुत्तखमासमणो खमासमाणं निधी आसि ॥
तेसिं सीसेण इमा कलसभवमइंदणामधेज्जेणं। दसकालियस्स चुण्णी पयाण रयणातो उवण्णत्था ॥
रुयिरपदसंधिणियता छड्डियपुणरुत्तवित्थरपसंगा। वक्खाणमंतरेणावि सिस्समतिबोधणसमत्था ॥
ससमयपरसमयणयाण जं थ ण समाधित पमादेणं। तं खमह पसाहेह य इय विण्णत्ती पवयणीणं ॥

॥ दसकालियचुण्णी परिसमत्ता ॥

आसीदशेपनगरीगरिमापहारिश्रीपल्लिकावरपुरीविहिताधिवासः।
श्रीधर्कटान्वयसमुत्थजनाग्रगामी सच्छ्रावकः सुविदितो भुवि शालिभद्रः ॥१॥
गाम्भीर्यधैर्यविनयार्ज्जवसत्यमुख्यसंख्याव्यतीतगुणसम्पदुपेतमूर्त्तिम्।
यं नास्पृशत् क्षयभयादिव दुर्द्दमोऽपि नूनं कलिः कलुषिताखिलसत्तमोऽपि ॥२॥
तस्य देवगुरूपास्तिनिरस्ताशेपदुःकृता। शीतेव शीलसम्पन्ना बहुदेवी गृहिण्यभूत् ॥३॥
तयोरसमसाहसो मतिमतां मनःस्वात्मवत् परोपकृतितत्परः परमबन्धुभूतः सताम्।
न केवलमभिख्ययाऽजनि तथाऽर्थतोऽप्यङ्गजः प्रसिद्धिमधिकां गतो जगति साधुसाधारणः ॥४॥
सुरगुरुरकुलीनो ग्राहभाग् वारिराशिः खररुचिरहिमांशुः प्राप्तदोपो मृगाङ्कः।
गिरिकुलमपि दूरं कर्कशत्वप्रपन्नं तदयमतिगुणाढ्यः केन तुल्यः समस्तु ॥५॥
सिन्धौ हरौ धनपतौ च चिरं स्थिता श्रीः तै रक्षिताऽऽदरपरैर्व्ययिताऽमुनैव।
बद्धाऽस्य पुण्यनिगडैर्न च नंष्टुमीष्टे कस्यास्तु विस्मयकरी न सतां प्रवृत्तिः ॥६॥
धवलगुणदेविपुत्री पवित्रचारित्रपात्रतां प्राप्ता। भार्या जिनमुनिभक्ता शान्तिमतिर्नाम तस्यास्ति ॥७॥

तस्याममास्यमभजत् (?) प्रचुरेऽपि कोपे कार्कश्यवन्न च वचः क्वचिदुल्ललाप।
स्वप्नेऽपि न व्यधित कर्म विगर्हणीयं कृच्छ्रेऽपि लंघितवती न च या स्वमेराम् ॥८॥
पूर्णभद्र-हरिभद्रसंज्ञितौ प्रज्ञया च विनयेन चान्वितौ ।
साऽभ्यसूत तनयौ विशिष्टया शैशवेऽपि शुचिचेष्टया युतौ ॥९॥
दृष्ट्वा संसृतिसम्भवं सुखमतिस्वल्पं वपुर्जीवितं, विद्युच्चञ्चलमाकलय्य.........................।
मत्वा चाशुभभित्तिभंगचतुरं ज्ञानप्रदानं मुदा, सम्यक् शान्तिमतिर्व्यलेखयदिदं मोक्षाय सत्पुस्तकम् ॥१०॥
जाड्यं खण्डयति प्रभावमतुलं संवर्द्धयत्युद्धतं मिथ्यात्वं प्रतिहन्ति कीर्त्तिममलामुल्लासयत्यञ्जसा ।
किं वा नो वितरत्यभीष्टमखिलं सज्ज्ञानदानं ततः कल्याणार्थिभिरादृतैरिह महायत्नो विधेयः सदा ॥११॥
केचिन्मुग्धधियो धनानि वहुधाऽऽवर्ज्यार्जितान्यङ्गनावन्धुस्निग्धसुतोपभोगविषये युञ्जन्ति रक्षन्ति च ।
अन्ये तूज्ज्वलवुद्धयोऽधममिदं ज्ञात्वा भवार्त्तिच्छिदि प्रज्ञानंतमुदि क्षिपन्ति विभवं ज्ञानप्रदानादिषु ॥१२॥
यावद्विक्षेपदण्डश्रियमनुकुरुते तिर्यगद्रिव्रजोऽयं
मेरूणां पञ्चकं च प्रथयति नियतं कन्दुकाकारमुद्राम् ।
क्रीडत्येभिश्च कालः शिशुरिव विविधान्यान्यपर्यायवृत्त्या-
स्तात्तावत् पुस्तकोऽयं यतिभिरनुदिनं सादरं पठ्यमानः ॥१३॥छ॥छ॥

क्रमाङ्क ८६

दशवैकालिकवृत्ति त्रुटक अपूर्ण पत्र २०८। **भा.** प्रा. सं.। **क.** आचार्य हरिभद्र। **ले. सं.** अनु. १३ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २६॥×२.। वचमां घणां पानां नथी।

क्रमाङ्क ८७

(१) **दशवैकालिकनिर्युक्ति** पत्र १-१६। **भा.** प्रा.। **क.** भद्रवाहुस्वामी।

(२) **दशवैकालिकवृत्ति** पत्र १-१७१। **भा.** सं.। **क.** आचार्य हरिभद्र। **ग्रं.** ७०००।

ले. सं. अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३॥×२॥.। वचमां वचमां खंडित थएलां घणां पानां अनु. १५ मी शताब्दीमां लखाएलां छे।

क्रमाङ्क ८८

(१) **दशवैकालिकसूत्र निर्युक्ति वृत्ति सह** पत्र २७०। **भा.** प्रा. सं.। **मू. क.** शय्यंभवसूरि। **नि. क.** भद्रवाहुस्वामी। **वृ. क.** आचार्य हरिभद्र। **वृ. ग्रं.** ७०००। **सर्वग्रं.** ८२७५।

(२) **दशवैकालिक लघुवृत्ति** पत्र २७२-३५८। **भा.** सं.। **क.** सुमतिसूरि। **ग्रं.** २५००। र. सं. १२२०।

ले. सं. १४८८। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३×२.। पत्र १३ मुं नथी.

अन्त—

॥ समाप्ता दशवैकालिकटीका ॥

महत्तराया याकिन्या धर्मपुत्रेण चिन्तिता। आचार्यहरिभद्रेण टीकेयं शिष्यबोधिनी ॥१॥
दशवैकालिकानुयोगात् सूत्रव्याख्या पृथक् कृता। मात्सर्यदुःखविरहाद् गुणानुरागी भवतु लोकः ॥२॥

दशवैकालिकटीकां विधाय यत् पुण्यमर्जितं तेन । हरिभद्राचार्यकृतान्मोहाद् भक्त्याऽथवा मया ॥३॥
श्रीमद्बोधकसूरिणा श्रीमत्सुमतिसूरिणा । विबुधैस्तत्र न द्वेषो मयि कार्यो मनागपि ॥४॥
यस्माद् व्याख्याक्रमः प्रोक्तः सूरिणा भद्रबाहुना । आवश्यकस्य निर्युक्तौ व्याख्याक्रमविपश्चिता ॥५॥
सूत्रार्थः प्रथमो ज्ञेयो निर्युक्त्या मिश्रितस्तथा । सर्वैर्व्याख्याकर्मेर्युक्तो भणितव्यस्तृतीयकः ॥६॥
प्रमादकार्यविक्षिप्तचेतसा तदयं मया । क्रियाया अवबोधार्थं साधूनां तु पृथक्कृतः ॥७॥
लब्ध्वा मानुष्यकं जन्म ज्ञात्वा सर्वविदां मतम् । प्रमादमोहसम्मूढा वैफल्यं ये नयन्ति हि ॥८॥
जन्ममृत्युजराव्याधिरोगशोकाद्युपद्रुते । संसारसागरे रौद्रे ते भ्रमन्ति विडम्बिताः ॥९॥
ये पुनर्ज्ञानसम्यक्त्वचारित्रविहितादराः । भवाम्बुधिं समुल्लंघ्य ते यान्ति पदमव्ययम् ॥१०॥

॥ ग्रंथ २५०० ॥

कातंत्रभूषणन्यासकर्तृश्रीचंद्रसूरये । आशादित्यमहामात्यः [.........................॥]
एनां [विं]शतिसंयुक्ते शतद्वादशहायने । एकादश्यां नभस्यस्य कृष्णायां भौमवासरे ॥छ॥

संवत् १४८८ वर्षे मार्गशीर्ष सुदि २ गुरौ श्री**स्तंभ**तीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे श्री**म**त्खरतरगच्छे श्री**जिन**राजसूरिपट्टे लब्धिलीलानिलयबहुबुद्धिबोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचंदनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्री**जिन**भद्रसूरीश्वराणामुपदेशेन रेपाप्राप्तसुश्रावकेन सा. **उदयराज** सा० **वलिराजेन** दशवैकालिकसूत्र-निर्युक्ति-बृहद्वृत्ति-लघुवृत्तिपुस्तकं लिखापितम् ॥छ॥छ॥ श्रीमंगलं ॥

क्रमाङ्क ८९

(१) दशवैकालिकचूर्णी पत्र. १-३५५ । **भा.** प्रा. । **ग्रं.** ८४०० । **ले. सं.** १४८९ । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** २२।×२.

अन्त—

॥ संवत् १४८९ वर्षे मार्ग शुदि ५ गुरुदिने श्रीमति श्री**स्तंभ**तीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे विजयिनि श्री**म**त्खरतरगच्छे श्री**जिन**राजसूरिपट्टे लब्धिलीलानिलयबंधुरबहुबुद्धिबोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचंदनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्री**जिन**भद्रसूरीश्वराणामुपदेशेन परीक्ष**गूजर**सुतेन रेपाप्राप्तसुश्रावकेन परीक्ष**धरणा**केन पुत्र**सा**ईयासहितेन श्रीसिद्धांतेन भांडकार लिखापितं **आसा** लिखितं ॥

(२) दशवैकालिकनिर्युक्ति पत्र. ३५६-३८० । **भा.** प्रा. । **क.** भद्रबाहुस्वामी । **गा.** ४५० । **ले. सं.** १४९१ । **लं. प.** २२।×२.

अन्त—

तत्समर्थने च **द**शवैकालिकनिर्युक्तिः समाप्ता ॥छ॥ कृतिः श्री**भ**द्रबाहुस्वामिनः ॥छ॥
आवश्यकादिनिर्युक्तिविधानाल्लब्धकीर्त्तये । **भ**द्रबाहुमुनींद्राय श्रुतकेवलिने नमः ॥
॥ संवत् १४९१ वर्षे श्रावण सुदि ९ बुधे विशाखानक्षत्रे शुभयोगे लिखितं ॥छ॥
शुभं भवतु लेखकपाठकयोः ॥छ॥श्रीः॥छ॥

क्रमाङ्क ९०

(१) पिंडनिर्युक्ति (महल्लिया पिंडनिर्युक्ति) पत्र १-३० । **भा.** प्रा. । **क.** भद्रबाहुस्वामी । **गा.** ६९७ ।

(२) पिंडनिर्युक्ति लघुवृत्ति पत्र ३१-१०२ । **भा.** प्रा. ।

(३) **पिंडनिर्युक्तिबृहद्वृत्ति सह** पत्र १–२४१। **भा.** सं.। **वृ.** आचार्य मलयगिरि। **ग्रं.** ७५००।

ले. सं. १४८९। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३×२।

अन्त—

एवं ग्रन्थसङ्ख्या ७५०० **पिण्डनिर्युक्तिः** समाप्ता ॥छ॥ संवत् १४८९ वर्षे मार्गशीर्ष सुदि ५ गुरुवारे श्रीमति श्री**स्तम्भ**तीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे विजयिनि श्रीमत्**खरतर**गच्छे श्री**जिनराज**सूरिपट्टे लब्धि-लीलानिलयवन्धुरवहुवुद्धिवोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचन्दनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकर-करप्रसरसमश्रीमद्गच्छेशभट्टारकश्री**जिनभद्रसूरी**श्वराणामुपदेशेन रेपाप्राप्तसुश्रावकेन साह**वलिराजे**न सा. **उदयराजा**दिस-परिवारेण श्री**पिण्डनिर्युक्ति**सूत्रलघुवृत्तिवृहद्वृत्तिपुस्तकं लिखापितम् ॥छ॥ शुभं भवतु चतुर्विधश्रीश्रमणसङ्घस्य ॥

क्रमाङ्क ९१

पिंडनिर्युक्ति वृत्तिसह पत्र २००। **भा.** प्रा. सं.। **नि. क.** भद्रवाहुस्वामी। **वृ. क.** मलयगिरि। **ग्रं.** ७२५०। **ले. सं.** १२८९। **लं. प.** ३१॥×२।.

अन्त—

॥छ॥ ग्रंथाग्रं ७२५० ॥छ॥छ॥ संवत् १२८९ वर्षे फाल्गुन शुदि ४ सोमे **स्तंभ**तीर्थनगरनिवासिना श्री**श्री**माल्वंशोद्भवेन। ठ. **साढासुते**न ठ. **कुमरसिंहे**न। **मलयगिरि**विरचिता सूत्रमिश्रा **पिंडनिर्युक्ति**वृत्तिर्लेखयां-चक्रे ॥छ॥छ॥ शुभं भवतु चतुर्विधश्रीश्रमणसंघस्य ॥छ॥छ॥ मंगलमस्तु ॥छ॥छ॥

क्रमाङ्क ९२

पिंडनिर्युक्तिवृत्ति पत्र २४७। **भा.** सं.। **क.** वीरसूरि। **ग्रं.** ७६७१।

ले. सं. अनु. १४ शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३।×२।.। पत्र २३५, २३७, २४२, २४४, २४६ नथी। बे पत्र नंवर विनानां छे।

क्रमाङ्क ९३

(१) **पिंडनिर्युक्ति लघुवृत्ति** पत्र १–१३१। **भा.** प्रा.। **ग्रं.** २९५०।

✓(२) **पिंडनिर्युक्ति** पत्र १३२–१७५। **भा.** प्रा.। **क.** भद्रवाहुस्वामी। **गा.** ७०७।

ले. सं. अनु. १३ शताब्दी पूर्वार्ध।. **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २८॥×२।

पत्र १, १३१, १३२, १७५ मां सुंदर **शो**भनो छे।

क्रमाङ्क ९४

(१) **आवश्यकनिर्युक्ति किंचिदपूर्ण** पत्र ६६। **भा.** प्रा.। **क.** भद्रवाहुस्वामी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३॥।×२।.। पत्र. २४, ५४ नथी।

(२) **उत्तराध्ययनसूत्र** पत्र ५०। **भा.** प्रा.। **ले. सं.** १४८७। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३॥।×२.। पत्र १, ४, ५, १४, १६, २१, २६, २७, २९, ३३, ४९, नथी।

अन्त—

स्वस्तिश्री संवत् १४८७ वर्षे अश्विनमासे शुक्लपक्षे एकादश्यां तिथौ गुरुवासरे श्री**स्तंभ**तीर्थे श्री**खरतर**गच्छे भट्टारकश्री**जिनभद्रसूरी**णां श्री**उत्तराध्ययन**पुस्तकं लिखितं। ग्रंथाग्रं २००० ॥ श्री श्रीः ॥ छ ॥ प० **धरणा**केन **समवायांगसूत्रवृत्ति आवश्यकसूत्र पाक्षिकसूत्रवृत्ति उत्तराध्ययनसूत्र**पुस्तकं लिखापितं ॥ छ ॥

क्रमाङ्क ९५

उत्तराध्ययनसूत्र चूर्णी पत्र २५३। **भा.** प्रा.। **क.** गोपालिक महत्तर शिष्य। **ग्रं.** ५८५५। **ले. सं.** १४८९। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २९।×२.।

अन्त—

॥ संवत् १४८९ वर्षे कार्तिक वदि ४ भौमे श्रीखरतरगच्छे श्रीजिनराजसूरिपट्टे श्रीजिनभद्रसूरीश्वराणामुपदेशेन प. गूजरपुत्र प. धरणाकेन सुतसाईयासहितेन श्रीउत्तराध्ययनचूर्णिपुस्तकं लिखापितं ॥

क्रमाङ्क ९६

उत्तराध्ययनसूत्र बृहद्वृत्ति पाइयटीका किंचिदपूर्ण पत्र ३९०। **भा.** प्रा. सं.। **क.** थारापद्रगच्छीय वादिवेताल शान्तिसूरि। **ले. सं.** १३ मी शताब्दी उत्तरार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २९।×२॥.। पत्र १, १०, ७८, १३५, १४४, ३०९ नथी।

क्रमाङ्क ९७

उत्तराध्ययनसूत्र बृहद्वृत्ति द्वितीयखंड (पाइयटीका) पत्र २०८। **भा.** प्रा. सं.। **क.** थारापद्रगच्छीय वादिवेताल शांतिसूरि। **ले. सं.** १४९१। **संह०** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१॥×२।.।

अन्त—

संवत् १४९१ वर्षे कार्तिक वदि ११ गुरौ श्रीमति श्रीस्तम्भतीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे विजयिनि श्रीमत्खरतरगच्छे श्रीजिनराजसूरिपट्टे लब्धिलीलानिलयबन्धुरबहुबुद्धिबोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचन्दनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्रीजिनभद्रसूरीश्वराणामुपदेशेन परीक्षिगूजरसुतेन रेपाप्राप्तपरमसुश्रावकेन परीपिधरणाकेन पुत्रसाइयासहितेन श्रीसिद्धान्तकोशे श्रीउत्तराध्ययनबृहद्वृत्तिद्वतीयखण्डपुस्तकं लिखापितम्। स्वश्रेयसे ॥छ॥

श्रीर्भूयात् श्रीसमणसंघस्य ॥छ॥ पुस्तकं विद्वज्जनैर्वाच्यमानमाचन्द्रार्कं यावन्नन्दतात् ॥ श्रीः ॥

क्रमाङ्क ९८

उत्तराध्ययनसूत्र सुखबोधावृत्तिसह पत्र ३९५। **भा.** प्रा. सं. अप.। **वृ. क.** नेमिचंद्रसूरि। **ग्रं.** १४०००। **ले. सं.** १३५४। **संह.** जीर्णप्राय। **द.** श्रेष्ठ। **लं. प.** ३३।×२॥.

अन्त—

॥छ॥ वृत्तेः सूत्रसमं ग्रंथाग्रं श्लोक १४००० ॥छ॥ मंगलमस्तु ॥छ॥छ॥ संवत् १३५४ वर्षे अश्विन शुदि २ सोमे। श्रीउत्तराध्ययनपुस्तकं लिखितं ॥छ॥ भद्रं भवतु ॥छ॥

क्रमाङ्क ९९

उत्तराध्ययन सुखबोधावृत्ति सह पत्र ४५५। **भा.** प्रा. सं. अप.। **वृ. क.** नेमिचंद्रसूरि। **ले. सं.** १४९१। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २३×२.

अन्त—

इत्युत्तराध्ययनटीकासूत्रसन्मिश्रा समाप्ता ॥छ॥ संवत् १४९१ वर्षे श्रावण वदि १३ रवौ श्रीस्तम्भतीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे विजयिनि श्रीमत्खरतरगच्छे श्रीजिनराजसूरिपट्टे लब्धिलीलानिलयबन्धुरबहुबुद्धिबोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचन्दनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्रीजिनभद्रसूरीश्वराणामुपदेशेन परीक्षिसाहगूजरसुतेन रेपाप्राप्तसुश्रावकेन सा. धरणाकेन पुत्र सा. साइयासहितेन श्रीसिद्धान्तकोशे श्रीउत्तराध्ययनलघुटीका सूत्रसहिता समाप्ता ॥छ॥ श्रीर्भूयात् ॥छ॥ ग्रन्थाग्रं १४०००॥

क्रमाङ्क १००

उत्तराध्ययनसूत्र सुखाववोधा वृत्ति त्रूटक अपूर्ण पत्र १३७। **भा.** प्रा. सं.। **क.** नेमिचन्द्रसूरि। **ले. सं.** अनु. १३ मी शताब्दी उत्तरार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१×२।.। लगभग २०० जेटलां पानां छे।

क्रमाङ्क १०१

आवश्यक चूर्णी पत्र ४१२। **भा.** प्रा.। **क.** जिनदासगणि महत्तर। **ले. सं.** १४८८। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३४।×२।.। पुष्पिका **धरणाशाह**नी घसाएली छे।

क्रमाङ्क १०२

आवश्यक चूर्णी अपूर्ण पत्र २-३७९। **भा.** प्रा.। **क.** जिनदासगणि महत्तर। **ले. सं.** अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१॥×२॥.। वच्चमां घणां पाना खूटे छे तथा घणा पानांना टूकडा थएला छे।

क्रमाङ्क १०३

आवश्यक चूर्णी पत्र ३३९। **भा.** प्रा.। **क.** जिनदासगणि महत्तर। **ले. सं.** अनु. १४ मी शताब्दी पूर्वार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३०।×२।.। पत्र २, ९०, ९२, ११६, ११८, १२२, २०३, २७८, २८०-२८३, २८५, २९०-२९३, ३१३ नथी।

क्रमाङ्क १०४

(१) **आवश्यकवृत्ति शिष्यहिता प्रथमखंड** पत्र. ३९६। **भा.** प्रा. सं.। **क.** आचार्य हरिभद्र। **ले. सं** १४८९।

अन्त—

॥ समाप्तमावश्यकप्रथमखंडमिति ॥ छ ॥ मंगलं महाश्रीः ॥ स्वस्ति संवत् १४८९ वर्षे पौषवदि २ भोमे **स्तं**भतीर्थे पुस्तकं लेषिनीया। श्रीखरतरगच्छे श्री**जिन**राजसूरिपट्टे श्री**जिन**भद्रसूरिविजयराज्ये सा. **डूं**गरसुत चलिराजउदयराजसुश्रावकयोः (काभ्यां ?) निजपुण्यार्थं पुस्तकं लिखापयामास (लिखापितम्) ॥ छ ॥

(२) **आवश्यकनिर्युक्ति** अपूर्ण पत्र. १५। **भा.** प्रा.। **क.** भद्रबाहुस्वामी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१॥।×२॥.

क्रमाङ्क १०५

आवश्यकवृत्ति शिष्यहिता द्वितीयखंड पत्र. ३३१। **भा.** प्रा. सं.। **क.** आचार्य हरिभद्र। **ले. सं.** १४८८। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३२।×२।.

अन्त—

॥ संवत् १४८८ वर्षे भाद्रपद सुदि २ गुरौ अद्येह श्री**स्तं**भतीर्थे श्रीखरतरगच्छे श्री**जिन**भद्रसूरिविजयराज्ये परीक्षिधरणाकेन श्रीआवश्यकबृहद्वृत्ति**द्वि**तीयखंडपुस्तकं लिखापितं ॥ चिरं वाच्यमानं नंदतात् ॥

क्रमाङ्क १०६

आवश्यकवृत्ति प्रथमखंड पत्र. ३१३। **भा.** प्रा. सं.। **क.** आचार्य हरिभद्र। **ले. सं.** १४०७। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१॥×२॥.। पत्र. ३०, ४६, ४७, ४९, ५०, ७४, ७६, ७९-८१, ८३, १२८, ३०५, ३०७, ३०९, ३११ नथी।

अन्त—

सं० १४०७ वर्षे आषाढ सुदि ६ गुरौऽद्येह श्रीपत्तने आवश्यकवृत्तिप्रथमखंडस्य खंडिर्लिखिता ॥
संकुडियजन्हुकुपरगीवाकरचलणवंभणावयवा । अणसमउ तुम्ह वेरं........................

क्रमाङ्क १०७

आवश्यकवृत्तिद्वितीयखंड पत्र. ३१० । **भा.** प्रा. सं. । **क.** आचार्य हरिभद्र । **ग्रं.** १२४०० । **ले. सं.** अनु. १५ शताब्दी । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३१॥।×२।.

क्रमाङ्क १०८

आवश्यकवृत्ति टिप्पनक अपूर्ण पत्र. १४६ । **भा.** स. । **क.** मलधारी हेमचंद्रसूरि । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३१॥।×२।.। पत्र. ६७, ६९, ७०, ८६, ८८, १०१, १०३, १०४, १०६, १०८–११७, ११९–१२९, १३३–१४५ नथी.

क्रमाङ्क १०९

विशेषावश्यक महाभाष्य पत्र. ७–१०७ । **भा.** प्रा. । **क.** जिनभद्रगणि क्षमाश्रमण । **गा.** ४३१४ । **ले. सं.** अनु. १५ शताब्दी उत्तरार्ध [**धरणाशाह** लेखित ?] । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३१॥।×२।.। पत्र. ६१ मुं नथी.

क्रमाङ्क ११०

आवश्यकवृत्ति प्रथमखंड. पत्र. २४२ । **भा.** प्रा. सं. । **क.** आचार्य मलयगिरि । **ले. सं.** १४९० । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३१॥।×२।. । पत्र १३२ मुं नथी ।

अन्त—

॥ संवत् १४९० वर्षे माघसुदि पंचमी शुक्रे श्रीमति श्री**स्तंभ**तीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे विजयिनि श्रीमत्**खरतर**गच्छे श्री**जिनराज**सूरिपट्टे लब्धिलीलानिलयबंधुरबहुबुद्धिबोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचंदनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्री**जिनभद्र**सूरीश्वराणामुपदेशेन परीक्ष सा० **गूजर**सुतेन रेपाप्राप्तसुश्रावकेन परीक्ष**धरणा**केन पुत्र सा० **साइया**सहितेन । श्री**आवश्यकमलयगिरि**कृत**बृहद्वृत्ति**प्रथमखंडपुस्तकं लिखापितं ॥ श्रीः ॥ छ ॥

क्रमाङ्क १११

आवश्यकवृत्ति द्वितीयखंड पत्र ३२४ । **भा.** प्रा सं । **क.** आचार्य मलयगिरि । **ले. सं.** १४९१ । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३१॥।×२।.

अन्त—

॥ संवत् १४९१ वर्षे श्रावण सुदि ८ भोमे श्रीमति श्री**स्तंभ**तीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे विजयिनि । श्रीमत्**खरतर**गच्छे श्री**जिनराज**सूरिपट्टे लब्धिलीलानिलयबंधुरबहुबुद्धिबोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचन्दनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्री**जिनभद्र**सूरीश्वराणामुपदेशेन परीक्ष**गूजर**सुतेन रेपाप्राप्तसुश्रावकेन परीक्ष**धरणा**केन पुत्र**साइया**सहितेन श्रीसिद्धांतकोशे श्री**मलयगिरि**कृतश्री**आवश्यक**बृहद्वृत्तिद्वितीयखंडपुस्तकं लिखपितं ॥छ॥ शुभं भवतु ॥

क्रमाङ्क ११२

आवश्यकवृत्ति प्रथमखंड पत्र २३६ । **भा.** प्रा. सं. । **क.** आचार्य मलयगिरि । **ले. सं.** १३०० । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३१॥।×२॥.

अन्त—

सव्वेसिं पि जिणाणं जेहि उ दिन्नाउ पढमभिक्खाओ । ते पयणुपेज्जदोसा दिव्ववरपरक्कमा जाया ॥
केयी तेणेव भवे निव्वुया सव्वकम्मउम्मुक्का । केई तइयभवेणं सिज्झिस्संती जिणसगासे ॥छ॥
५० ॥

संरक्ष्य जीवस्य कृतार्त्तिकस्य नालीकसम्बन्धमनोहरस्य ।
जैनस्य धर्मस्य निबन्धनं श्रीऊकेशवंशोऽत्र वरीवृतीति ॥१॥
तत्रेन्दिराभद्रवशैकविन्ध्यः श्राद्धावतंसोऽजनि पद्मदेवः ।
अमंस्त धर्मं विभवं विवेकं चक्षुःसधर्मोपकृतीरसून् यः ॥२॥
नासत्ययुक्त्या गतरोगशीला सुपर्वचिध्यद्भसुराजकाम्या ।
वृषाग्रिमश्रीरुचिताऽस्य देवश्रीरित्यभूत् प्रेमगृहं कलत्रम् ॥३॥
तस्याङ्गभूः कौस्तुभवत् पयोधेः क्षेमंधरोऽभूद् विलसन्महस्कः ।
लोकंपृणैर्यः स्वगुणैश्चकार पदं हृदब्जे पुरुषोत्तमस्य ॥४॥
यो धर्मरत्नमभजज्जिनचन्द्रसूरेर्दौर्गत्यनिर्जयि विविच्य विशुद्धबुद्धिः ।
वाक्यामृतैर्जिनपतेः सुगुरोरुदारैः कृत्वा तदेव विमलं हृदये न्यधत्त ॥५॥
चित्रं महाधार्मिकमौलिरेष सहोदरं यन्निजनंदनं च ।
आचार्यलक्ष्मीयुजमप्यहासीत् को वाच्यमिच्छेज्जिनचन्द्रमाप्य ॥६॥
पार्श्वप्रभोरजयमेरुपुरे पुरस्ताद् योऽचीकरत् कमपि मण्डपमग्र्यभङ्गिम् ।
मध्यंदिने दिनपतिर्यदधः क्षणं यान् चामीकराण्डकरमां परमां बभार ॥७॥
तस्य प्रिया समुदपद्यत हंसिनीति यस्या वपुर्लवणिमामृतपार्वणेन्दुः ।
लावण्यमप्यविषयः सुरसूरिवाचो वाचोऽप्यधःकृतसितामृतदुग्धधाराः ॥८॥
तयोस्तनूजा जनताप्तपूजास्त्रयोऽभवन् स्वःसरितो यथौघाः ।
पूतामलस्वात्मसु येषु नित्यं मुदा रमन्ते सुमनोमनांसि ॥९॥
समस्ति तेषां धुरि भीमदेवः श्रिया परीतो गुणवद्भयेव ।
प्रज्ञालतां तां हृदयालुतां च चित्रीयते यस्य निशम्य धीमान् ॥१०॥
यः कर्मसद्ग्रन्थविचारचारुचातुर्यधुर्यः श्रितसाधुचर्यः ।
कृत्यैर्द्विरावश्यकतीर्थपार्चामुख्यैर्जनुः स्वं सफलीकरोति ॥११॥
पद्मानुपद्मभिदुरोऽप्यजडाश्रयोऽपि पद्मः प्रबुद्ध इह शश्वदपि द्वितीयः ।
पश्चाद्भवः पुरिसडो वृषनैष्ठिकत्वं यस्याब्रवीत् परिकरः सुकृतं चरिष्णुः ॥१२॥
अन्नत्याक्षियुगे न मंक्षु मिलिते अन्यप्रियालोकनौत्सुक्यं दोषममुष्य मा मम दृशौ मुग्धे ग्रहीष्यामिति ।
नीरङ्गीपिहितास्यया न ददृशे पुंसः परस्याननं, वैदेहीव यया प्रियाऽस्य जयदेव्याख्यऽस्ति पद्मस्य सा ॥१३॥
य इह लवणखेटे मन्दिरं शान्तिनेतुर्व्यरचयदतिरम्यं स्वर्धुनीस्पर्द्धिकेतु ।
स्मृतिपथगमितानंदादिपुंस्कस्य तस्योद्धरणसमभिधस्य श्रावकस्याङ्गजा या ॥ १४ ॥
प्रज्ञावान् विनयी जितेन्द्रियचयः सम्यक्त्वरत्नालयः श्रीतीर्थंकरबन्धुरार्चनगुरूपास्त्येकतानाशयः ।
सत्पात्रेष्वनिदानदानविदुरः श्रेयःश्रिया मेदुरः सूनुः सूनवदुज्ज्वलोल्वणगुणान् धत्ते तयोः साढलः ॥१५॥
क्वचिदपि समयेऽथ साढलोऽयं द्वयधिकदशामलभावनापरागे ।
निजहृदयसरोरुहीतिचिन्तामधुकरिकां विनिवेशयांबभूव ॥१६॥

मोक्षे सौख्यं निरवधि स तु प्राप्यते कर्मनाशाच्चारित्रेणायमपि सुविदस्तच्च स्वाज्ञानहानेः ।
तद् दुःसद्रोर्विमलसलिलाभ्यर्णगपूर्णालवालं, दोषाणां वा क्षय इव रुजां कारणं ही समेषाम् ॥१७॥
तस्याऽऽमूलनिर्मूलनोज्ज्वलबलं श्रीतीर्थराजां वचस्तस्यावश्यकमादिमं दुरधिगं निर्युक्तिमेतद् विना ।
साऽप्येवं विवृतिं विनाऽपि निपुणैस्तांल्लख्यते चेदसौ, पारंपर्यवशाद् वशंवदमिदं शर्मात्मनः स्यात्तदा ॥१८॥
इति मनसि विविच्य रुच्य(भव्य ?)मावश्यकविवृतेः प्रथमं स एष खण्डम् ।
त्रिशतयुतदिनाधिनाथरोचिःपरिमितसंवति १३०० लेखयांबभूव ॥१९॥

ततः—

चान्द्रे कुले श्रीजिनवल्लभोऽभूत् सूरिस्ततः श्रीजिनदत्तसूरिः ।
तत्पट्टपूर्वाचलहेलिकेलिः कलौ दिदीपे जिनचन्द्रसूरिः ॥२०॥
तदनु दनुजकल्पानल्पदुर्वादिजल्पाविरलगरलमूर्च्छाछेदपेयूषजूषः ।
स्वपरसमयसारोदन्वतः पारदृश्वाऽजनि जिनपतिसूरिर्नम्रनिःशेषसूरिः ॥२१॥
तत्पदसरोजन्मा जन्मामलच्छदवृत्तयः प्रवचनमलंकुर्वन्ति श्रीजिनेश्वरसूरयः ।
व्यतरदजरद्भक्त्या तेभ्यः स पुस्तकमुत्तमं तदिह सुतरामेवंकारं भवेदुपयोगवत् ॥२२॥
ककुभमपरां दूरं राज्ञि प्रसाधयितुं गते प्रवरविभया नक्षत्रौघं सदंबरमंडले ।
उदयकटकालंबी सूरः स्वहेतिभिरस्तयन्नुदयमयते यावत्तावत्तमः स्यतु पुस्तकः ॥२३॥छ॥

॥ प्रशस्तिः समाप्ता ॥

क्रमाङ्क ११३

आवश्यकवृत्ति द्वितीयखंड पत्र. ३१० । **भा.** प्रा. सं. । **क.** आचार्य मलयगिरि । **ले. सं.** अनु. १३ मी शताब्दी । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३२॥।×२॥.

क्रमाङ्क ११४

आवश्यक लघुवृत्ति पत्र. ३०१ । **भा.** सं. । **क.** तिलकाचार्य । **ले. सं.** अनु. १४ मी शताब्दी । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३०॥×२॥।.

पत्र—१, ९, १२, १३, ३६, ४१, ४३, ४८, ५०, ५६ थी ५८, ६६, ६९, ७०, ७२, ७४, ७८, ९०, ९४, ९९, ११३, १२४, १२९ थी १३१, १३३ थी १३५, १३७, १४० थी १४२, १४४ थी १४६, १५७, १६१, १६७, थी १६९, १७२, १७९, १९१, २०१, २०३ थी २०९, २१२ थी २१४, २२३ थी २२७, २२९ थी २३०, २३२ थी २३५, २३९, २४१, २४२, २४५ थी २४७, २५३ थी २६१, २७१ थी २७३, २७६, २७८, २८२, २९३, २९४, २९७ थी २९९ नथी ।

यो मन्दरागेण न मन्थितोऽपि न वा नरैः क्वाऽपि विलंघितोऽपि ।
यं नालुलोके प्रमदोल्करामो महोदधिः सोऽस्त्युपकेशवंशः ॥ १ ॥
तस्मिन् साधुजगद्धरः समजनि क्षेमन्धराङ्गोद्भवः, श्रीपार्श्वस्य निकेतनं क्षितिगतस्वःसद्मसद्मभ्रमम् ।
सर्वाङ्गीणपरिष्कृतीश्च वसुना स्वीयेन योऽचीकरन्मध्येजेसलमेरु चित्रमथवा किं तादृशां दुष्करम् ॥ २ ॥
औदार्यमुख्यगुणसंहतिलक्षणानां पौरस्त्यलक्ष्यमभवद् भरतावनीषु ।
यो जङ्गमः किमपरं मरुमण्डलेऽभूत्तद्वासिजन्मिसुकृतैर्ववत कल्पशाखी ॥ ३ ॥
रामस्य सीतेव सतीव शम्भोर्मधुद्विषः श्रीरिव रेवतीव ।
बलस्य जायाऽजनि सज्जनाऽस्य प्रसिद्धियुक् साढलहीति नाम्ना ॥ ४ ॥

समजनि वत तस्य विश्वशस्यास्तनयवरास्त्रितये जगद्वयस्याः ।
सुनृपपरतयाऽतिवैभवत्वात् सुभगतयाऽङ्गभृतो नृपार्थकामाः ॥ ५ ॥
तदादिरभवद् यशोधवल उज्ज्वलोर्जस्वलो, यशोधवल उच्चकैर्लसति यस्य विश्वावने ।
यदीयकरकल्पभूरुहविपूर्णकामा नरा विदन्ति मरुमण्डलं निपतितं दिवः खण्डलम् ॥ ६ ॥
द्विःषोडाऽऽवश्यकविधिमथो तीर्थपार्चा निरर्चा, साधूपास्तिं तत इतरदेशागतश्राद्धभुक्तिम् ।
दानं गुप्तिस्थितनृषु ततो मोक्षणं चैव तेषां, यस्यावश्यं रचयत इदं यान्ति घस्राः सहस्राः ॥ ७ ॥
तदनु भुवनपालः प्रीतदिक्चक्रवालः सुगुरुजिनपतीशस्तूपसाश्चर्यकार्यम् ।
विघटितमपि दिष्ट्या कारयामास योऽयं जिनपतिरथयानं चक्रवर्तीव पद्मः ॥ ८ ॥
तार्त्तीयीक उदारतैकवसतिर्गाम्भीर्यपाथःपतिः, स्वच्छात्मा सहदेव आर्हतमतप्रोत्सर्पणोद्यन्मतिः ।
यस्य स्वं शुभपात्रतां प्रथयतेऽनेहस्त्रयेऽपि स्फुटं, पात्रत्राभवदंकुरः शुभतरोः पूर्वार्जितैस्तैः कृतम् ॥ ९ ॥
श्रेयोमूर्त्तेः स्फुरति यशसः सुन्दरी धर्मपत्नी, लज्जासज्जा प्रियसहचरी हन्त यस्याः प्रशस्या ।
अश्रान्तं प्रत्ययवयमलङ्कारिका शीललक्ष्मीरालीमुख्या यदि परममूर्लौकिकाचारकृत्यैः ॥ १० ॥
य इह लवणखेटे मन्दिरं शान्तिनेतुर्व्यरचयदतिरम्यं स्वर्धुनीस्पर्द्धिकेतु ।
स्मृतिपथगमिताऽऽनन्दादिपुंस्कस्य तस्योद्धरणसमभिधस्याऽऽनन्दना नन्दना या ॥ ११ ॥
तयोस्तनूजो नेमिकुमारः प्रथमः शिशुरपि तनुजितमारः ।
विनयगभीरिमधीरिमसिन्धुः परिमलमथकेम्बुजेव बन्धुः ॥ १२ ॥
द्वैतीयीकोऽजनि गणदेवः सुगुरुपदाम्बुजविरचितसेवः ।
शैशव एव प्रवरविवेकस्तादृगुभयकुलजोऽपरथा कः ॥ १३ ॥
वैराग्यकन्दलसमुज्ज्वलचित्तवृत्तिः श्रीमज्जिनेश्वरगुरोः क्रमपङ्कजान्ते ।
प्रव्रज्य शैशववयस्यधिगूर्जरत्रं तन्नन्दना प्रचुरवैभवडम्बरेण ॥ १४ ॥
गृहे सरस्वती नाम्ना व्रते चारित्रसुन्दरी ।
तपस्यति शिवायैषा दुर्लभं हि तदन्यथा ॥ १५ ॥

इतश्च—

सप्तक्षेत्र्यां निहितविभवा वैभवेऽप्यस्तमाना, मानत्यक्तस्वपरजनतास्वौचितीवर्यचर्या ।
उच्चैःशब्दं क्वचिदपि मनाक्केनचिन्नादधानाऽप्युच्चैः शब्दं प्रतिपदमिता धर्मकर्मैकताना ॥ १६ ॥
क्वचिदपि समये च सुन्दरीयं द्व्यधिकदशामलभावनापरागे ।
निजहृदयसरोरुहीतिचिन्तामधुकरिकां विनिवेशयाम्बभूव ॥ १७ ॥
मोक्षे सौख्यं निरवधि सकः प्राप्यते कर्मनाशाच्चारित्रेणाऽयमपि सुविदस्तच्च स्याऽज्ञानहानेः ।
तद् दुःखद्रोर्विमलसलिलाभ्यर्णपूर्णालवालं, दोषाणां वा क्षय इव रुजां कारणं ही समेषाम् ॥ १८ ॥
तस्यामूलनिमूलनोज्ज्वलवचः श्रीतीर्थराजां वचस्तस्याऽऽवश्यकमादिमं दुरधिगं निर्युक्तिमेतद्विना ।
साऽप्येवं विवृतिं विनाऽतिधिषणैस्तल्लेख्यते चेदसौ, पारम्पर्यवशाद्वशंवदमिदं शर्मात्मनः स्यात्तदा ॥ १९ ॥
स्थैर्यं मेरुगिरेर्गभीरिमरमां सिन्धोर्विधोः सौम्यतां, तेजस्वित्वमहःपतेः सुकवितां काव्याद् गुरोर्वाग्मिताम् ।
रूपं पुष्पशरात् स्वरं जलधरादादाय सृष्टिं स्वकामेकत्रोपगतामिवेक्षितुमना यस्मिन् विधाता व्यधात् ॥२०॥
इति झटिति सदक्षरौघमावश्यकविवृतेरपरं विलेख्य खण्डम् ।
सुविहितयतिनायकाय साऽस्मै स्वगुरुजिनेश्वरसूरये व्यतारीत् ॥ २१ ॥
यावत् क्षोणीमृगाक्षी सलिलनिधिमहानीलनीलान्तरीपा
कालिन्दीवेणिवल्लिः सुरपथसरिदामुक्तमुक्ताकलापा ।

ज्योतिर्विस्तारितारामबरनलभरितश्यामरम्योन्तरीपा,
स्वर्णोर्वीभृत्किरीटा वहति जनशिशून् पुस्तकस्तावदास्ताम् ॥ २२ ॥ छ ॥

क्रमाङ्क ११५

आवश्यकलघुवृत्ति पत्र ३२२। **भा.** सं.। **क.** तिलकाचार्य। **ले. सं.** अनु. १५ शताब्दी उत्तरार्ध [धरणाक लेखित?]। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१॥।×२।.। पत्र ९३, २९५, ३२१ नथी।

क्रमाङ्क ११६

विशेषावश्यकमहाभाष्य पत्र २८४। **भा.** प्रा.। **क.** जिनभद्रगणि क्षमाश्रमण। गा. ४३००। **ले. सं.** अनु. १० शताब्दी पूर्वार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १६॥×२.

अन्त—

सव्वाणुयोगमूलं भासं सामाइयस्स [सोतूणं]।
होति परिकम्मियमती जोग्गो सेसाणुयोगस्स ॥
पच सता इगितीसा सगणिवकालस्स वट्टमाणस्स।
तो चेत्तपुण्णिमाए बुधदिण सातिम्मि णक्खत्ते ॥
रज्जाणुपालणपरे सी[लादि]चम्मि णरवरिन्दम्मि।
वलभीणगरीए इमं महदि [सिरि]संतिजिणभवणे ॥
॥ गाथाग्रं चत्तारि सहस्साणि तिण्णि सताणि ॥

क्रमाङ्क ११७

विशेषावश्यकवृत्ति अपूर्ण पत्र ३४०। **भा.** सं। **क.** कोटयाचार्य। **ले. सं.** अनु. १५ शताब्दी उत्तरार्ध। [धरणाक लेखित]। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१×२॥.। पत्र १४१, ३०८, ३१२, ३१६, ३१७, ३२३, ३२९–३३१, ३३७, ३३८ नथी।

क्रमाङ्क ११८

✓**विशेषावश्यकवृत्ति प्रथमखंड** पत्र ३३५। **भा.** सं.। **वृ.** मलधारी हेमचंद्रसूरि। **ग्रं.** १४०००। **ले. सं.** अनु. १५ मी शताब्दी उत्तरार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३॥×२॥.

पत्र १मां भगवान महावीरनुं परिकर सहित अति सुंदर चित्र छे अने पत्र २मां व्याख्यान करता आचार्य अने सांभळता श्रोताओनुं सुंदर चित्र छे।

क्रमाङ्क ११९

विशेषावश्यकवृत्ति द्वितीयखंड पत्र ३२५। **भा.** सं.। **वृ. क.** मलधारी हेमचंद्रसूरि। **ग्रं.** १४०००। र. सं. ११७५। **ले. सं.** १४८८। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३।२॥

अन्त—

शरदां च पंचसप्तत्यधिकैकादशशतेष्वतीतेषु। कार्त्तिकसितपंचम्यां श्रीमज्जयसिंहनृपराज्ये ॥११॥
श्रेष्ठिवीरकसत्पुत्रश्रेष्ठिवेल्लकसंज्ञयोः। शय्यातरयोर्गेहेऽसौ वृत्तिर्निष्पत्तिमागता ॥१२॥छ॥
॥श्रीः॥ शुभं भवतु श्रीसंघस्य ॥छ॥

॥५०॥ नवां नवां योऽनुकलं बिभर्त्ति श्रियं श्रयत्सेवकदित्सयेव।
स वः सदा श्यामतनुः शिवाय श्रीस्तंभनः पार्श्वजिनः शुभाय ॥१॥

श्रीमालाकलिते सुपुण्यपुरुषे श्रीमालवंशोत्तमद्रंगे कोटिकगोत्रनामविशदप्रासाद आभासते ।
तत्राभूत् कलशोपमः सुकुशलानन्दप्रदानक्षमः साधुः श्रीचिणलाभिधोऽतिविमलः सद्वृत्तशोभावहः ॥२॥
तेजाभिधः प्रादुरभूत् सतेजास्ततोऽब्जिनीनाथ इवोदयाद्रेः ।
मुदं महर्षिष्वपि यो दधानः सच्चक्रकष्टान्यभितो जघान ॥३॥
तज्जन्योऽजनि यो जगन्निजभुजद्वैतार्पणार्थार्पणोद्भूतस्फीतहरावदातसुयशाः शीतांशुकान्त्या तथा ।
चक्रे निर्मलमुज्ज्वलः समभवन् भावा यथा दुर्धियां कालुष्यान्मलिनात्मनामपि कृती हाजीति सुश्रावकः ॥४॥
अचीकरत् श्रीजिनचन्द्रसूरिगुरोः पदस्थापनमादरेण ।
श्रीगौतमस्येव हरिर्महर्द्ध्या स शोभते श्राद्धवरोऽत्र हाजी ॥५॥
तन्नन्दनः फम्मणनामधेयस्तीर्थेशपूजार्जितभागधेयः ।
मेरास्थितोऽप्यम्बुधिवद् भुवं यो व्यापत् स्वपूरैः कुतुकं स आसीत् ॥६॥
रूपादे गेहिनी तस्य रूपसौंदर्यशालिनी । अजायत सदाचारा हरेः पद्मेव देहिनी ॥७॥
गुरूपदेशामृतपूर्णकर्णः सर्वज्ञपूजाप्रवणः सकर्णः । तयोस्तनूजोऽजनि डूंगराख्यः स्ववंशशृंगारकरोऽतिदक्षः ॥८॥
तद्गेहिनी चाहिणिदेवी नाम्ना गंगेव गौरा जिनपादलीना ।
पद्माभिरामा वरकंकणाढ्या सुश्राविकाऽभूज्जगति प्रसिद्धा ॥९॥
तदुदरनदसंभूतं भ्रमरहितं सर्वदा लसत्कोशम् । वलिराजोदयराजांवुजयुग्मं जयति सश्रीकम् ॥१०॥
साधुश्रीवलिराजस्य तारादेवीति वल्लभा । समस्ति सुगुणाधारा हारयष्टिरिवामला ॥११॥
धौरेयको धर्मधुरामिवोर्वी वोढुं विनीतौ तनयौ तदीयौ ।
विराजतस्तत्र तु देवदत्तो मुख्यो द्वितीयः किल रत्नपालः ॥१२॥
उदारोदयराजस्य जाया शृंगारदेऽभिधा । विमलाऽपीन्दुलेखेव चित्रं वक्रा न या क्वचित् ॥१३॥
पुत्रौ तदीयावपि सच्चरित्रौ शुभावुभौ स्तः सुगुणैः पवित्रौ ।
पूर्वस्तयोः श्रावकपासवीरो द्वितीयको राजति राजपालः ॥१४॥
इत्यादिपरिवारेण सहितो हितमानसः । वलिराजश्चिरं धर्मकृत्यानि कुरुते भुवि ॥१५॥

इतश्च—

अस्ति स्वस्तरुसन्निभः सुमनसामाधारभूतो लसत्पात्रश्रेणिविभूषितोऽतिविततो नीरंध्रसच्छायकः ।
श्रीमच्चन्द्रकुलालवालकलितः श्रीवीरतीर्थावनीसंप्राप्तोन्नतिरुत्तमः खरतरो गच्छो गणानां गुरुः ॥१६॥
आसंस्तत्र जिनोदयाः सुगुरवः संप्राप्तभव्योदयास्तेभ्यः श्रीजिनराजसूरियतयो राजेंद्रचक्रांचिताः ।
तत्पट्टोदयशैलशृंगमभितोऽप्याक्रम्य सूर्या इव भ्राजन्ते जिनभद्रसूरिगुरवस्ते वोधयन्तो जगत् ॥१७॥
प्राग् ज्ञानं तदनन्तरं किल दया वागार्हतीति स्फुटा न ज्ञानेन विना क्रियाऽपि सफला प्रायो यतो दृश्यते ।
तत् स्यात् संप्रति पाठतः स च पुनः स्यात् पुस्तकाधारतस्तस्मात् पुस्तकलेखनेन मुनिषु ज्ञानं प्रदत्तं भवेत् ॥१८॥
ज्ञानं सर्वसुखप्रदं च ददता साधुव्रजायाभयं दत्तं येन ततो भवेदधिगमस्तत्त्वस्य तत्त्वाच्छमः ।
शान्तो वैरविवर्जितः स निरारिर्निर्द्वेषिणो नो भयं तस्माल्लेखयत श्रुतं भुवि जनाः! यूयं विधायाऽऽदरम् ॥१९॥
निपीय तेषामिति वाक्सुधौघं सवान्धवः श्रीवलिराजनामा ।
अलीलिखच्छ्रीश्रुतपुस्तकानि स्फुरद्यशांसीव निजानि मन्ये ॥२०॥
व्यतीते विक्रमादष्टाष्टाब्धीन्दु १४८८ मितवत्सरे । विशेषावश्यकव्याख्यांत्यखंडं लेखितं मुदा ॥२१॥छ॥

॥ श्रीः ॥ शुभं भवतु ॥छ॥

अन्त—

ओघनिर्युक्तिटीका समाप्ता ॥छ॥ कृतिराचार्य**द्रोण**स्येति ॥छ॥छ॥

संवत् १२८९ वर्षे फाल्गुन शुदि ४ सोमे **स्तंभ**तीर्थनगरनिवासिना श्री**श्री**मालवंशोद्भवेन ठ. **साढा**-सुतेन । ठ. **कुमरसिंहेन** सूत्रमिश्रा **ओ**घनिर्युक्तिवृत्तिर्लेखयांचक्रे ॥छ॥छ॥ शुभं भवतु चतुर्विधश्रीश्रमणसंघस्य ॥छ॥छ॥ मंगलं महाश्रीः ॥छ॥छ॥ मंगलमस्तु ॥छ॥छ॥

क्रमाङ्क १२५

ओघनिर्युक्तिवृत्ति पत्र २३४ । **भा.** प्रा. सं. । **क.** द्रोणाचार्य । **ले. सं.** अनु. १३ मी शताब्दी उत्तरार्द्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३३।×२.

क्रमाङ्क १२६

ओघनिर्युक्ति वृत्तिसह पत्र २३३ । **भा.** प्रा. सं. । **वृ. क.** द्रोणाचार्य । **ले. सं.** अनु. १३मी शताब्दी पूर्वार्ध । **संह.** मध्यम । **द.** श्रेष्ठ । **लं. प.** ३२॥×२.

क्रमाङ्क १२७

पाक्षिकसूत्र वृत्ति सह पत्र ६८ । **भा.** प्रा. सं. । **वृ. क.** यशोदेवसूरि । **ग्रं.** २७०० । **र. सं.** ११८० । **ले. सं.** १४८८ [धरणाक लेखित?] । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३४।×२।. । पत्र १, ११, १८ नथी ।

अन्त—

संवत् १४८८ वर्षे आषाढ सुदि १५ रवौ **पा**क्षिकवृत्तिः समाप्ता ॥

क्रमाङ्क १२८

पाक्षिकसूत्र वृत्ति सह पत्र ८९ । **भा.** प्रा. सं. । **वृ. क.** यशोदेवसूरि । **र. सं.** ११८० । **ले. सं.** अनु. १५ मी शताब्दी । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३३।×२।.

क्रमाङ्क १२९

पाक्षिकसूत्र वृत्तिसह पत्र ८४ । **भा.** प्रा. सं. । **वृ. क.** यशोदेवसूरि । **र. सं.** ११८० । **ले. सं.** अनु. १५ मी शताब्दी उत्तरार्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं प.** ३२॥×२।. । पत्र ५७, ५८ नथी ।

आ प्रति तत्काळ कोइ कारणसर खवाइ जवाने लीधे के भांगी जवाथी तेने कोई कळाधरे काळजी पूर्वक सांधीने पुनः तैयार करी छे, तेथी आ प्रति विशिष्ट प्रकारे **सं**धाती प्रतिओना किंमती दर्शनीय नमूनारूप छे ।

क्रमाङ्क १३०

आवश्यकनिर्युक्ति अपूर्ण पत्र १४० । **भा.** प्रा. । **क.** भद्रबाहुस्वामी । **ले. सं.** अनु. १२ मी शताब्दीनुं पूर्वार्द्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १२॥×२

पत्र १ थी ७, ९ थी १४, १६, १७, २१, २२, २४, २६, २९, ३१, ३७, ३८, ४०, ४१, ४३ थी ४५, ५३, ५७, ५९, ६१, ६३, ६४, १२६, १३८, १३९ नथी ।

क्रमाङ्क १३१

आवश्यकनिर्युक्ति पत्र १४१ । **भा.** प्रा. । **क.** भद्रबाहुस्वामी । **ले. सं.** ११६६ । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १३।×२.

(२) **वंदनकसूत्रचूर्णी अपूर्ण** पत्र ६०-८१। **भा.** प्रा.। **क.** यशोदेवसूरि।

(३) **प्रत्याख्यानस्वरूपप्रकरण टबक** पत्र १४७-१५२। **भा.** प्रा.। **क.** यशोदेवसूरि। **गा.** २५० थी ३२९। **ले. सं.** अनु. १४ मी शताब्दी प्रारंभ। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४।×२।.

क्रमाङ्क १४०

(१) **चैत्यवंदनासूत्रचूर्णी** पत्र ६३। **भा.** प्रा.। **क.** यशोदेवसूरि। **ग्रं.** ८४०। **र. सं.** ११७४।

अन्त—

॥ संवत् ११७४ वर्षे॥ अमुकदिने चैत्यवंदक चूर्णी कृता लिखि॥ (?)

(२) **वंदनकसूत्रचूर्णी** पत्र १-४८। **भा.** प्रा.। **क.** यशोदेवसूरि। **ग्रं.** ७०७।

(३) **इरियावहियादंडकचूर्णी** पत्र ४८-५८। **भा.** प्रा.। **क.** यशोदेवसूरि। **ग्रं.** १५०।

(४) **प्रत्याख्यानस्वरूपप्रकरण गाथाबद्ध** पत्र ५८-८४। **भा.** प्रा.। **क.** यशोदेवसूरि। **गा.** ३२९। **ग्रं.** ४००। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५×२

क्रमाङ्क १४१

(१) **चैत्यवंदनासूत्रवृत्ति** पत्र १-२८। **भा.** सं.। **क.** श्रीचंद्रसूरि। **ग्रं.** ५४०।

(२) **वंदनकसूत्रवृत्ति** पत्र २८-६६। **भा.** सं.। **क.** श्रीचंद्रसूरि।

(३) **प्रत्याख्यानसूत्रवृत्ति** पत्र ६६-७९। **भा.** सं.। **क.** श्रीचंद्रसूरि। **ग्रं.** ९२० त्रणेना।

(४) **श्राद्धप्रतिक्रमणसूत्रवृत्ति** पत्र ८०-१८२। **भा.** सं.। **क.** श्रीचंद्रसूरि। **ग्रं.** १९५०। **र. सं.** १२२२। **ले. सं.** अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १७॥×२

आ प्रतिमां जीर्ण थयेल अंतनां पानां सं. १६३५ मां नवां उमेरेलां छे.।

अन्तनी नवी पुष्पिका—

॥ संवत् १६३५ वर्षे आषाढ सुदि नवम्यां पूर्णतां प्रापितं पत्रमदः प्रांतिमं श्रीजिनमाणिक्यसूरिपट्टांभोजभास्करश्रीश्रीश्रीजिनचंद्रसूरि[भट्टार]कैरिति श्रुतभगवद्भक्तये ॥श्रीः

क्रमाङ्क १४२

चैत्यवंदनादिविवरण अपूर्ण पत्र ५४। **भा.** सं.। **ले. सं.** अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १३॥।×२।.। पत्र ३८, ३९, ४३, ४५-४८, ५१ नथी।

आदि—

रागाद्यरातिविजयाप्तजिनाभिधानं देवाधिदेवमभिवंद्य निराकृताघः।
तच्चैत्यवंदननियुक्तमशेषसूत्रं शक्रस्तवादि विवृणोमि यथावबोधं ॥

सत्यं संति नयप्रमाणविषयक्षोदक्षमाः पंजिकाः सूत्रस्यास्य चिरंतनैः कविवृषैर्बुधाः परं भेदवान्।
नानासूरिनिमित्तकोऽपि विविधो मे संप्रदायोऽस्ति यत्प्रायस्तस्य निवेदनं परकृतौ कर्त्तुं तु नो शक्यते ॥

तस्मादेष समारम्भस्तत्प्रकाशाय युक्तिमान्। पूर्वसूरिभिरप्येवं रचिता वृत्तयः पृथक् ॥
नानंतार्थमिदं सूत्रं व्याख्यातं पूर्वसूरिभिः। नियतार्थप्रकाशेऽतो नोपालंभोऽस्ति कोऽपि नः ॥
साधुश्रावकयोरत्र न विशेषोऽस्ति कश्चन। क्वचित्सूत्रे क्रियायां च विशेषः साधुगोचरः ॥

क्रमाङ्क १४३

तस्यान्तेवासिना रुब्धा श्रीयशोदेवसूरिणा । सुशिष्यपार्श्वदेवस्य साहाय्यात् प्रस्तुता वृत्तिः ॥४॥
श्रुतोपयोगोऽशुभकर्मनाशनो विपक्षभावप्रतिबन्धसाधनः । परोपकारश्च महाफलावहो विचिन्त्य चैतद्विहितोऽयमुद्यमः ॥५
पिण्डविशुद्धिप्रकरणवृत्तिं कृत्वा यदवाप्तं मया कुशलम् । तेनाऽऽभवमपि भूयाद्भगवद्वचने ममाभ्यासः ॥६॥
श्रुतहेमनिकषपट्टैः श्रीमन्मुनिचन्द्रसूरिभिः पूज्यैः । संशोधितेयमखिला प्रयत्नतः शेषविबुधैश्च ॥७॥
ग्रन्थाग्रं २८०० ॥छ॥ ग्रन्थाग्रं प्रतिवर्णतो गणनया न्यूनं सहस्रत्रयं शतद्वयेनेति । षड्वाजींदुहिमांशुभिः ११७६ परिमिते वर्षे गते विक्रमान्निष्पन्नेयमिति ॥छ॥

पश्चाल्लिखिता—

संवत् १३९४ वर्षे माघ शुदि ११ दिने सा. नयणाश्रावकपुत्रेण श्रीदेवगुर्वाज्ञाचिन्तामणिभूषितमस्तकेन सा. खेलश्रावकेण मौल्येनादाय श्रीजिनपद्मसूरीणां पिण्डविशुद्धिवृत्तिपुस्तिका प्रत्यलाभि ।

क्रमाङ्क २०६

प्रवचनसारोद्धार वृत्तिसह पत्र ४३८ । **भा.** प्रा. सं. । **मू. क.** नेमिचन्द्रसूरि । **वृ. क.** सिद्धसेनगणि । **ग्रं.** १८००० । **वृ. र. सं.** १२४२ । **ले. सं.** १२९५ । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३२॥×२॥.

पत्र २ जामां भगवान् महावीरनुं पारिपार्श्विकसहित चित्र छे, पत्र ४३६ मां देवीनुं चित्र छे अने पत्र ४३७ मां आचार्य शिष्यने वाचना आपे छे। आ त्रणेय चित्रो अतिसुंदर छे ।

अन्त—श्रीप्रवचनसारोद्धारवृत्तिः समाप्ता ॥छ॥छ॥छ॥

इषुग्रहरविसंख्ये [१२९५] श्रीविक्रमनृपतिवत्सरे पौषे । शुक्लाष्टम्यां गुरुवारे लिखिताऽसौ प्रतापसिंहेन ॥
॥छ॥ मंगलं महाश्रीः ॥छ॥छ॥ शिवमस्तु ॥छ॥
श्रियं पुष्णन्तु वः शान्तेः पादांबुरुहरेणवः । कर्मद्रुन्मूलने विश्वे मदोन्मत्तकरेणवः ॥१॥
कल्याणैकनिकेतनं सुमनसां वासो गुरुष्वग्रणीः सेव्यः पुण्यजनैः प्रतीतधनदैर्गोत्रेषु जातोन्नतिः ।
यः सानुग्रहसूरसौम्यकविभिस्तेजस्विभिः सेवितः सोऽयं मेरुरिवास्ति नन्दनवरः प्राग्वाटनामान्वयः ॥२॥
तत्राऽऽसीद् वैरसिंहः सकलजनमनःकल्पनाधिक्यदानाज्जेता कल्पद्रुमस्य प्रतिदिवसमसौ भग्नदारिद्र्यमुद्रः ।
नीरक्षीरोदताराशशिविशदतरैः पूरिते यद्यशोभिर्लक्ष्यन्ते नैव भावास्त्रिभुवनकुहरे नीलपीतादयस्ते ॥३॥
तस्य सूनुरनूनश्रीः सीहकोऽभूद्विवेकधीः । स्पर्द्धयेव व्यवर्द्धन्त गुणाः सर्वे परस्परम् ॥४॥
भार्या सुषमता तस्य शस्यशीलव्रताऽभवत् । मण्डनं हि कुलस्त्रीणां शीलमेव विदुर्बुधाः ॥५॥
सिंहशाव इवोर्जस्वी तेजस्वी भानुमानिव । यशस्वी सकले विश्वे जगत्सिंहस्तयोः सुतः ॥६॥
जगत्सिंहस्य जायाऽस्ति मायावंचविवर्जिता । नागिनी नागवल्लीव प्रसृता पुत्रपत्रकैः ॥७॥

तथाहि—

चंडांशुप्रौढतेजाः स जयति सुकृती चण्डसिंहाभिधानो, जीयात् सामंतसिंहो नयविनयकलालंकृतिस्तु द्वितीयः ।
तार्तीयीकोऽरिसिंहः सकलजनमनोहारि चारित्रपात्रं, पुत्राश्चैते पवित्राः शशिविशदयशोराशिभिर्भासिताशाः ॥८॥
लाघुका लूणदेवीति तथा शृङ्गारदेविका । धर्मकर्मरताः पुत्र्यस्तयोस्तिस्रः क्रमादिमाः ॥९॥
चण्डसिंहस्य भार्याऽस्ति पद्मलेत्यभिधानतः । प्रतापसिंहस्तत्पुत्रः पुत्री धांधलदेविका ॥१०॥
आद्या प्रतापसिंहस्य भार्या पृथिविदेविका । प्रतापदेवीत्यपरा तस्यास्ति प्रथिता पुनः ॥११॥
ख्याता सामंतसिंहस्य पत्नी सहजलाभिधा । तत्पुत्रौ विजयसिंहपूर्नसिंहाविमौ पुनः ॥१२॥
द्वे इमे च तयोः पुत्र्यौ नाल्ह–माधलदेविके । सर्वज्ञचरणाम्भोजसुरभीकृतमानसे ॥१३॥
इतश्चात्रैव वंशेऽभूद् धनपालः स मन्त्रिराट् । यश्चाऽऽत्मसदृशो मेने श्रीदेवानन्दसूरिभिः ॥१४॥

पूनाकस्तनयस्तस्य पुत्रिका लीलुकाभिधा । नाम्ना वउलदेवीति पूनाकस्य सधर्मिणी ॥१५॥
पद्मसिंह-भीमसिंहौ पुत्रौ तत्कुक्षिजाविमौ । तनया च तयोरस्ति गङ्गानामेति विश्रुता ॥१६॥
अरसिंहस्य सा पाणिगृहीती प्रथिता ततः । सीतादेवी सतीरत्नं शीलादिगुणभूषिता ॥१७॥
प्रवाहा इव जाह्नव्याः पुरुषार्था इवाङ्गिनः । तत्कुक्षिसरसीहंसास्त्रयः पुत्रा जयन्त्यमी ॥१८॥
आद्यः कुमरसिंहाख्यो द्वितीयः पेथडाभिधः । सोमसिंहस्तृतीयोऽयं सर्वेऽपि गुणशालिनः ॥१९॥
सूमला वीण्हुका चैव राणिका चांपला तथा । सन्ति पुत्र्यश्चतस्रोऽपि विनयादिगुणान्विताः ॥२०॥
प्रिया कुमरसिंहस्य नाम्ना सूहवदेविका । अस्ति नायकदेवीति पेथडस्यापि गेहिनी ॥२१॥
श्रीमन्माणिक्यसूरीणां वचनामृतमन्यदा । सुधीः कुमरसिंहोऽयं शुश्राव श्रावकाग्रणीः ॥२२॥
तीर्थकरा हि प्रययुः शिवपदमुपदिश्य धर्मतत्त्वानि । सम्प्रति तु तदुपदिष्टं पुस्तकगतमेव जागर्त्ति ॥२३॥
तद् यः खलु लेखयति श्रुतं विशुद्धेन चेतसा मतिमान् । मिथ्यात्वपङ्कमग्नं स एष...............॥२४॥
इत्याकर्ण्य..................................। जनकस्यारसिंहस्य स्वश्रेयोवृद्धये सुधीः ॥२५॥
आवश्यकस्य वृत्तिं वृत्तिं भवभावनाप्रकरणस्य ।.................................॥२६॥ युग्मम् ॥
राजहंसाविमौ यावद्व्योमाभोगसरोवरे । स्वेच्छया क्रीडतस्ताव.......................॥२७॥छ॥

मंगलं महाश्रीः ॥

पश्चाल्लिखित—

संवत् १४८४ वर्षे प्रथमाषाढ सुदि दशमीदिने श्रीस्तंभतीर्थे ठ० विजयसिंहसत्पुत्रेण ठ० वल्लालसुश्रावकेण श्रीप्रवचनसारोद्धारवृत्तिपुस्तकं मूल्येन गृहीतं ॥

क्रमाङ्क २०७

चैत्यवंदनभाष्य संघाचारटीकासह पत्र २६१ । **भा.** प्रा. सं. । **मू. क.** देवेन्द्रसूरि । **टी. क.** धर्मघोषसूरि । **ग्रं.** ७८०८ । **ले. सं.** १३२९ । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३०।×२॥.

नोंध—आ पोथी टीकाकार आचार्य श्रीधर्मघोषसूरिनी पोतानी छे ।

अन्त—

॥छ॥ इति श्री...............रचितायां श्रीसंघाचारटीकायां चैत्यवन्दनाधिकारः प्रथमः समाप्तः ॥छ॥ ग्रन्थाग्रं ७८०८ ॥छ॥ संवत् १३२९ वर्षे पौष वदि १२ भौमेऽद्येह पयरोडग्रामवास्तव्य गूर्जराभिज्ञवालज्ञातीय ठ० चण्डसुत ठ० लक्ष्मणेन लिखितं ॥ इदं पुस्तकं पु............तिलकश्रीधर्मघोषसूरीणां आचंद्रार्कं नंदतु ॥

यदक्षरपरिभ्रष्टं मात्राहीनं च यद् भवेत् । क्षंतव्यं तद् बुधैः सर्वं कस्य न स्खलते मनः ॥१॥
यादृशं पुस्तके दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥२॥

शुभं भवतु सकलसंघ..................

क्रमाङ्क २०८

पंचाशकप्रकरण वृत्ति पत्र २६२ । **भा.** सं. । **वृ. क.** अभयदेवाचार्य । **ले. सं.** अनु. १२ मी शताब्दी । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** २५×२.

नोंध—सं० १२०७ मां अजयमेरुना भंग पछी फरीथी आ प्रतिने पूर्ण करवामां आवी छे.

आ प्रतिमां दरेक पंचाशकनी समाप्तिना सूचन तरीके पत्र ४०, ५५, ७१, ८५, १०२, ११३, १२३, १३३, १४३, १५५, १७२, १८६, २००, २१२, २२५, २३७, २४५, २५५, २६२ मां विविध शोभनो छे ।

अन्त—

सप्तोत्तरसूर्यशते विक्रमसंवत्सरे त्वजगमेरौ । पल्लीभंगे त्रुटितं पुस्तकमिदमग्रहीत् तदनु ॥
अलिखत् स्वगमत्र गतं श्रीमज्जिनदत्तसूरिशिष्यलवः । स्थिरचन्द्राख्यो गणिरिह कर्मक्षयहेतुमात्मनः ॥

क्रमाङ्क २०९

पंचाशकप्रकरणवृत्ति पत्र. १८१ । **भा.** सं. । **क.** अभयदेवाचार्य । **ले. सं.** अनु. १३मी शताब्दी । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ३०॥×२॥.

पत्र ३७, ४२, ६२, ८४, ८७, ९५, १२०, १२१, १२८, १३०, १३२–१३५, १५४, १५६, १५७, १५९, १६१–१६५, १६८–१७०, १७२, १७३, १७७, १७९, १८० नथी.

अन्त—

आसीदसीमगुणगौरवरज्यमाननानाप्रकारनरनाथनमस्कृतांह्रिः ।
पंडेरकीयगुरुगच्छशिरःकिरीटमाटीकमानमहिमा भुवि **शान्तिसूरिः** ॥
तस्यांह्रिपङ्कजरजःकणकीर्णभालो व्यालोकिताखिलविलोलभवस्वभावः ।
ख्यातः क्षमी जगति **जेल्लक** इत्यभूत् स वाग्मी वणिग्भणितमुख्यकलासु दक्षः ॥
पत्नी विनीतवनितावलिमौलिरत्नमन्यायजल्पनजडा **जिनदेवि**नाम्नी ।
तस्याऽभवन्नवनवश्रुतसङ्ग्रहैकलीलाविनोदरसिका वसिकानुकामा ॥
पार्श्वनागो यशोनागो वीरनागस्तथाऽपरः ।
इति त्रयस्तयोर्जज्ञुः पुत्राः पात्रं परं श्रियाम् ॥
तिष्ठन्नशेषशमिनां धुरि **वीरनाग**नामाऽनुजः सुजनभूषणमेषु मध्ये ।
लेभे शुचिः सहचरीं **गुणदेवि**संज्ञामज्ञानपातकनिकारकथां यथावत् ॥
धर्मे पथि प्रथितपुण्यमनोविनोदौ तौ दम्पती निपुणपालितशीलसारौ ।
उच्चख्नतुः स्वजनचेतसि शोकशंकुं **प्रद्युम्नशाम्ब**सुतजन्ममहोत्सवेन ॥
तस्याः सदोदितमुदो हृदि दुःखलक्षदावानलोपशमवारिधरोपमानम् ।
[...] भवत्यवितथं कुपथापहारि सारं सुबोधविबुधाहितमुद्वहन्त्याः ॥
जज्ञेऽवज्ञातमानः कृतवितनु[तनु]त्रासहासोऽसमान...तैंकः काललीलावशत इति ततोऽस्या विशुद्धैर्धियश्च ।
निश्चित्यातश्च मृत्युं निकटतममयाचिष्ट शिष्टं पतिं स्वं, श्रेयोऽर्थं जीवशब्दोपपदमिह भवांल्लेखयेत् पुस्तकं मे ॥
ततश्च सुचिरारूढप्रौढधर्मभरः सुधीः । **वेहको** लेखयामास [श्री]पञ्चाशकपुस्तकम् ॥छ॥

पश्चाल्लिखित—

नवांगीवृत्तिकारखरतरगुरुश्रीअभयदेवसूरिकृता **पञ्चाशकवृत्तिः** सम्पूर्णा । **चारित्रसिंहगणि** लि. ॥

क्रमाङ्क २१०

पिंडविशुद्धिप्रकरण सटीक पत्र २०६ । **भा.** प्रा. सं. । **मू. क.** जिनवल्लभगणि । **टी. क.** यशोदेवसूरि । **वृ. ग्रं.** २८०० । **र. सं.** ११७६ । **ले. सं.** अनु. १४ मी शताब्दी उत्तरार्द्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १३॥×२॥.

पत्र १, १९, २१–२४, २७, ३५, ४१–४३, ४७, ६०, ६१–६४, ६८, ७३–७६, ७८–८६, ८८–९०, ९३, १०३, १०४, १०८, १११, ११२, ११४, १२४, १२७, १७७, १८१–१८४, १८६–१९२, १९४, १९५, १९७ नथी.

अन्त— श्रीप्रभावतीमहत्तरासत्कपुस्तिका ॥

क्रमाङ्क २११

पंचाशकप्रकरणलघुवृत्ति अष्टादशपंचाशकपर्यन्त पत्र २६५। **भा.** प्रा.। **वृ.** यशोभद्रसूरि। **ग्रं.** ३९२५। **ले. सं.** ११२१। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२॥×२।.

आदि—

सर्वातिशयसम्पन्नमनादिनिधनस्फुटम्। जैनं.... ... ...विच्छेदचतुरं वचः ॥

स्तुत्यं सरस्वति न .... देवि भूया यस्याः प्रसादवशतो भुवि निर्मलत्वम्।

वाचां भवत्यवितथास्फलितप्रबन्धं विद्वद्भिरर्चितगुणं गुणवद्भिरग्यम् ॥

अन्त—

॥छ॥ **साधुप्रतिमाप्रकरणम्** ॥छ॥छ॥१८॥ ग्रंथमानं ३९२४ ॥छ॥ कृतिरियं श्रीश्वेतांवराचार्ययशोभद्रस्येति ॥छ॥ संवत् ११२१ ज्येष्ठ सुदि ११ वुधदिने जसोधरेण लिखितं ॥छ॥

ससहरकुलम्मि विउले आसि ससहरकरसरिसगुणकलिओ। कलिमलकलंकमुक्को सिरिसूरिजिणेसरो नाम ॥१॥

तस्सऽत्थि सीसपवरो सीसो जिणसासणसाहणेक्कतल्लेसो। जिणचंदसूरिनामो दिणनाहो व्व पसिद्धओ तवसा ॥२॥

अण्णो वि अत्थि पवरो भव्वो भव्वाण वोहणिक्करओ। सिरिअभयदेवसूरी थिरो थेरो इव अत्थि वेयविऊ ॥३॥

तत्तो वि य दढधम्मो धम्मरुई धम्मदेसओऽत्थि मुणी। लद्धुवज्झायपओ सीसो सिरिधम्मदेवो त्ति ॥४॥

अह लाडयम्मि देसे अत्थि पुरं सुद्धजणवयसमिद्धं। नरवइरयणसमुद्दं वडउद्दं जिणहरसमिद्धं ॥५॥

तत्थ य निवसइ सड्ढो सम्मत्तदढो वियड्ढगुणजुत्तो। जीवायपयत्थविऊ धणधण्णसमाउलो विमलचित्तो ॥६॥

णाऊण मच्चलोए अणिच्चयं जोव्वणं धणं धण्णं। अम्मच्चो कयकिच्चो अम्मो णामेण वरसड्ढो ॥७॥

तस्सऽत्थि थिरसहावा भावियभवभावणा विमलचित्ता। संवेयपरा वि तहा अवितहवक्का वि विणयरया ॥८॥

जिणपूयकज्जनिरया निरया गुरुसाहुदाणकज्जेसु। धम्मेसु चेव निरया तवसंजमउज्जुया चेव ॥९॥

दाणमई रूयमई सहावकरुणापवन्नचित्ता वि। जिणवयणभावियमई होल्ला णामेण भज्ज त्ति ॥१०॥

वीमंसिऊण तेणं सह णियजायाइ सम्मभावेण। कयणाणदाणराओ जिणधम्मपवन्नओ पवरो ॥११॥

तत्तो सुअसद्धाए निज्जरहेउ त्ति अ[म्मऽ]मच्चेण। सिरिधम्मएवउज्झायकारणे कलिय कलिकालं ॥१२॥

पंचासयाण वित्ती असुभनिवित्ती य भवविरहकित्ती। सुत्तसहिया वि[लिहिया] विमला वण्णजसकित्ति व्व ॥१३॥

जाव य मेरुस्स सिहा जाव य ससिसूरमंडलपयारो। जाव य गहनक्खत्ता ताव य नंदउ इमं पोत्थं ॥१४॥

सुकयत्थो होइ नरो सुयणाणपयाणओ असंदेहं। लहइ पसंसं लोए ण य आवइभायणं होइ ॥१५॥

णाणेण होइ णाया सव्वपयत्थाण मच्चलोयम्मि। णाणेण पूयणिज्जो सलाहणिज्जो वि लद्धजसो ॥१६॥

णाणं विवेयजणयं णाणं सिवसोक्खकारणं परमं। णाणं जिणवरभणियं णरयगइणिवारणं एक्कं ॥१७॥

णाणं दिंतो वि नरो ण पावए अयसपंकयं कह वि। लंघेइ भवपवंचं सुणाणदाणेण अवियारं ॥१८॥

णाणस्स फलं विरई विरइभावाओ आसवनिरोहो। आसवनिरोह संवर संवरओ होइ तव विउलो ॥१९॥

तवसो फलं च निज्जर निज्जरओ होइ कम्महाणी वि। कम्माण खये जीवो सिद्धो वुद्धो हवइ निच्चो ॥२०॥

क्रमाङ्क २१२

प्रथमपंचाशकप्रकरण चूर्णि सह अपूर्ण पत्र २१०। **भा.** प्रा.। **चू. क.** यशोदेवसूरि। **ले. सं.** अनु. १३ मी शताब्दी उत्तरार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५×२।.

पत्र ७, ८, १२–१४, १७, १९–२५, २७, ३२, ३६, ४१–४७, ५०, ५३–५५, ५७, ५८, ६२, ६३, ६५, ६७, ६९–७१, ७५–७७, ८०, ८१, ८२, ८४, ८६, ८७, ८९, ९४, ९५, १२४, १२५, १६१, १६६, १९९, २०० नथी

क्रमाङ्क २१३

द्रव्यसंग्रह सटीक प्रथमखंड पत्र ६८। **भा.** प्रा.। **क.** नेमिचंद्रसूरि दिगंबर। **ले. सं.** अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १३।।।×२.। पत्र १, ७, ८, २२ नथी।

क्रमाङ्क २१४

(१) उपदेशपदप्रकरणलघुटीका पत्र १९२। **भा.** स.। **टी. क.** वर्धमानसूरि। **ग्रं.** ६५१३। **टी. र. सं.** १०५५। **ले. सं.** १२१२। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २४।।।×२।.। अंत्य पत्रमां शोभन छे।

आदि—

॥५०॥ ॐ नमः सर्वज्ञाय ॥

वन्दे देवनरेन्द्रवृन्दविनुतं स्वर्गापवर्गास्पदं लोकालोकविमर्शिकेवलकरप्रध्वस्तदोषोदयम्।

भव्यांभोरुहपंडमोहमुकुलध्वंसोष्णरश्मि जिनं कर्म्माद्रिद्रुतदारणैककुलिशं श्रीनाभिभूपांगजम्॥

सिद्धं सर्वज्ञसार्वीयं वीरं नत्वा जिनेश्वरम्। उपदेशपदव्याख्यां प्रख्यात्मस्मृतये यते॥

हरिभद्रवचोव्याख्यां कः कुर्याद् यो विचक्षणः। स्वशक्तिमविचार्यैव तथाप्यभ्युद्यतोऽत्र यः॥

इहोपदेशपदाख्यप्रकरणमारिप्सुराचार्यः शिष्टसमयानुसरणाय विघ्नविनायकोपशांतये प्रयोजनाद्यभिधानार्थं चेदं गाथायुगलमाह ॥छ॥ णमिऊण० वोच्छं उव० गाथे॥ तत्राद्यगाथयेष्टदेवतास्तवो वाच्यः, अयं च भावमंगलरूपो वर्त्तते॥ वोच्छं उवएसपए इत्यादिनाऽभिधेयपदमुक्तम्।

अन्त—

येन किन्नाम्नेत्याह। श्रीहरिभद्राचार्याभिधानेन जगद्विश्रुतेन जैनेन्द्रशासनमन्दिरप्रदीपकल्पेन। किमर्थमित्याह। भवः संसारस्तस्य विरहोऽभावस्तमिच्छताऽभिलषता, अन्यत्र किल द्वितीयनाम्ना भवविरहाह्वयोऽप्यसौ सूरिरभिधीयत इति ॥छ॥

सिद्ध्यै संसारभयात् पार्श्विलगणिवचनतः प्रथममेषा। स्नेहादलेखि शीघ्रं मुनिना नन्वाम्रदेवेन॥

कर्मक्षयाय वृत्तिर्यैरेषा वर्णिता यशोविमुखैः। पार्श्विलगणिना तेषां स्तुतिरियमुपवर्णिता भक्त्या॥

प्रशमविजितकोपैर्मार्द्दवन्यस्तमानैः ऋजुगुणहतमायैस्तोषसन्त्यक्तलोभैः।

जिनवचनविचारे नित्यमासक्तयोगैः सुविमलगुणरत्नैर्वर्द्धमानव्रतीन्द्रैः॥

इयमुपदेशपदानां टीका रचिता जनावबोधाय। पञ्चाधिकपञ्चाशद्युक्ते संवत्सरसहस्रे १०५५॥

कृतिरियं जैनागमभावनाभावितान्तःकरणानां श्रीवर्द्धमानसूरिपूज्यपादानामिति ॥छ॥

अक्षरघटनामात्रं सम्यगविज्ञाय यत् कृतं धाष्ट्यात्। गम्भीरपदार्थानामुपदेशानां मया स्मरणहेतोः॥

विद्वद्भिरागमधरैरवधानपरैः परोपकाररतैः। मय्यनुकम्पैकरसैस्तच्छोध्यं मर्षणीयं च ॥छ॥

उपदेशपदटीका समाप्ता ॥छ॥ ग्रन्थाग्रमुद्देशतः सार्द्धा षट्सहस्री ॥६५१३॥छ॥ संवत् १२१२ चैत्र सुदि १३ गुरौ अद्येह श्रीअजयमेरुदुर्गे समस्तराजावलीविराजितपरमभट्टारकमहाराजाधिराजश्रीविग्रहराजदेवविजयराज्ये उपदेशपदटीकाऽलेखीति ॥छ॥ कल्याणमस्तु॥

(२) पंचवस्तुकप्रकरणवृत्ति अपूर्ण पत्र १९३–३५०। **भा.** सं.। **क.** हरिभद्रसूरि स्वोपज्ञ। **ले. सं.** अनु. १२मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं.प.** २४।।।×२।.

पत्र २२२, २२३, २३५, २३६, २३८, २७९, २८८, २९८, २९९, ३०२, ३०६, ३०७, ३०९, ३१२, ३४८ नथी। आ ग्रंथनो प्रारंभ १९३ मा पत्रथी थाय छे।

तत्पत्नी पुण्यिनी नाम्ना, नित्योपार्जितपुण्यका। त्रिभुवनपालधीदा, जज्ञे पुत्रद्वयप्रसूः ॥१३॥
तदाद्यः क्षेमसिंहोऽभूत्, सिंहवत् सज्जितक्रमः। लीलया दलयामास, यः प्रतिपक्षदन्तिनः ॥१४॥
द्वितीयोऽभयचन्द्रोऽस्ति,साधुराजो द्विधा भुवि। द्रव्यतः श्रीपतित्वेन, शिष्टाचारेण भावतः ॥१५॥
श्रीमत्सूरिजिनेश्वरस्वगुरुणा चक्रेशिना तन्वता, यात्रां मोहनरेन्द्रनिग्रहकृते श्रीसङ्घसैन्ये कृतः।
यः सेनाधिपतिः स्वविक्रमनयैस्तद्गृह्यभीतायरीन्, स्वस्वाम्यंह्रितले प्रपात्य तदिमं दासं व्यधात् स्वप्रभोः ॥१६॥
येनात्यद्भुतदानमानविनयैः श्रीतीर्थसङ्घार्च्चनावात्सल्यादिगुणैश्चमत्कृतिकरं श्रीतीर्थयात्रोत्सवम्।
निर्माया नरिनर्त्ति कीर्त्तिवनिता त्रैलोक्यरङ्गाङ्गणे, चन्द्रेऽलेखितमां स्वनामकलशः स्वीये कुले चाटितः ॥१७॥
कर्णेऽभ्यर्णमुपागते सुरपतौ पातालमूलं वलौ, नष्टेष्वत्र कलौ सुरद्रुममुखेष्वन्देषु तुच्छेष्वपि।
पश्यत्यूर्ध्वमधश्च याचकजने दीनानने दुःखिते, तत्पुण्यादुदितो य एव भुवने दाता तदस्मारकः ॥१८॥
कल्पद्रोऽभयचन्द्र! कल्पलतिका ते प्रेयसी लक्ष्मिणी, श्रीधींधाजगसिंहसूरविलसत्तेजोऽभिधानाङ्गजैः।
पुत्रीभ्यामपि पद्मिनीकुमरिकाभ्यां सत्फलैरिष्टदा, स्तात् साचाप्रमुखैर्भवांश्च सुफलैः पौत्रप्रपौत्रादिभिः ॥१९॥

....

[श्रीजिनेश्वरसूरीणां पादांभोजमधुव्रतैः। श्रीदेवमूर्त्युपाध्यायैर्निर्मितैषा प्रशस्तिका ॥२५॥
॥ इति प्रश्नोत्तररत्नमालावृत्ति पु० साधुअभयचन्द्रलेखितायाः प्रशस्तिः समाप्ता ॥]

क्रमाङ्क २१८

(१) **द्वादशकुलक विवरणसहित** पत्र १-१५७। **भा.** प्रा. सं.। **मू. क.** जिनवल्लभसूरि। **वि. क.** जिनपालोपाध्याय। **ग्रं.** ३३६३।

(२) **रत्नचूडकथा विषमपदविवरण टिप्पनक** पत्र १५७-१५८। **भा.** सं.। **ले. सं.** अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ११×३.।

आ प्रति कागळ उपर लखेली छे।

क्रमाङ्क २१९

स्वप्नसप्ततिका वृत्तिसहित अपूर्ण पत्र. ४८। **भा.** प्रा. सं.। **ले. सं.** १४ शताब्दी उत्तरार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १७×१॥.। पत्र ३, ४, ७, १६, १८, २१, २३. २४, २७. २९, ३१, ४५-४७ नथी अने केटलांक पानांना टूकडा थई गया छे।

क्रमाङ्क २२०

उपदेशमाला अवचूरि त्रूटक अपूर्ण पत्र १११। **भा.** सं.। **ले. सं.** अनु. १३मी शताब्दी। **संह** जीर्णप्राय। **द.** श्रेष्ठ। **लं. प.** १३।×१॥

पत्र. ५६, ६६, ६८, ७०-७६, ७८-८०, ८२, ८४, ८६, ८९, ९१, ९२, ९४, ९७, ९८, १०२, १०५-११० नथी।

क्रमाङ्क २२१

(५) **पार्श्वनाथस्तोत्र** पत्र २९-३२। **भा.** सं.। **क.** जिनवल्लभगणि। **का.** १७।

आदि—विनयविनमदिन्द्रं मन्मनोऽम्भोधिचन्द्रं०

अन्त—स खलु निखिले न स्याल्लोकेशराजि न वल्लभः ॥१७॥

॥ इति पार्श्वनाथस्तोत्रम् ॥

(६) **पंचकल्याणकस्तव** पत्र ३२-३५। **भा.** सं.। **क.** जिनवल्लभगणि। **का.** १२।

आदि—प्रीतद्वात्रिंशदिन्द्रोदितविततगुणाधारपुत्रावतारं०

अन्त—स्वःसाम्राज्यादि भुक्त्वा जिनपदसहितं वल्लभं सल्लभन्ते ॥१२॥

॥ पंचकल्याणकस्तवः ॥

(७) **धर्मशिक्षाप्रकरण** पत्र ३५-४३। **भा.** सं.। **क.** जिनवल्लभगणि। **का.** ४०। **ग्रं.** १०५।

अन्त—॥४०॥ चक्रम् ॥ धर्मशिक्षाप्रकरणम् ॥ कृतिर्जिनवल्लभगणेरिति ॥ **ग्रं.** १०५।

(८) **धर्मबिंदुप्रकरण** पत्र ४३-६४। **भा.** सं.। **क.** आचार्य हरिभद्रसूरि।

अन्त—समाप्तं चेदं धर्मबिन्द्वाख्यं प्रकरणं कृतिराचार्यश्रीहरिभद्रस्य ॥छ॥ मंगलं महाश्रीः ॥

क्रमाङ्क २२५

धर्मबिंदुप्रकरण वृत्तिसह पत्र १५५। **भा.** सं.। **मू. क.** हरिभद्रसूरि। **वृ. क.** मुनिचंद्रसूरि। **ग्रं.** ३०००। **ले. सं.** अनु. १३ मी शताब्दी पूर्वार्ध। **संद.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १६×२॥.

अन्त—

इति श्रीमुनिचन्द्रसूरिविरचितायां धर्मबिन्दुप्रकरणवृत्तौ विशेषतो धर्मफलविधिरष्टमोऽध्यायः समाप्तः ॥छ॥
नाविःकर्तुमुदारतां निजधियो वाचां न वा चातुरीमन्येनापि च कारणेन न कृता वृत्तिर्मयाऽसौ परम्।
तत्त्वाभ्यासरसादुपात्तसुकृतोऽन्यत्रापि जन्मन्यहं, सर्वादीनवहावितोऽमलमना भूयासमुच्चैरिति ॥छ॥
इति श्रीमुनिचन्द्रसूरिविरचिता धर्मबिन्दुप्रकरणवृत्तिः समाप्ता ॥छ॥ प्रत्यक्षरं ग्रन्थ ३००० ॥

५० ॥ अर्हम् ॥

सदा नवप्रवालश्रीर्वंशोऽस्त्यूकेशसंज्ञकः। यस्याहार्यस्थितिं दृष्ट्वा कस्य न प्रीयते मनः ॥१॥
देवनागाभिधः श्राद्धस्तत्राऽभूद्धर्मकर्मभूः। तस्याऽपि दूअकनामा तुक् जज्ञेऽथ विरक्तधीः ॥२॥
तस्यापि भुवणिग-सुमति-लूणिग-पद्माभिधाश्च चत्वारः। धर्मार्थकाममोक्षप्रसाधनार्थं ध्रुवं सुता जज्ञुः ॥३॥
महेन्द्रधीदा धणदेवीनाम्नी पत्नी सपत्नीकृतकृष्णकान्ता।
तत्रादिमस्येह यथा वृषस्याऽभूत् सद्गतिः सातनिखातकल्पा ॥४॥
श्रीतीर्थनाथपदपङ्कजभागिभालः संस्फूर्तिकीर्त्तिसितपद्मवनीमरालः।
धैर्यादिलक्षणगुणाऽभयवासशालस्तस्याः सुतः समुदपादि कुमारपालः ॥५॥
द्वितीयः सुमतिनामाऽभूद् यः परीक्ष्य क्षमातले। श्रीमज्जिनपतिं सूरिं गुरुबुद्ध्या न्यषेवत ॥६॥
जगमतगणिनीपुत्री श्रीजिनपतिसूरिभिर्दिदीक्षेऽस्य। पुत्रश्च जिनेश्वरसूरिभिरिह जयसेननामर्षिः ॥७॥
मातृश्रेयोहेतोः कुमारपालः प्रधानपुस्तिकयोः। पञ्चनमस्कारविवरण-धर्मबिन्दुविवृती अलेखयत ॥८॥
अदोद्विपुस्तिकाव्याजाद् भव्यदर्शनशुद्धये। कृते कुमारपालेन सुधाञ्जनशलाकिके ॥९॥

ततश्च—

यत्कीर्त्या धवलीकृते त्रिभुवने कैलासलीलान् नगांच्छ्रीकण्ठानिव तद्गणांस्तत इतः प्रेक्ष्याम्बिका विस्मिता।
रुद्राङ्गं स्वसतीत्वखण्डनभिया त्यक्त्वा हिमाद्रावगात्, तत्रास्यानुपलक्षणाकुलतया ब्रूते हहा किं न्विदम् ॥१०॥
श्रीजिनेश्वरसूरीणां तेषां भक्तिपुरस्सरम्। दत्ते कुमारपालेन ते च द्वे अपि पुस्तिके ॥११॥

उपशमदमयुक्ता सुव्रता शीलरम्या, स्खलितजलधिगर्वा चारुगंभीरिमा च ॥११॥
तस्या जज्ञे तनूजोऽथ, जिल्हणाख्यः समोनिधिः। दयादानकृतोद्योगः, स्थिरधीर्जैनदर्शने ॥१२॥
द्वितीयस्याऽभवद्भार्या, भव्या देवतपुत्रिका। भुवनी भवनिर्विन्ना, शुभभावा जिनार्चिका ॥१३॥
संजाता जिल्हणस्यापि, प्रेयसी रासलाभिधा। तिहुणीनामिका पुत्री, तयोर्जाता गुणान्विता ॥१४॥
अन्यदा भावयामास, देवकी श्राविकाऽथ सा। जिल्हणेन भुवण्या च सहेदं भवविस्तरम् ॥१५॥ यथा—
असारः संसारः पवनचपलं जीवितमिदं, धनं क्षाराम्भोधिप्रचललहरीपूरललितम्।
इमे भोगाः रोगाः कुगतिनिगमा दुःखजनकाः, स्ववंधूनां संगं तरुणरमणीचित्तचटुलम् ॥१६॥
तन्नास्ति जीवलोकेऽस्मिन्, प्रतिवंधो विधीयते। यत्र वस्तुन्यपास्यैकं, जिनधर्मं सनातनम् ॥१७॥
धर्मस्याऽस्य भवंति साधनविधौ यद्यप्युपायाः शुभा, दानाद्या अपरेऽपि कर्ममथकाः संसारविच्छेदिनः।
श्रेष्ठं मुख्यतया तथापि गदितं ज्ञानं तु तेषां जिनैर्येनेदं प्रविलोक्यते सुकृतिभिः सर्वं त्रिलोकीतलम् ॥१८॥
यतः—
ज्ञानं मोहमहामहीधरशिरःसंक्रंदनास्त्रोपमं, संसारार्णवमध्यमग्नजनतासत्पोतलीलास्पदम्।
ज्ञानं मुक्तिनितंविनीकुचयुगव्यासंगसत्कार्मणं, धन्यास्ते तदहो त्रिलोकनयनं यैर्लेखितं पुस्तके ॥१९॥
समस्तजनसद्बोधदायकं पुस्तके शुभे। लेखयामि महाशास्त्रं, किंचित् सिद्धान्तसुन्दरम् ॥२०॥
इत्येवं वहुधा विचिन्त्य मनसा वह्वेनसां वेश्मनो, वृत्तान्तं विदुषां मनःस्थिरकरं संसारवारांनिधेः।
सार्द्धं जिल्हणसूनुना वरधिया तस्या भुवण्यास्तथा, श्रेयोऽर्थं स्वकुटुम्बकस्य च ततः सा देवकी श्राविका ॥२१॥
सिद्धान्तोद्धारभूताया, निर्वाणपथदीपकम्। वृद्धोपदेशमालायाः, लेखयामास पुस्तकम् ॥२२॥
यावद्दैवतमार्गवर्यमुरजं काष्टासु वध्रीदृढं, मूढं गाढदिनेशचन्द्रपुटकं वातः स्फुटो वादकः।
नित्यं शब्दयति स्वभावपुरतः संसाररंगक्षितौ, तावन्नन्दतु पुस्तकं शुभमिदं व्याख्यायमानं वुधैः ॥छ॥२३॥
॥ मंगलं महाश्रीः ॥ श्रीवीरमस्तु ॥ छ ॥ ॥ शुभं भवतु लेखकपाठकयोः ॥

क्रमाङ्क २२९

उपदेशमाला वृहद्वृत्तिसह प्राकृतकथासह अपूर्ण पत्र २७२। **भा.** प्रा. सं.। **ले. सं.** अनु. १३ मी शताब्दी उत्तरार्धं। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २८×२॥

क्रमाङ्क २३०

उपदेशमाला वृहद्वृत्ति प्राकृतकथासह पत्र २९०। **भा.** प्रा. सं.। ग्रं. ९५००। **ले. सं.** अनु. १४ मी शताब्दी पूर्वार्द्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३३॥×२
अन्त—

उपदेशमालाविवरणं समाप्तम् ॥ छ ॥ छ ॥
कृतिरियं जिनजैमनिकणभुक्सौगतादिदर्शनवेदिनः सकलग्रन्थार्थनिपुणस्य श्रीसिद्धर्षेर्महाचार्यस्येति।
सिद्धर्षिकृता वृत्तिः कथानकैर्योजिता स्ववोधार्थम्। प्राक्तनमुनीन्द्ररचितैश्चारुभिरुपदेशमालायाः ॥
यदविधिना सूत्रोक्तं न सम्यगिह लिखितम्। जैनेन्द्रमताभिज्ञैस्तच्छोध्यं मर्षणीयं च ॥ छ ॥
उपदेशमालाविवरणं समाप्तमिति ॥ छ ॥ ग्रन्थाग्रं सहस्र ९५०० ॥ मङ्गलमस्तु ॥ छ ॥
शोभाजनोऽर्जुनाभिख्यस्तुङ्गश्च प्रियकस्तथा। अहो ऊकेशवंशोऽस्तितरां पृथ्वीतले कलिः ॥१॥
महीन्द्रः श्रावकस्तत्र मुक्ताकारत्वमाश्रयत्। उत्सङ्गालिङ्गनं प्रेप्सुः शङ्के निर्वृतियोषितः ॥२॥
चत्वारश्चतुराः पुत्राः पवित्रास्तस्य जज्ञिरे। विश्रान्तधर्मकारुण्यपल्यङ्कस्य पदा इव ॥३॥

अन्त—

श्रावणरविपञ्चर्मादिवसे ॥११॥ॐ॥ शुभं भवतु ॥ॐ॥

वंशः प्रांशुरसौ समस्ति भुवने शाखाभिरामद्युतिः, पात्रश्रेणिफलावलीढतनुना प्राप्तप्रभावो महान् ।
प्रोच्चैर्भूधरराजलब्धमहिमा श्रीमल्लतावेष्टितः, प्राग्वाटः प्रथितः सदा सुकवितापात्रं पवित्रोदयः ॥१॥
तस्मिन्नस्ति समस्तविश्वविदितः सूक्तिप्रियः शरणिगो मुक्तारत्नमिवातिकोमलरुचिः श्राद्धः प्रसिद्धः सुधीः ।
स्वच्छत्वेन परेण यः स्वकजनेऽलंकारचूडामणित्वाप्तोऽप्युज्ज्वलतां न च प्रचकटे छिद्रावलेपं पुनः ॥२॥
ब्रह्मदेव इति नाम विश्रुतस्तस्य सूनुरभवन्निरामयः । योऽश्वसाधनविराजितो भुवि, संचचारनृपदत्तविक्रमः ॥३॥
वीतरागपदपद्मरजोभिर्यो बभार किल देहपुंशनम् । भूषणं च शिरसो गुरोर्नतिः, शीलमेव परमं तनोः सदा ॥४॥
त्यक्त्वा प्रेमपरम्पराक्रमयशःप्रज्ञाभिमानोद्धतान्. राज्ञां श्रीः पुरुषान् सदार्जवगिरा पूतं विमृश्येव यम् ।
चापल्येऽस्थिरतां विधाय सहसा शिश्राय हृष्टा सती, स्वच्छं धर्मरतं विवेककलितं सत्त्वोपकारक्षमम् ॥५॥
यथार्थनामिका तस्य बभूव **श्री**रिति प्रिया । प्रसन्नवदना वंश्या दानतोषितमार्गणा ॥ ६ ॥
गेहिण्या च तया रेजे ब्रह्मदेवोऽधिकाधिकम् । विद्युतेव नवांभोदः स्वाहयेव हुताशनः ॥ ७ ॥

तथा—

भोगास्तुंगगिरीन्द्ररोहविषमा लक्ष्म्योऽप्यसद्यौवनं, ज्ञात्वा **मंट**जिनेशमंदिरवरे श्री**वीर**देवगृहम् ।
श्री**चक्रे**श्वरसूरिसद्गुरुवचः श्रुत्वा च सत्पुस्तकं, वैराग्योपनिषद् धनैः प्रमुदितौ तौ कारयामासतुः ॥ ८ ॥
सुतमजनिषातां ता**चां**वसरणनामकम् । पवित्रमक्षयं वृत्तमद्वितीयं कलानिधिम् ॥ ९ ॥
ग्रामाध्यक्षपदं प्राप्य यः सदा नृपशासनात् । जनानुरागतामेव धत्ते विस्फारमानसः ॥१०॥
सरोवरस्येव जलं फलं पुण्यतरोरिव । यस्यैश्वर्यमभूत् केषां केषां नैव विभूतये ॥११॥
यः शश्वज्जिनपूजने कृतमतिः प्रायस्त्रिसन्ध्यं गुरौ, शुश्रूषानिरतः परोपकृतिषु स्वाध्यायबद्धादरः ।
श्रीमन्**मंट**जिनेशितुः प्रतिपदं यात्रासु कल्याणिके, भक्त्युत्साहमनाश्चकार नितरां द्रव्यव्ययं चाधिकम् ॥१२॥
य**स्यो**दयमती कान्ता प्रथमा वल्लभाऽभवत् । यस्यामजायत सुतः पुण्यराशिरिवांगवान् ॥१३॥
जयतक इति नाम्ना विश्रुतश्चारुमूर्त्तिर्नृपतिजनपदानां चेतसो वृत्तिपूर्त्तिः ।
सकलगुणसमुद्रो दिक्षु विख्यातकीर्त्तिर्जिनचरणसरोजद्वंद्वभावाद् गतार्त्तिः ॥१४॥
द्वितीयाऽपि द्वितीया स्याद् द्वितीयेव हि **ते**उका । कलामात्रोऽपि पूज्यः स्याद् जयाचंद्र इव प्रियः ॥१५॥
लक्ष्मसीह इति ख्यातः सुतः सर्वजनप्रियः । धर्मज्ञः सत्यवादी च बभूव प्रियदर्शनः ॥१६॥
अ**थां**वशरणे स्वर्गं प्राप्ते स्वगृहमुत्तमम् । अबीवृधज्**ज**यतको वित्तेश इव धीधनः ॥१७॥
मायूरातपवारणः परिचलच्चंचत्तुरंगास्पदः, सूक्ष्मक्षोमविभूषितोऽतिविलसन् ग्रैवेयकश्रेणिकः ।
यो वैतालिकवृंदकोमलगिरा प्रस्तूयमानोऽनिशं, प्रौढप्रेमपदातिभिः परिवृतः स्वैरं चचार क्षमाम् ॥१८॥
तस्याभवत् प्रिये द्वे तु **चांदु-सीतू** मनोहरे । धर्मिष्ठे कुलजे दक्षे प्रियभाषणतत्परे ॥१९॥
वोसरिर्**लिम्ब**चन्द्राख्य..............स्तृतीयकः । पुत्री **स**ज्जननामाऽस्ति **सी**तुकाया..........॥२०॥
ब्रह्मदेवाऽऽमचंद्राख्यकी**काह्वबाल**चन्द्रकाः । **चां**दुकाया इमे पुत्राः **पून**सीहस्तु पंचमः ॥२१॥
आवयोः पुत्रयोः पत्न्यौ कुलजे रूपसंयुते । हंसलाऽ**नु**पमादेवी समभूतां मनोहरे ॥२२॥
भवे परपरस्याश्च तनयो जनवल्लभः । दृष्ट्वा धर्मफलं पुत्रे तत्परा **स**ज्जनाऽप्यभूत् ॥२३॥

तथाहि—

उपधानतपश्चक्रे तदुद्यमनकं तथा । तीर्थेषु संघयात्रासु धनव्ययमचीकरत् ॥२४॥
उपद्रवविनष्टं च श्वश्र्वा पुस्तकमादिमम् । ययोद्धृतं च पुण्याय जीर्णोद्धारे यथा महत् ॥२५॥

भवभावनायाः सत्कं श्रिया यल्लिखितं पुरा। पुस्तकं सा तदुद्धारं कारयामास भक्तितः ॥२६॥
इतश्च बृहद्गच्छेऽस्मिन् सर्वदेवाख्यसूरयः। शालिभद्रास्ततोऽपि स्युर्वर्द्धमानास्तु सूरयः ॥२७॥
यः सिद्धान्तसमुद्रतो मणिमिव स्वीकृत्य सारं सुधीर्नानार्थप्रभृतिप्रबंधघटनामासूत्र्य तद्भवम्।
क्षुद्रक्षुद्रधियामपि प्रतिपदं दत्ते स्म कीर्तिप्रियः, श्रीचक्रेश्वरसूरिरभवत्ततश्चारित्रचूडामणिः (?) ॥२८॥
ततोऽपि परमानन्दसूरयः प्रथितौजसः। यद्वक्त्रशैलात् प्राभूद् वज्रस्वामिकथानदी ॥२९॥
तदनु निरुपमश्रीः श्रीयशःसूरिवर्यो, विबुधहृदयहारी वीरसूरिस्ततोऽपि।
समजनि जयसिंहाचार्यपर्यस्तपापः, सुविहितजिनदत्ताचार्यवर्यस्ततश्च ॥३०॥
श्रीपद्मचन्द्रमुख्यान् सुप्रसन्नमनास्ततः। अर्वावदच्चतुर्दिक्षु सुयशोडिंडिमं गुणैः ॥३१॥
श्रीपद्मचंद्रमुनिपतिपट्टपूर्वाद्रिदिनपतिसमानः। जयति जयदेवसूरिर्भव्यांभोजप्रबोधनः ॥३२॥
क्रमागतगुरूणां सा क्रमसेवापरायणा। उपदेशामृतं चेयं कर्णाञ्जलिपुटैः पपौ ॥३३॥

तथा च—

पीठकं फलकं शय्या वस्त्रं पात्रं च कम्बलम्। पुस्तकं चान्नपानं च दत्तं स्याच्छ्रेयसेतराम् ॥३४॥
इत्थं वचश्चेतसि सज्जनाऽसौ, वाचंयमानां बहुधा विचार्य।
तदुद्धृतं पुस्तकमद्वितीयं, ददौ गुरुभ्यः कृतसाधुपूजना ॥३५॥
युगमुनिरविसंख्ये १२७४ वर्षे विक्रमतो गते। सत्पत्रपाठकाढ्यं समुद्धारः शुभाक्षरैः ॥३६॥
शेषो निःशेषमेष क्षितिभरमतुलं संवहन् यावदास्ते, यावन्मेरुर्नमेरुद्रुमकलिततलः स्वर्गिणां सन्निवासः।
चंद्रार्कौ यावदेतौ निबिडतरतमोध्वंसहेतू चकास्तस्तावन्नंद्यान्मुनीशैः सुनिपुणधिषणैः पुस्तकः पठ्यमानः ॥३७॥
लिखितं रामदेवेन ॥ शुभं भवतु ॥

क्रमाङ्क २३२

भवभावनाप्रकरण स्वोपज्ञवृत्तिसह पत्र ३८६। **भा.** प्रा. सं.। **क.** मलधारी हेमचंद्रसूरि स्वोपज्ञ। **र. सं.** ११७०। **ग्रं.** १३०००। **ले. सं.** १२४०। **संद.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३०॥×२॥।

अन्त—

आसीन्मेडतकस्थाने बोधिस्थः श्रावको धनी। पाहिका नाम तद्भार्या शीलादिगुणसंयुता ॥१॥
सौवर्णिकः प्रसिद्धोऽत्र समायातः सुतस्तयोः। सामनामाऽन्यनामा तु साधारणसमाह्वयः ॥२॥
सोहिणिनाम्नी भार्या पुत्रो लक्ष्मीधरोऽस्ति तस्येह। छत्रापल्ल्यां च तथा वीरश्रेष्ठ्यङ्गसम्भूतः ॥३॥
श्रेष्ठी यशोदेव इति प्रसिद्धो गेहे तयोर्वृत्तिरियं समग्रा।
स्थिरैर्गृहे वेल्लकनामकस्य श्रेष्ठेस्तथा वीरकनन्दनस्य ॥४॥
निष्पादिताऽस्माभिरतोऽप्यमीषां निःशेषकाणामपि मुक्तिहेतुः।
सम्पद्यतां शीघ्रममी सहायकर्माश्रितानामपराद्धिनां च ॥५॥छ॥
अत्र प्रत्यक्षरगणनया ग्रंथाग्र १३००० ॥छ॥छ॥छ॥

वासप्पयम्मि गामे सड्ढो वालप्पसायनामो त्ति। जयसिरिभिहाण कन्ना ताण सुओ अम्मओ नाम ॥३॥
तस्स य जाया जाया नन्नीनामा विसुद्धवरसीला। पसवइ कमेण वीसल-जयतीनामं च सुय-धूयं ॥४॥
वीसलमहिला पउमी आणंदो नाम ताण अंगरुहो। तवचरणकरणनिरया एव ठिए चिंतए नन्नी ॥५॥
अनित्यानि शरीराणि विभवो नैव शाश्वतः। नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः ॥६॥
इय चिंतिऊण तीए संवेगकरी लिहाविया रम्मा। भवभावणा य एसा भवदुक्खनिवारिणी निच्चं ॥७॥
सुन्नसमुद्दाइच्चे १२४० गयम्मि कालम्मि विक्कमनिवाओ। वक्खाणियं च पद्दे भवणे सिरिरिसहनाहस्स ॥८॥
सिरिदेवसूरिसुणिवइविणेयमुणिचंदसूरिनामेहिं। सिरिवीरसूरिपयसंठिएहिं भव्वाण बोहत्थं ॥९॥
वसुसायरआइच्चे १२४८ गयम्मि कालम्मि दुइयवेलाए। तह कालसराइच्चे १२५३ वखाणियं तइयवेलाए ॥१०॥
जाव य जिणिंदवयणं भव्वाण मणम्मि कुणइ परिओसं। ताव य नंदउ एयं भवभावणपुत्थयं पवरं ॥११॥

ेया प्रशस्ति—

सच्छायः सरलः समुन्नतिधरः शाखाभिरापूरितो भूभृल्लब्धपदः सुपर्वनिचितः सद्धर्मकर्मक्षमः।
सद्वृत्तोचितितास्पदं सुमनसामापत्ररम्याकृतिर्वंशो वंश इवोत्तमोऽस्ति जगति श्रभिल्लमालाह्वयः ॥१॥
आम्बप्रसाद इति तत्र वणिक् प्रधानं पद्माभिधे समजनिष्ट......कीर्त्तिः।
तस्य प्रियाऽविधवदेव्यनघा बभूव श्रेयोमतिर्गजगतिर्वसतिर्गुणानाम् ॥२॥
गुणत्रयं च कृतिवत् सृष्टिवद् भुवनत्रयम्। रत्नत्रयं क्षमावच्च सा सुषुवे सुतत्रयम् ॥३॥
तत्राद्यः सज्जनाह्वानः सज्जनाम्भोजभास्करः। गाम्भीर्यस्थैर्यधैर्यादिगुणरत्नमहोदधिः ॥४॥
कौशल्यं हृदि पौरुषं भुजयुगे दानप्रसङ्गः करे, सत्या वाग् वदने गुरोर्गुणनुतिः कण्ठे मतिर्मस्तके।
आस्ते यस्य विनाऽपि काञ्चनमहो! स्वाभाविकं भूषणं, सोऽयं केल्हण इत्युदारचरितो जातो द्वितीयः सुतः ॥५॥
विशालवंशः करुणाभिरामः, सश्रीफलः सत्तिलकः सुजातिः।
आरामभूभागसमस्तृतीयो, विराजते पासुकनामधेयः ॥६॥
नीतय इव शस्यतरा बुद्धय इव सर्वकामदायिन्यः। नानी लाडी देदी फूदी पुत्र्यश्चतस्रश्च ॥७॥

श्च—

श्रेष्ठी वालप्रसादाख्योऽभूद् ग्रामे वासपाभिधे। जयश्रीनाम तद्भार्या तयोः पुत्रौ बभूवतुः ॥८॥
ज्येष्ठः सच्छ्रेष्ठ आमाको द्वितीय आसकाभिधः। आमाकस्य प्रिया जज्ञे नानी धर्मप्रिया सुधीः ॥९॥
वीसलाख्यः सुतस्तस्याः पुत्री मूर्त्तिमती रमा। जयतीति गुणैराढ्या शीलालङ्कारशालिनी ॥१०॥
वीसलस्य प्रिया पद्मी पुत्रश्च गुणमन्दिरम्। वालोऽप्यवालचरित आनन्दाख्यो जनप्रियः ॥११॥
नानी नित्यं तपोदानशीलसद्भावनामयम्। धर्मं चतुर्विधं चक्रे विजितेन्द्रियमानसा ॥१२॥
विज्ञाय धनमनित्यं तप उद्यापनानि च। तीर्थयात्रा मुकुटं तु पद्रे नाभेय-नेमिनोः॥१३॥ युग्मम् ॥
ज्ञानफलमतिश्रेष्ठं श्रुत्वा सद्गुरुसन्निधौ। अलेखयदिमां भव्यचमत्कृद्भवभावनाम् ॥१४॥

तश्च—

श्रीमान् ब्रह्माणगच्छेऽस्ति चन्द्रशाखासमुद्भवः। रोहणाद्रिरिवात्युच्चैः साधुरत्नविभूषितः ॥१५॥
तत्राभवन् गुणैः ख्याताः श्रीदेवचन्द्रसूरयः। तत्पट्टश्रीललामानो जाताः श्रीवीरसूरयः ॥१६॥
तदनु विदिततत्त्वः पालिताशेषसत्त्वः कुमतकुमुदसूर्यः पञ्चधाचारधुर्यः।
परहितरतचित्तः साधुधर्मैकचित्तः समजनि मुनिचन्द्रः सूरिरत्नं मुनीन्द्रः ॥१७॥

तैः शून्याब्धिरवौ १२४० वर्षे सञाते विक्रमादिदम्। व्याख्यातं पुस्तकं **पद्र**ग्रामे **ना**भेयमन्दिरे ॥१८॥
तच्छिष्यवाचनाचार्या**भ**यकुमारसंज्ञिना। व्याख्यायि वसुसिन्ध्वर्के १२४८ वर्षे द्वितीयवेलया ॥१९॥
[तथा कालशरा]दित्ये वर्षे तृतीयवेलया। व्याख्यातं श्रेयसे स्वस्य त्रि**र्ना**नीदमवीवचत् ॥२०॥
व्याख्यापितं **ज**यत्या गत्वेदं **ति**मिरपाटके तुर्याम्। वेलां वाणरसार्के १२६५ वर्षे **नान्या**ः सुकृतहेतोः ॥२१॥
पंडित**ने**मिकुमारो नभोवस्वर्कवत्सरे १२८०। व्याचख्यौ पञ्चमीं वेलामिदं परमवीवचत् ॥२२॥
जयती स्वकुलाम्भोजहंसी भक्तिमती गुरौ। आत्मनः श्रेयसे **प**द्रं समेत्य **दे**वपत्तनात् ॥२३॥ युग्मम्॥
पण्डि**ता**भयकुमारगणये पुस्तकं ददे। वाचनार्थं जयत्येदं स्वमात्रोः पुण्यवृद्धये ॥२४॥
भानुर्भाभिर्भुवनवलयं यावदिद्धं विधत्ते, चन्द्रो यावत् कुमुदकलिकां बोधयत्यंशुभिस्तु।
यावज्जैनं वचनममलं भव्यचेतः प्रमार्ष्टि, तावन्नन्द्यात् सुमतिभिरिदं पुस्तकं वाच्यमानम् ॥२५॥
शुभमस्तु ॥ छ ॥ ॐ ॥ छ ॥

क्रमाङ्क २३३

भवभावनाप्रकरण स्वोपज्ञवृत्तिसह पत्र ३८५। **भा.** प्रा. सं.। **क.** मलधारी हेमचन्द्रसूरि स्वोपज्ञ। **ग्रं.** १३०००। **र. सं.** ११७०। **ले. सं.** १२६०। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३०×२॥।
आदिनां दस पानांना टुकडा छे, तथा पत्र ३३९ नो टुकडो नथी।

अन्त—

श्रावणरविपंचमीदिवसे ॥१५॥छ॥ ग्रंथाग्रं ॥ १३१०० ॥ ॐ ॥छ॥

संवत् १२६० वर्षे श्राम्वण सुदि १४ गुरावद्येह श्रीम**द**णहिलपाटके महाराजाधिराज**भी**मदेवकल्याणविजयराज्ये तत्पादपद्मोपजीविनि महामात्य राण० श्री**चा**चाकः श्रीश्रीकरणादिसमस्तमुद्राव्यापारान् परिपंथयतीत्येवं काले प्रवर्त्तमाने **रु**द्रपल्लीयश्री.........देवसूर्यादेशेन **भ**वभावनावृत्तिपुस्तकं **वि**षयपथके **कां**मांग्रामवास्त० लेख० **मो**हडउत्र**म**हिपालेन भव्याक्षरैः शुद्धाक्षरैश्च लिखितमिति ॥छ॥ शुभं भवतु ॥

क्रमाङ्क २३४

धर्मरत्नप्रकरण बृहद्वृत्तिसहित त्रूटक अपूर्ण २९४। **भा.** प्रा. सं.। **मू. क.** शांतिसूरि। **वृ. क.** देवेन्द्रसूरि। **ले. सं.** अनु. १४ शताब्दी। **संह.** जीर्णप्राय। **द.** मध्यम। **लं. प.** ३२॥×२.।
आ प्रतिनां लगभग अर्धा जेटलां पानां नष्ट थइ गयां छे।

क्रमाङ्क २३५

संवेगरंगशाला पत्र ३४८। **भा.** प्रा.। **क.** जिनचंद्रसूरि। **गा.** १००५३। **र. सं.** ११२५। **ले. सं.** १२०७। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३०×२।

अन्त—

एवमिमेह समप्पइ संपइ **सं**वेगरंगसाल त्ति। आराहणा इयाणिं तस्सेसं किं पि जंपेमि ॥
आसि **उ**सभाइयाणं तित्थयराणं अपच्छिमो भयवं। तेलोक्कपहियकित्ती चउवीसइमो जिणवरिंदो ॥
दित्ततरंगरिउवग्गगंजणज्जियजहुत्तवीरत्थो। तेलोक्करंगमज्झे अतुलमल्लो **म**हावीरो।
लीलाललणसुहम्मो संजमलच्छीए तस्स य **सु**हम्मो। सीसो तत्तो **जं**वू गुणिजणसउणीण वरजंवू ॥
णाणाइगुणप्पभवो तत्तो य अभू महापभू **प**भवो। तयणंतरं अभयवं आसी **से**ज्जंभवो भयवं ॥
अह तस्स महापहुणो मूलाओ चेव न हु जडाणुगए। न जहुत्तरं तणुतरे परिमियपव्वे च्चिय न चेत्र ॥३०॥

सव्वंगं सारे च्चिय न अप्पवोच्छेयदच्छतुच्छफले। पत्तग्गसाडरहिए समंतओ निब्भसच्छाए ॥
न य अन्नेसिं गम्मे अकंटए निरवसाणवुड्ढिगुणे। तुंगमहीधरमुद्धाणुगे वि भुवि पावियपइट्ठो ॥
अच्चंतं सरले च्चिय अपुव्ववंसम्मि परिवहंतम्मि। जातो य वइरसामी महापभू परमपयगामी ॥
तस्साहाए निम्मलजसधवलो सिद्धिकामलोयाणं। सविसेसवंदणिज्जो य रोयणा थोरथवगो व्व ॥
कालेणं संभूओ भयवं सिरिवद्धमाणमुणिवसभो। निप्पडिमपसमलच्छीविच्छड्डखंडभंडारो ॥
ववहारनिच्छयनय व्व दव्वभावत्थय व्व धम्मस्स। परमुन्नइजणगा तस्स दोण्णि सिस्सा समुप्पण्णा ॥
पढमो सिरिसूरिजिणेसरो त्ति सूरे व्व जम्मि उइयम्मि। होत्था पहावहारो दूरं तेयस्सिचक्कस्स ॥
अज्ज वि य जस्स हरहासहंसगोरं गुणाण पब्भारं। सुमरंता भव्वा उव्वहंति रोमंचमंगेसु ॥
बीओ उण विरइयनिउणपवरवागरणपमुहबहुसत्थो। नामेण बुद्धिसागरसूरि त्ति अहेसि जयपयडो ॥
तेसिं पयपंकउच्छंगसंगसंपत्तपरममाहप्पो। सिस्सो पढमो जिणचंदसूरिनामो समुप्पन्नो ॥४०॥
अन्नो य पुन्निमाससहरो व्व निव्ववियभव्वकुमुयवणो। सिरिअभयदेवसूरि त्ति पत्तकित्ती परं भुवणे ॥
जेण कुबोहमहारिउविहम्ममाणस्स नरवइस्सेव। सुयधम्मस्स दढत्तं निव्वत्तियमंगवित्तीहिं ॥
तस्सऽब्भत्थणवसओ सिरिजिणचंदेण मुणिवरेण इमा। मालागारेण व उच्चिणितु वरवयणकुसुमाइं ॥
मूलसुयकाणणाओ गुंथित्ता नियमइगुणेण दढं। विविहत्थसोरभभरा निम्मविया ऽऽराहणामाला ॥
एयं च समणमहुयरहिययरं अत्तणो सुहनिमित्तं। सव्वायरेण भव्वा विलासिणो इव निसेवंतु ॥
एसा य सुगुणमुणिजणपयप्पणामप्पवित्तभालस्स। सुपसिद्धसेट्ठिगोद्धणसुयस्सिसुयजज्जणागस्स ॥
अंगुब्भवाण सुपसत्थतित्थजत्ताविहाणपयडाणं। निप्पडिमगुणज्जियकुमुयसच्छहातुच्छकित्तीणं ॥
जिणबिंबपइट्ठावणसुयलेहणपमुहधम्मकिच्चेहिं। अनुकासगदुक्कुहचित्तचमक्कारकारीणं ॥
जिणमयभावियबुद्धीण सिद्धवीराभिहाणसेट्ठीणं। साहेज्जेणं परमेण आयरेणं च निम्मविया ॥
एईए विरयणेण य जमज्जियं किं पि कुसलमम्हेहिं। पावितु तेण भव्वा जिणवयणाराहगं परमं ॥५०॥
छत्तावल्लिपुरीए जज्जयसुयपासणागभवणम्मि। विक्कमनिवकालाओ समइक्कंतेसु वरिसाण ॥
एक्कारससु सएसुं पणुवीसासमहिएसु निप्फत्ती। संपत्ता एसाऽऽराहण त्ति फुडपायडपयत्था ॥
लिहिया य इमा पढमम्मि पोत्थए विणयनयपहाणेण। सिस्सेणमसेसगुणालएण जिणदत्तगणिणा त्ति ॥छ॥
तेवण्णब्भहियाइं गाहाणं इत्थ दस सहस्साइं। सव्वग्गं ठवियं निच्छिऊण सम्मोहमहणत्थं ॥छ॥ॐ॥छ॥

अंकतोपि ॥ छ ॥ सर्वाग्रं गाथा १००५३ ॥ छ ॥॥ इति श्रीजिनचंद्रसूरिकृता तद्विनेयश्रीप्रसन्नचंद्राचार्यसमभ्यर्थितगुणचंद्रगणिप्रतिसंस्कृता जिनवल्लभगणिना च संशोधिता संवेगरंगशालाभिधानाराधना समाप्ता ॥ छ ॥ ॐ ॥ छ॥ मंगलं महाश्रीः ॥५०॥ संवत् १२०७ वर्षे ज्येष्ठ शुदि १४ गुरौ अद्येह श्रीवटपद्रके दंड० श्रीवोसरिप्रतिपत्तौ संवेगरंगशालापुस्तकं लिखितमिति ॥छ॥

शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः । दोषाः प्रयांतु नाशं सर्वत्र सुखी भवतु लोकः ॥छ॥

५० ॥ जन्मदिनचरणभाराक्रान्तशिरःसुरगिरेरिवात्तेन। रुक्मरुचिसंचयेन स्फुरत्तनुर्जयति जिनवीरः ॥१॥
सद्राजहंसचक्रक्रोडाक्रमवति विलासिदलकमले। श्रीमत्यणहिल्लपाटकनगरे सरसीव कृतवासः ॥२॥

श्रीभिल्लमालगुरुगोत्रसमुद्भूति यश्चकेऽभिरामगुणसम्पदुपेतमूर्त्तिः ।
ताराधिनाथकमनीययशाः स धीरः श्रीजांबवानिति मतो भुवि ठक्कुरोऽभूत् ॥३॥
भद्रः प्रकृत्यैव यथार्थ्यनागः सदाऽभवत् सत्कृतवीतरागः ।
कटप्रविस्तारितभूरिदानस्तन्नन्दनः ठक्कुरवर्धमानः ॥४॥
तस्य चाजनि सत्पत्नी नवीनार्थप्रियागमा । यशोदेवीति गंगेव सुमनोहरचेष्टिता ॥५॥

पुत्रः प्रेयानेतयोश्चन्द्रतुल्यो जज्ञे शश्वत्कौमुदाप्यानहेतुः ।
प्राप्तः स्फार्ति वृद्धये वैबुधानामीशश्लाघ्यः ठक्कुरः **पार्श्वनामा** ॥६॥
यत्कारितं **वीरजिनेन्द्रसद्म** चतुर्मुखं भाति **कुमारपल्ल्याम्** ।
शुभ्रं कनत्कांचनकुंभमुच्चैः शृंगं हिमाद्रेर्ज्वलदोषधीव ॥ ७ ॥
सत्पादजंघिकात्रिकमध्यमुखाभरणबहुविधविलासम् । यच्छालिभंजिकागणमुद्वहति स्वमिव सुशिरस्कम् ॥ ८ ॥
निःसपत्नाऽभवत् पत्नी तस्य शस्यचरित्रभूः । गौरीव गिरिशालीना **धंधिका** बन्धुवत्सला ॥ ९ ॥
पुत्राः पंचाजनिपुरनयोर्लोकपालायमाना मानम्लानिप्रथनपटवः क्षुद्रजिह्वालतानाम् ।
सर्वज्ञार्चामुनिवितरणन्यायसंस्थापनोत्था कीर्त्तिर्येषां विचरति शरच्चंद्रकुन्दावदाता ॥ १० ॥
महत्तमो **नन्नुक** एषु पूर्वजो द्वितीयकः ठक्कुर**लक्ष्मणः** सुधीः ।
वज्रीव नामत्यकृतप्रतिष्ठितिस्तृतीय **आनन्दमहत्तमः** कृती ॥ ११ ॥
वाणी यस्य प्रसरति रसात् सोदरी शर्करायाः चेतोवृत्तिर्विलसति तुलां कल्पयन्ती सुधायाः ।
सत्कर्पूरांजनमिव लसच्चेष्टितं शिष्टदृष्टीः पुष्टिं नित्यं नयति यदि वा सुन्दरं किं न यस्य ॥ १२ ॥
धनपालनागदेवौ ठक्कुरौ तुर्यपंचमौ । **श्रियादेवी** च सत्पुत्री जानेका शीलशालिनी ॥ १३ ॥
एतेष्वानंदमहत्तमस्य पत्न्यौ क्रमादभूतां द्वे । धृतशस्यशीलसंपत् पूर्वा वसुधेव **विजयमतिः** ॥ १४ ॥
इतश्च—

कारा घर्मादिरादीनविपु गुणिपु तु स्वःशिवश्रीनियोगः
साम्राज्यं यावदित्थं प्रतपतु भुवने पुस्तकस्तावदेपः ॥ २७॥
॥ मंगलं महाश्रीः ॥ छ ॥

क्रमाङ्क २३६

धर्मविधिप्रकरण पत्र १८६। **भा.** प्रा.। **क.** नन्नसूरि। **ग्रं.** ६९५०। **र. सं.** ११९०। **ले. सं.** ११९०। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २८॥×२॥.

आदि— ॥ नमो जैनागमाय ॥

विज्जाहरनरकिन्नरदणुवइसिरमउडघट्टपयवीढं। सिरिवच्छंकियवच्छं पणमामि जिणेसरं रिसहं ॥१॥
निद्दलियअट्ठकम्मं अट्ठमहापाडिहेरकयसोहं। अट्ठदसदोसरहियं थुणामि देवं महावीरं ॥२॥
बावीसं तित्थयरे सम्मं परिमलियरायमयणोहे। वंदामि अहं निच्चं संसारसमुद्दवरपोए ॥३॥
गोयमगणहरपमुहे पयडजसे सयलभुवणविक्खाए। सुयसागरपारगए नमिउं सेसे वि कइवसहे ॥४॥
कमलदलदीहनयणं कमलमुहीं कमलगब्भसमकंतिं। कमलंकियकरचरणं नमिउं वागीसरिं देविं ॥५॥
वोच्छमहं धम्मविहिं समत्थसत्थाण उद्धरेऊणं। सुविचारसारदिट्ठंतनिवहजहलिहियअत्थेहिं ॥६॥
दाणेण य १ सीलेणं २ तवेण ३ तह चेव भावणाए य ४। जिणपूयाए ५ य तहा दंसणसुद्धी हवइ जम्हा ॥७॥
सावज्जवयणपरिवज्जणम्मि जीवाण सोक्खहेउम्मि ६। जिणपन्नत्तो धम्मो होइ इमो मोक्खफलजणओ ॥८॥
परपीडकारयम्मि वि कज्जे हासेण वज्जिए धम्मो ७। चेइयदव्वस्स तहा परिरक्खण ८ वुड्ढिकरणे य ९॥९॥
विसयपमायस्स तहा चाइम्मि य १० एत्थ दस य दिट्ठंता। मंगलकलसाईया जहक्कमं चेव नायव्वा ॥१०॥छ॥

अन्त—

दाणाइयम्मि धम्मे मंगलकलसाइणो य दिट्ठंता। विविहफलसाहगा इह भणिया तह मोक्खहेउ त्ति ॥
नाणाविहगंथेसुं विभिन्नसम्बन्धवद्धअत्थेसु। जह लिहिया चेव इमे सुपसिद्धा एत्थ गंथम्मि ॥
दिट्ठंताण परोप्परसंबंधा मेलिऊण सुहबोहा। भवियजणबोहणत्थं सुसंचिया नन्नसूरीहिं ॥
धम्मविहिपगरणमिमं विसोहगं नाणदंसणगुणाणं। दसदिट्ठंतेहिं जुयं सम्मत्तं देउ सिवसोक्खे ॥ छ ॥
एक्कारसनउएहिं ११९० [विक्कमनिवकालओ अईयम्मि।] कत्तियपडिवइयाए निप्फन्नं पगरणं एयं ॥ छ ॥

उयहिकुलगिरिंदा सूरदेविंदचंदा धरणियलममाणं जाव धम्मो जिणाणं।
मुणिवरनियरेहिं ताव वक्खायमाणं वरपगरणमेयं.................. ॥

[धम्मविहिपगरणं] सम्मत्तं ॥ छ ॥ छ ॥ ग्रन्थाग्रं ६९५० ॥ छ ॥ सम्वत् ११९० पोष वदि ३ शुक्रे ॥
नहगहरुद्दंकजुए ११९० काले सिरिविक्कमस्स वट्टंते। पोसासियतइयाए लिहियमिणं सुक्कवारम्मि ॥ छ ॥
कीर्त्या कुन्दसमत्विषा धवलिते विश्वत्रय...त्वया, तस्मान्नाथ ममापि पापतिमिरं निर्मूलमुन्मूलय।
इत्युच्चैः कथयन्ति कुन्तलसटाव्याजेन भृङ्गाङ्गनाः, कर्णान्ते कलधौतचम्पकरुचिं तं नाभिसूनुं स्तुवे ॥१॥
मिथ्यात्वांबुधिमज्जमानभविनां निश्छिद्रपोतायते, दुष्टाष्टाशुभकर्मकुञ्जरघटाव्यापादने केसरी ॥
यस्याद्यापि सुतीर्थमत्र विमलं क्लेशापहं वर्त्तते, स श्रीवीरजिनेश्वरो भवभयं छिन्द्यादरं देहिनाम् ॥२॥
सद्वृत्तः सरलः सुवर्णमहिमः पर्वाभिरामः सदा, सच्छायः सफलो मनोहरगिरिप्राप्तप्रतिष्ठोदयः।
धर्मार्थः परपत्रवान् गुरुतरः संराजते वंशवद्, वंशो हुंवटसंज्ञकः स्फुटतरं ख्यातो धरित्रीतले ॥३॥
अस्मिन् वंशे समुत्पन्नः श्रेष्ठी श्रेष्ठगुणालयः। सुधामा धामनामेति पुरा सद्गुरुसेवकः ॥४॥

सोहिणिर्नामतः ख्याता भार्या तस्य वरानना। तयोः पुत्रास्त्रयो जाता दातारो लोकवल्लभाः ॥५॥
प्रथम आमणागाख्यो द्वितीयो वाहडस्तथा। तृतीय आम्रदत्ताह्वस्ततः पुत्र्यौ सुलोचने ॥६॥
प्रथमा मुञ्जला नाम्ना सीतासंज्ञा द्वितीयका। तत्राऽऽम्रदत्तसत्पत्नी सुधवा नाम विश्रुता ॥७॥
त्रयः पुत्राः समुद्भूताः सज्जनानन्ददायकाः। ताभ्यां धर्मार्थकामानां प्रत्यक्षा इव मूर्त्तयः ॥८॥
अग्रज आसदेवाख्यः सर्वदेवो द्वितीयकः। पार्श्वदत्तस्तृतीयश्च तेषां भगन्यः शुभाशयाः ॥९॥
प्रथमा केलिका नाम्ना द्वितीया च सलक्षणा। सरस्वती तृतीया च आमीसंज्ञा चतुर्थिका ॥१०॥
कलत्रमासदेवस्य पद्मी सुकुलसम्भवा। सर्वदेवस्य सद्भार्या रत्नी रमणभूपिता ॥११॥
सा पुनः श्रेष्ठिनः पुत्री सिद्धस्य क्षमया युता। राजुकया धृता कुक्षौ विज्ञातव्या पितुर्गृहे ॥१२॥
श्रियादेव्यभिधानेन केतकीव विराजते। दधाना शीलसौरभ्यं गुणालीनां तु याऽनिशम् ॥१३॥
गृहिणी पार्श्वदत्तस्य लक्ष्मीर्लक्षणलक्षिता। सर्वदेवस्य रत्न्याश्च पुत्राः पञ्च सबुद्धयः ॥१४॥
आद्यो यशोधवलाख्यो जेसलश्च द्वितीयकः। तृतीयः साभटाख्यश्च आम्रेश्वरश्चतुर्थकः ॥१५॥
पञ्चमो नागदेवश्च तेषां भगन्यः सुनिर्मलाः। चतस्रो गुणसम्पूर्णा नामतः कथ्यतेऽधुना ॥१६॥
सम्पूर्णा प्रथमा ज्ञेया चाहिणिश्च द्वितीयका। राणूस्तृतीयका जज्ञे लाखूनाम्नी चतुर्थिका ॥१७॥
केसवस्य यथाऽभीष्टा कमलेन्दुमुखी तथा। सलक्षणाऽभिधा जाता जेसलस्य प्रियाऽवरा ॥१८॥
साभडस्यापि संजज्ञे गृहिणी सज्जनिस्तथा। यशोराजाह्वकः पुत्रो जेसलयाऽजनि प्रियः ॥१९॥
जेसलसाभडाह्वानौ श्रुत्वा ज्ञानस्य देशनाम्। गुरुप्ररूपितां हृद्यां ज्ञानदानं शिवप्रदम् ॥२०॥
सज्ज्ञानाज्जायते सर्वा कृत्याऽकृत्यविचारणा। तस्मात् सर्वप्रयत्नेन ज्ञाने यत्नो विधीयताम् ॥२१॥
ज्ञात्वेदमलीलिखतां सद्वर्णैर्वरपत्रकम्। श्रेयसे मातृपित्रोस्तौ धर्मविधिः सत्पुस्तकम् ॥२२॥

उक्तं च—

ते धन्या धनिनस्त एव भुवने ते कीर्त्तिपात्रं परं, तेषां जन्म कृतार्थमर्थनिवहं ते चाऽऽवहन्त्वन्वहम्।
ते जीवन्तु चिरं नराः सुचरिता जैनं शुभं शासनं, ये मज्जद्गुरुदुःपमांबुधिपयस्यभ्युद्धरन्ति स्थिराः ॥२३॥
किं किं तैर्न कृतं न किं विढपितं दानं प्रदत्तं न किं, का वाऽऽपन्न निवारिता तनुमतां मोहार्णवे मज्जताम्।
नो पुण्यं किमुपार्जितं किमु यशस्तारं न विस्तारितं, सत्कल्याणकलापकारणमिदं यैः शासनं लेखितम् ॥२४॥

इतश्च—

चन्द्रवच्चन्द्रगच्छोऽयं तमोभीतो गवालयः। साधूनामुदयाभी[illegible]ऽस्मिन् लोके विराजते ॥२५॥
सूरयो वर्द्धमानाख्या वर्द्धमाना इवाऽभवन्। गच्छे चन्द्राभिधे तस्मिन् मङ्गल्या भक्तिपूरिताः ॥२६॥
तद्विनेयो देवसूरिः संजज्ञे देवसूरिवत्। विबुधैः संस्तुतो वन्द्यो विद्यया निरवद्यया ॥२७॥
गेहं रूपस्य तच्छिष्या बभूवुर्हेमसूरयः। कामो दृष्ट्वाऽऽत्मसं...दग् तत्याज लज्जयेव तान् ॥२८॥
नाम्ना सूरिर्यशश्चन्द्रो जातस्तत्पट्टभूपणः। ....वैरिणम् ॥२९॥
सूरयस्तस्य चिद्रूपाः श्रीमुनिचन्द्रसंज्ञकाः। सरस्वत्या निजा विद्या मन्ये तेषां समर्पिता ॥३०॥

यतः—

नित्यं व्याकरणे कृतोद्यमवशाः काव्येषु शास्त्रेषु च, दक्षाश्छंदसि ज्योतिषे पटुधियस्तर्के वितर्काः सदा।
काव्यालङ्करणे रताश्च समये तन्नेह शास्त्रं क्षितावस्ति...........मुरुधिया ज्ञातं न यत्तैर्भृशम् ॥३१॥
सूरिः श्रीकमलाख्योऽलिसमस्तत्पादपद्मसेवायाम्। नो दत्ते यो वासं स्वपुरे कामादिशत्रूणाम् ॥३२॥
श्रेष्ठिना पासडाख्येन श्रीधर्मविधिपुस्तकम्। स्वमातृपितृपुण्यार्थं दत्तं कमलसूरये ॥३३॥

अवनितलमिदं हि यावदासप्तलोकं.....................................।
निपुणमतिभिरेतत् पुस्तकं वाच्यमानं विमलगुणनिधानं नन्दतात् तावदेव ॥३४॥
॥ मङ्गलं महाश्रीः ॥छ॥छ॥

गृहिणी **पार्श्वदत्तस्य लक्ष्मी**र्लक्ष्मीरिवापरा । प्रथमः **सूमकः** पुत्रो **यशश्चन्द्रो** द्वितीयकः ॥१॥
यशोवीरस्तृतीयस्तु **वर्द्धमान**श्चतुर्थकः । पञ्चम**आम्र**कुमाराख्यो आम्रवृक्ष इवोत्तमः ॥ २ ॥

प्रथमं सूमशाखायाम्—

सूमाकस्य हि भार्याऽभूत् **साईनाम्ने**ति विश्रुता । पुत्रः **षयरा**ऽभिधस्ताभ्यां पत्नी **सावित्री** तस्य हि ॥३॥
तयोः पुत्राश्च चत्वारः पुरुषार्था इव क्षितौ । **नायकः** व्यवहारी तु द्वितीयस्त्**वी**श्वराभिधः ॥ ४ ॥
तृतीयो **लाखण**श्रेष्ठी **बहुदेवो** बहुदायकः । **नायकेन** सुतो जज्ञे **खेतसिंहो**ऽभिधानतः ॥ ५ ॥
बहुदेवस्य भार्याऽभूत् **श्रियादेवी**ति विश्रुता । द्वौ पुत्रौ तु तयोर्जातौ **सहदेवा**ऽऽसाख्यसंज्ञकौ ॥ ६ ॥
पार्श्वदत्तस्य पुत्रोऽभूत् **यशश्चन्द्रो** द्वितीयकः । तस्य पुत्रद्वयं जातं पवित्रं पुण्यकारकम् ॥ ७ ॥
यशोधवलस्तु प्रथमः स्वकीर्त्या धवलितक्षितिः । द्वितीयो **वयरसिंहा**ख्यः सिंहः सर्वेषु कर्मसु ॥ ८ ॥
यशोधवलस्य सद्भार्या **मोषू** मोक्षाभिलाषिणी । पवित्रा पञ्चपुत्रास्तु तयोः पञ्चाननोपमाः ॥ ९ ॥
ऊदलः प्रथमः श्रेष्ठी पुण्यकर्मरतः सदा । **प्रह्लादनः** द्वितीयस्तु विश्वस्याह्लादकारकः ॥ १० ॥
जगत्सिंहस्तृतीयस्तु श्रेष्ठी **रत्न**श्चतुर्थकः । **पुण्या**ख्यः पञ्चमो जज्ञे पुण्यपूरितमानसः ॥ ११ ॥
ऊदलस्य हि भार्याऽभूद् **रुक्मिणी** रूपशोभिता । **प्रह्लादन**स्य सत्पत्नी **हंसला** हंसगामिनी ॥ १२॥
जयतसिंहस्तयोः पुत्रः प्रथमः पृथिवीतले । द्वितीयो **विजयसिंह**स्तु **दे**दाख्यस्तु तृतीयकः ॥ १३ ॥
विजयसिंहस्य सद्भार्या **राणी** शीलसमन्विता । तया पुत्रत्रयी जज्ञे रत्नत्रयविभूषिता ॥ १४ ॥
प्रथमः **खीमसिंहा**ख्यः **खेतल**स्तु द्वितीयकः । तृतीयो वीरमश्रेष्ठी शिष्टः सर्वेषु कर्मसु ॥ १५ ॥
श्रेष्ठिनो **जगसिंह**स्य भार्या **वयजलदे**विका । सप्त पुत्रास्तयोः जाताः सप्तऋक्षोपमा भुवि ॥ १६ ॥
धांधाख्यः प्रथमो जज्ञे भार्या तस्य हि **माणिकिः** । पुत्रस्तु **देवसिंहा**ख्यः देवार्चनरतः सदा ॥ १७ ॥
द्वितीयः **वीरधवल**श्च भार्या **सहिजला**ऽभिधा । **आसका**ख्यस्तृतीयस्तु चतुर्थो **मदना**भिधः ॥ १८ ॥
पञ्चमो **भीम**संज्ञस्तु निर्भयः सर्वकर्मसु । पुत्रस्तु **मूलकः** श्रेष्ठी **धनसिंह**स्तु सप्तमः ॥ १९ ॥
रत्नस्य श्रेष्ठिनो भार्या **रत्नादेवी**ति विश्रुता । तयोः पुत्राश्च चत्वारः ज्येष्ठो **साहण**संज्ञकः ॥ २० ॥
द्वितीयः **सीहड**श्चाऽभूत् **साङ्गण**श्च तृतीयकः । चतुर्थः **पासडा**ख्यस्तु स प्राप्तः परलोकताम् ॥२१॥

अथ—

वैरिसिंहस्य भार्याऽभूत् **ललतू** लावण्यपूरिता । षट् पुत्राश्च तयोर्जाता षड्दर्शनपूजकाः ॥२२॥
प्रथमो **वयजलः** श्रेष्ठी **अरसिंहो** द्वितीयकः । तृतीयो **लूणका**ख्यस्तु **आमसिंह**श्चतुर्थकः ॥२३॥
तिहुणाख्यः पञ्चमो जज्ञे षष्ठो **वाहूलाक**नामतः । **वयजल**स्य हि भार्याऽभूत् **पद्मला** पद्मिनीसमा ॥२४॥
पञ्च पुत्रास्तयोर्जाताः पञ्चाननपराक्रमाः । **झांझणः पीम**संज्ञस्तु **अजेसीह**स्तृतीयकः ॥ २५ ॥
साहडश्च चतुर्थोऽभूत् पञ्चमो **मोक्ष**नामतः । **अरसिंह**स्य शाखायां रम्यो **रामा**भिधः सुतः ॥२६॥
लूणकस्य हि भार्याऽभूत् **जासला** जिनपूजिका । पुत्रः **प्रतापसिंहा**ख्यः **सामन्ता**ख्यो द्वितीयकः ॥२७॥
तिहुणाकस्य हि भार्या लक्ष्मीर्लक्ष्मीरिवाऽपरा । पुत्रस्तु **मण्डलीका**ख्यः **पद्म**नामा द्वितीयकः ॥२८॥
त्रीकमश्च तृतीयोऽभूद् **अभयसिंह**श्चतुर्थकः । **पील्हाक**स्य हि भार्याऽभूत् **तिहणदेवी**ति विश्रुता ॥२९॥
तयोः पुत्रः पवित्रोऽभूत् **भीमो** भीमपराक्रमः ।..............................[अग्रे अपूर्णा]

कान्ता साधारणस्याभूद् रोहिणीव हिमद्युतेः। इन्द्राणीव सुरेशस्य लक्ष्मीरिव मुरद्विषः ॥१६॥
शीलेन सुलसा सीता रेवती च सुभद्रिका। शीलमत्यभिधानेन चैता उपमिता यया ॥१७॥
तस्यैवान्यतरा भार्या जज्ञरे (जज्ञेऽथ?) शीलशालिनी। प्रतीता सूहवा नाम्नी सुभक्ता निजभर्त्तरि ॥१८॥
शीलमत्याः सुतो जातः प्रधनः श्रीकुमारकः। द्वितीयो नागदेवाह्वः प्राप्ता साऽथ दिवौकसम् ॥१९॥

इतश्च—

चान्द्रे कुले श्रीमति सोमकल्पे समुज्ज्वले शुद्धयशोमयूखे।
सद्वृत्तशालिन्यकलङ्कभाजि सदोदयानन्दितसज्जने च ॥२०॥
गणधर इव साक्षाद्गौतमादि व्यहार्षीदतिशयगुणगेहं यो धरायामधृष्यः।
स्वपरसमयसिन्धोः पारदृश्वा प्रसिद्धोऽजनि जितमदनः श्री...............॥२१॥
सुविहितशिरोरत्नं श्रीमज्जिनेश्वरसूरिरित्यगणितभयो दुःसंघीयाद् गणाद् गुणसागरः।
नृपतिविदितः सत्साधूनां प्रवृत्तिविधायकोऽणहिल्लनगरे पट्टे तस्याभवद् बुधसम्मतः ॥२२॥
जाता जिनेश्वरमुनीश्वरमुख्य.............................सा।
आराधनाभिधकृतिं सुरसुन्दरीं च चक्रे क्रमेण हि ययेह नवाङ्गवृत्तीः ॥२३॥
आद्यः श्रीजिनचन्द्रसूरिरखिलाचारप्रचारे चिरं, स्कन्धं बिभ्रददभ्रनिर्मलयशा धौरेय...........।
ख्यातः श्रीजिनभद्रसूरिरपरः प्राज्यप्रभावान्वितस्तस्माद्विस्मयकारिचित्रचरितश्चारित्रचूडामणिः ॥२४॥
प्राप्तो नव्ययुगप्रधानपदवीं तैस्तैर्गुणैर्भारतेऽस्मिन् क्षेत्रेऽभयदेवसूरिरभयो निर्णीतजैनागमः।
मान्योऽन्यस्तु ततः समस्तजगतः प्रोत्सर्पिताऽर्हन्मतः संघस्याभिमतः समुन्नतिमतः श्रीदेवताध्यासितः॥२५॥
पट्टे श्रीहरिभद्रसूरिरभवत् तस्याथ पूज्यक्रमाम्भोजस्याभयदेवसूरिसुगुरोर्नव्याङ्गवृत्तेर्वराम्।
यो व्याख्यां विदधेऽणहिल्लनगरे विद्वन्मुनिष्वग्रतो, विश्राणेषु घनध्वनिः कपरिकाशीतिं चतुःसंयुताम् ॥२६॥
तच्छिष्यः श्रीयशश्चन्द्रसूरिर्भूरिसमश्रियाम्। जातः पट्टे पदे तस्य पद्मदेवमुनीश्वरः ॥२७॥
श्रीमान् समुज्झितसमग्रधनोऽप्युपात्तधर्म्मा न शस्त्रकलितः कलिकाममुक्तः।
कामाकृतिः खलु कलावपि पूर्णकामः, पार्श्वप्रभोरभयसूरिगुरोः प्रसादात् ॥२८॥
बभूव भूमण्डलमण्डनैककीर्त्तिः स्वमूर्त्या जनयन् जनानाम्।
अमन्दमानन्दमिवाऽऽत्मबन्धुरनन्यलावण्यगुणेन सिन्धुः ॥२९॥
चरणकमलभृङ्गस्तस्य निर्मुक्तसङ्गः समजनि जिनभद्राचार्यवर्योऽजितश्रीः।
इति गुरुजनवंशं शीलुका सप्रशंसं स्म कथयनिमित्तं लेखने पुस्तकस्य ॥३०॥

ज्ञात्वा ज्ञानं प्रबोधोदधिशिलकिरणः दुर्गतिद्वाःपिधानं, रागद्वेषद्विपेन्द्रांकुशसदृशमुरोरप्रमादस्य हेतुम्।
सेतुं दुःखाम्बुराशेः प्रथितसुरसुखश्रीविधानं निधानं कल्याणानां प्रधानं शिवपुरगमने पूर्णकुम्भोपमानम् ॥३१॥
त्रिदिवप्रयाणसमये शीलमती प्राह सुसुरभर्त्तारौ। मम श्रेयसेऽथ पुस्तकलेखनविषये प्रयतनीयम् ॥३२॥
तथा श्रीशान्तिनाथस्य बिम्बमुत्तमकारितम्। यतो जन्मान्तरे बोधिं प्राप्नुयाम् विमले कुले ॥३३॥
नागदेवस्य श्रेयोर्थं शीलमत्यास्तथैव च। पार्श्वकुमारकः श्रेष्ठी साधारणसमन्वितः ॥३४॥
चतुःपञ्चमहापुरुपचरिताख्यां देवद्वराम्। लेखयामास सद्वर्णं सुपत्रं पुस्तकं वरम् ॥३५॥
जम्बूद्वीपसुमेरुसागरमहानद्यो महीमण्डले यावद् व्योमतले मृगाङ्कमिहिरौ नक्षत्रमालास्तथा।
राजन्ते जिनशासनोन्नतिकरं मोहव्यपोहाय वः स्तात् तावद् वचनामृतं श्रवणयोः पुष्णन्नघं पुस्तकः ॥३६॥
शीलमत्याः पितृपक्षौ कथ्येते। यथा—
फडुकासनवास्तव्यो अश्वदेवाभिधानकः। वासः समग्रनीतीनां अभूतां द्वौ वटे कुले ॥३७॥

सद्गुनकर्मसंयुक्तः सर्वदेवस्ततोऽपरः। सर्वदेवो दयाधाम दाक्षदाक्षिण्यवानतः ॥३८॥
तृतीयो वाहडो नाम प्रष्टः श्रेष्ठगुणैः सताम्। दृढधर्मानुरागेण शके य श्रेणिकाम्मजम् ॥३९॥
अश्वदेवस्य भार्याऽभूत् नमम्रगुणशालिनी। सूहवेति प्रतिख्याता चन्द्रलेखेव निर्मला ॥४०॥
चत्वारस्तनयाश्चतुर्षु विदिता दिग्मण्डलेष्वेतयोर्जातास्तत्र पवित्रचित्रचरितश्चारित्रिषु प्रीतिमान्।
ज्येष्ठः श्रेष्ठतम नयस्य भवनं लक्ष्मीधरो विश्रुतः, ख्याति विभ्रदद्भ्रगुणत्रयशाना स्वैर्नाङ्कितः स्वान्वयः ॥४१॥
मूलदेव-धवलाख्यौ यशश्चन्द्रस्ततत्त्वयः। त्रिकाल पूजयामासुर्ये त्रिकालविदो जिनान् ॥४२॥
राजीमतीति विख्याता तनया गुणराजिनी। सैव शीलवती जाता पाणिग्रहणादनन्तरम् ॥४३॥
यादृशं पुस्तके दृष्टं तादृशं लिखितं मया। यदि शुद्धमशुद्धं वा मम दोषो न दीयताम् ॥४४॥
भग्नपृष्ठिकटिग्रीवा तथा दृष्टिरधोमुखी। कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥४५॥
शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः। दोषाः प्रयान्तु नाश सर्वत्र सुखी भवतु लोकः ॥
॥छ॥छ॥ मङ्गलं महाश्रीः ॥छ॥छ॥छ॥

क्रमाङ्क २३८

त्रिषष्टिशलाकापुरुषचरित्र तृतीयपर्वपर्यन्त-शीतलनाथस्वामिचरित्र पर्यंत पत्र २४८। **भा.** सं.। **क.** हेमचंद्राचार्य। **ले. सं.** अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१×२॥.। **प्रथमपर्व** पत्र १-१२३। **द्वितीयपर्व** १२४-२०६। **तृतीयपर्व** पत्र २०७-२४८।

क्रमाङ्क २३९

(१) **त्रिषष्टिशलाकापुरुषचरित्र प्रथमपर्व** पत्र १-१३१।
(२) ,, ,, **दशमपर्व** पत्र १३२-३०९। **भा.** सं.। **क.** आचार्य हेमचंद्र। **ग्रं.** १३८३६। **ले. सं.** १३१९। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ३१×२।.।

आ प्रतिनां घणां पानांना टुकडा थयेला छे अने घणां पानां खूटे छे।

अन्त—

॥ग्रं. ५२०० ॥छ॥ मंगलं महाश्रीः ॥ शुभं भवतु लेखक-पाठका-ऽवधारणादिसमस्तजनश्रावकाणां ॥छ॥ सं. १३१९ वर्षे माघवदि १० शुक्रे ठः विक्रमसिंहेन पुस्तकमिदं लिखितमिति ॥छ॥छ॥

सद्वृत्तः सरलस्तुंगः शोभितश्च सुपर्वभिः। श्रीमान् प्राग्वाटवंशोऽस्ति भूभृल्लभ्यमहोदयः ॥ १ ॥
सद्गुरुस्तत्र गतत्रासो मुक्तामणिरिवामलः। मंत्री कुमरसिंहस्त्रिभुवनदेवी तत्प्रिया ॥ २ ॥
आसराजामृतपालौ तत्पुत्रौ नयशालिनौ। पुत्री च सुभटादेवी सुभटा धर्मकर्मसु ॥ ३ ॥
प्रियाऽनुपमदेवीति ज्येष्ठस्यानुपमा गुणैः। सुता च पद्मलदेवी धर्मपद्मसरालिका ॥ ४ ॥
कनिष्ठस्यामृतदेवी भार्याऽऽल्हाकश्च तत्सुतः। जज्ञे केल्हणदेवीति द्वितीया तस्य वल्लभा ॥ ५ ॥
मंत्री कुमरसिंहोऽथ सकुटुम्बोऽपि शुद्धधीः। क्रियायाः प्रथमं ज्ञानं श्रुत्वेति सुगुरोर्मुखात् ॥ ६ ॥
त्रिषष्टिशलाकापुंसां प्रथमान्त्यार्हत्पुस्तकम्। अलेखयदिदं धन्यो मुक्तिश्रीशासनोपमम् ॥ ७ ॥
द्वियुग्मार्कींदुसंख्याने १३२२ वर्षे श्रीसंघमध्यतः। व्याख्यानयच्च तं भक्त्या श्रीमद्देवेन्द्रसूरिभिः ॥ ८ ॥
यावद् व्योमसरःक्रोडे राजहंसौ विराजतः। तावत् कृतिकृतानन्दो नन्दतादेष पुस्तकः ॥ ९ ॥

७०॥ संवत् १३४३ आषाढ सुदि १ साधुवरदेवसुतेन सकलदिग्वलयविख्यातावदातकीर्तिकौमुदीविजितामचंद्र-साधुश्रीचंद्रभ्राता अमलगुणरत्नरोहणेन साधुमहणश्रावकेण स्वेन श्रीयुगादिदेवचरित्रादिपुस्तकं गृहीत्वा श्रीजिन-चन्द्रसूरिसुगुरुभ्यः प्रदत्तं व्याख्या[पितं च ॥]

क्रमाङ्क २४०

त्रिषष्टिशलाकापुरुषचरित्र तृतीयपर्व संभवनाथचरित्रथी शीतलनाथचरित्र पर्यन्त पत्र २-१४० । **भा.** सं. । **क.** आचार्य हेमचन्द्र । **ले. सं.** अनु. १३मी शताब्दी । **संद्द.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १६×२.

क्रमाङ्क २४१

त्रिषष्टिशलाकापुरुषचरित्र महाकाव्य द्वितीयतृतीयपर्व-संभवनाथ-अभिनन्दनचरित पत्र १०१ । **भा.** सं. । **क.** हेमचन्द्राचार्य । **ले. सं.** अनु. १३मी शताब्दी उत्तरार्ध । **संद्द.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १६×२. । पत्र ६१मुं नथी ।

क्रमाङ्क २४२

त्रिषष्टिशलाकापुरुषचरित्र सप्तमपर्व-रामायण प्रकीर्णक पत्र । **भा.** सं. । **क.** हेमचन्द्राचार्य । **ले. सं.** अनु. १४मी शताब्दी । **संद्द.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४॥×२।.।

आ पोथीमां २५ जेटलां पत्र छे ।

क्रमाङ्क २४३

कथाकोश सटीक त्रूटक अपूर्ण पत्र १८५-३३९ । **भा.** प्रा. । **मू. क.** **जिनेश्वरसूरि** । **ले. सं.** अनु. १३ मी शताब्दी पूर्वार्ध । **संद्द.** जीर्ण । **द.** श्रेष्ठ । **लं. प.** १२।×२.।

आ पोथीमां लगभग १०० जेटलां पानां छे ।

क्रमाङ्क २४४

त्रिषष्टिशलाकापुरुषचरित्र अष्टमपर्व नेमिनाथ चरित अपूर्ण पत्र २६२ । **भा.** सं. । **क.** हेमचन्द्रसूरि । **ले. सं.** अनु. १४मी शताब्दी । **संद्द.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** २०।×२।

पत्र १लामां नेमिनाथ भगवाननुं चित्र छे अने पत्र २जामां आचार्य शिष्यने वाचना आपे छे ते भावनुं सामान्य कलामय चित्र छे । पत्र २५२थी ६१ नथी ।

क्रमाङ्क २४५

जंवूस्वामिचरित्र गाथावद्ध पत्र ३२६ । **भा.** प्रा. । **क.** गुणपाल । **ले. सं.** अनु. १४मी शताब्दी । **संद्द.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १३×२. । पत्र ३६१ मुं नथी ।

आदि—॥ नमो वीतरागाय ॥

भगनीभिर्तु **स**द्दोच्चनागरिकया **वि**द्याधरी-**म**ध्यमाभ्यां शाखाभिरिलातलं परिपुनत्यावार्द्धि या पप्रथे ॥ ८ ॥
उदन्वत्कल्पायामिह जिनपदोपास्तिरसिकं, सदा मन्दक्ष्मानन्दनकविमहासौम्यगुरुभृत्।
दधत्प्रादक्षिण्यं सततमचले तत्र च शिवे, कुलं **चान्द्रं** सान्द्रप्रभमुदयमासादयदथ ॥ ९ ॥

तत्र ज्योतिःस्वरूपाः प्रतिपदममृतश्राविणः श्रीमुनीन्द्रा,
नैकेऽनेके प्रथीयोऽतिशयमहिमभिर्विश्वमाभासयन्तः।
तद्वंश्यो **दे**वसूरिस्तदनु समुदगा**न्ने**मिचन्द्रो यतीन्द्रः,
श्रीमा**नु**द्योतनोऽतः परमगुरुपदं द्योतयामास पृथ्व्याम् ॥ १० ॥

को नामामुत [illegible] वर्णित [illegible] [illegible] [illegible],
सयो [illegible] प्रणोऽस्य [illegible] [illegible] [illegible] [illegible] ।
यो न्यांसीद् [illegible] [illegible] [illegible] [illegible],
[illegible] श्रीवर्द्धमानः स पदं [illegible] सूरिराजा [illegible] ॥ ११ ॥

चातुर्वर्ण्य[illegible] [illegible] श्रीजिन[illegible] [illegible] न प्रभुम् ।
सद्यः सोदरबुद्धिसागर[illegible] प्रागजन्, स श्रीसूरिजिनेश्वरः [illegible] [illegible] ॥ १२ ॥
मिथ्याज्ञानदुरन्तशर्वरभरा [illegible] [illegible], [illegible] ।
यः श्रीदुर्लभराट्सभे [illegible] [illegible] [illegible] [illegible] ॥ १३ ॥
तर्कादीन् बहु यः [illegible] [illegible] [illegible] स जिनचन्द्रो [illegible]।
यच्छिष्यान्तिपदुत[illegible] [illegible] [illegible] [illegible] कृतम् ॥१४॥
ज्योतिश्चक्र [illegible] शिष्यपट्टे [illegible] [illegible] [illegible] ।
तत्राऽऽयो जिनचन्द्रसूरिरभवत् संवेगतोतरां, [illegible] [illegible] [illegible] [illegible] यः ॥१५॥
अन्यश्चाऽभयदेवसूरिरस्[illegible] [illegible] [illegible] प्रसन्नाभिन ।
अत्यन्तं सहचारिणीं प्रियतमां तस्या न [illegible], [illegible] [illegible] यः प्रासीसदत् सर्वतः ॥१६॥
साक्षाच्छासनदेवतावचनतः प्रस्थाय [illegible], [illegible] [illegible] [illegible] यः ।
सेडीसरस्तटिनीतटे प्रकटयामासेद् [illegible] [illegible] [illegible] च पार्श्वप्रभुम् ॥१७॥
मुक्त्वा काककुलायवज्जनिगुरुं [illegible] चैत्यवास[illegible], यः [illegible] [illegible] तत्र प्रभौ ।
माकन्दे परपुष्टसाधुकुलमाशिश्राय सत्तिरुद्धये, स श्रीमान् जिनवल्लभस्तान उदैद् विश्वत्रयीवल्लभः ॥१८॥
यः श्रीमान् मन्दरागो विबुधसमुदयैः पर्युपास्यः समन्तात्, सिद्धान्तक्षीरवार्द्धेरतिदुरधिगमागाधमध्यं विगाह्य ।
स्राक् कर्मग्रन्थ-पिण्डप्रकरणमुखसद्ग्रन्थपीयूषकुम्भैः, प्रश्नैरत्नैश्च बिभ्रन् सकलगुणनसोऽभूत् क्षमाभृद्वतंसः ॥१९॥
तत्पट्टे जिनदत्तसूरिरुदभूत् श्रीकृष्णमूर्त्तिं दधद्, मिथ्यादित्रिपदीं य एष नरकप्रष्टान् नृपद्वेषिणः ।
बिभ्राणान् भुवि भावभासुरमपाचक्रे परानित्यतः, स्थानेऽसेव्यत यो निदेशमनिशं दिष्टयेच्छुभिर्दैवतैः ॥२०॥

तदनु च जिनचन्द्रसूरिसिंहः समजनि शैशवशालिनाऽपि येन ।
प्रबलमदभरान्धवादिदंतावलदलना खलु लीलयैव चक्रे ॥२१॥

सकलज्योतिरुदयलक्ष्मीकृतिकामिकतीर्थमद्भुतं शुभतमसततभाविपूर्वस्थितिसुभगम्भावुकोन्नतम् ।
तत्पदमेतदुदयधरणीधरमलमकृतातिभास्वरस्त्रिभुवनरजनैकधामर्द्धिर्जिनपतिसूरिभास्करः ॥२२॥

यस्याग्रे न परो गुरुर्न च कविर्नो वा बुधः प्राद्युतत्,
प्रागल्भी न कलावतो न तमसः क्षुद्रग्रहाणां न च ।
वादीन्द्राश्च भयंकरा अपि ययुः स्राग् घूकवन्मूकतां,
धाम्नां धाम य एक एव भुवने किन्त्वद्विदीपेऽभितः ॥२३॥
सूरिः श्रीसर्वदेवः सहविजयपदी देवसूरिः कृतीन्द्र-
स्तर्कोद्योद्यानपालः स जगति जिनपालोऽभिषेकावतंसः ।
श्रीमान् सूरप्रभः संघहितयुत उपाध्याय इत्येवमाद्या,
विद्यानद्यर्णवाः क्ष्मातलमतिलकयन् यस्य शिष्यांशुदण्डाः ॥२४॥
श्रसंघपट्टकपरिष्कृतपश्वलिङ्ग्याः, सिद्धान्तदिव्यसरसीसरसीरुहिण्याः ।
अश्रान्तसन्तमससंहतिहृद्द्रवीभिर्विस्तार्य यः परिमलं प्रकटीचकार ॥२५॥

त्रिभुवनसुभगम्भविष्णुमूर्त्तिः प्रतिदिशमेदुरकीर्त्तिकौमुदीकः ।
अयमुदयमिहाऽऽरराद राद्यस्तदनु जिनेश्वरसूरिपूर्णिमेन्दुः ॥२६॥
अनन्तान् सिद्धान्तान् बहुतिथमिदं लक्षणविदं, तमस्यर्कास्तर्कान् जननि ! सदलंकारपटलम् ।
कथं धत्से स्वच्छे गिरमिति नुवन् ह्यतनवं, तदास्यं यस्यास्यं तदनु कुतुकाद्वैतमचकात् ॥२७॥
यस्यास्ये शारदाऽऽस्ते ध्रुवमयमिति निर्माति राद्यः प्रबन्धं,
वाक्ये वाचस्पतिश्च स्पृहयति विबुधश्रेणिरुच्चैस्तदस्मै ।
हस्ते सर्वाऽपि सिद्धिस्तदिह शिरसि सत्येव सा स्फूर्त्तिमीर्त्ते,
मूर्त्तौ पर्वेन्दुबिम्बं क्षिपति जनदृशोस्तेन पीयूषमेषा ॥२८॥
तस्यास्य स्वगुरोः परस्वसमयालंकारतर्कादिसद्विद्यास्वर्णमहाखनेरविरतोपास्त्या सुवर्णोत्करान् ।
प्राप्य श्रीजिनरत्नसूरिरुदयत्सारस्वतप्रातिभोऽसौ लक्ष्मीतिलको गणिश्च किमपि त्रैविद्यचूडामणिः ॥२९॥
श्रीलीलास्पदपद्मदेवतनयक्षेमंधरोद्धान्वयक्षीराम्भोधिसुधांशुना जगधरश्राद्धेशितुः सूनुना ।
श्रीप्रह्लादनपत्तने भुवनपालेनामुना साधुना, पद्माकस्य सुतेन साढलमहाश्राद्धेन चाभ्यर्थितः ॥३०॥
स्वपूर्वजश्रीमदशोकचन्द्र-श्रीनेमिचन्द्रादिमसूत्रधार- ।
दृब्धोत्तराध्यायविवृतिसूत्रानुसारतश्चार्वतिसंघटय्य ॥३१॥
यस्मिन् भान्त्यनुपर्वकाननमहो श्रीसर्गसिद्धालयाश्चत्वारः स्फुरदद्भुतायतनभूः सर्गोऽन्तिमश्चूलिका ।
विष्वग्वैबुधहृन्मनोरमतमं प्रत्येकबुद्धर्षिराट्चातुर्यस्य चरित्रमेतदतुलं चक्रे सुवर्णाचलम् ॥३२॥
चतुर्भिः कलापकं ॥
श्रीमत्सूरिजिनेश्वरप्रभृतिभिः साहित्यसिंधोः पिबैः, श्रीद्विव्याकरणैः(?)सुधीभिरमलीचक्रे प्रयत्नाच्च तत् ।
प्रेक्षावत्प्रवरैः परैश्च विमलीकार्यं विचार्याऽऽदराद् , रुद्राग्नींदु १३११ शरत्तपस्यविमलैकादश्यहेऽपूरि च ॥३३॥
सोदर्यौ गणिवीर-कीर्त्तिकलशौ धुर्यौ मनीषावतामात्मोपज्ञवदादरेण तदिदं श्रेयोमुखं स्वात्मनः ।
आदर्शे प्रथमे समक्रमयतां निर्वर्णनायाभितो, मानं स्पष्टमनुष्टुभाऽयुतमिह त्रिंशैकशत्या युतम् ॥३४॥
अङ्कतोऽपि १०१३० ॥
हारस्तेजस्विसारः किमपि सरभसान् रत्नवाणिज्यभाजः, सद्यो यद्वद्विदध्यान्न चणकवणिजोऽप्येवमेतत् प्रतीतम् ।
तच्चेच्चेतस्सु सौधद्रव इव सहृदां मद्वचस्तत्किमन्यैः, र्यद्वाऽन्येऽप्येतदुक्त्या सहृद इदमतः सार्विकं सौधसत्रम् ॥३५॥
मध्येस्वर्गितरङ्गिणीपरिवृढोद्यत्पद्मपद्माकरं, क्षोणीपृष्ठवक्स्थले नवनवारामाभिरामेऽभितः ।
यावद्देवगृहश्रियं कलयति स्वर्धामलीलाचलस्तावच्चित्रमिदं चरित्रमुदियाद् विश्वस्य कर्णोत्सवः ॥३६॥
गुरुगिरिविहितास्थः पुण्यपर्वप्रवालः, सुभगविमलमुक्ताशब्दधर्मैकहेतुः ।
सफलमृदुलताढ्यः स्फारतेजोविभूतिस्त्रिजगति वरिवर्त्ति श्रीमदूकेशवंशः ॥१॥
साधुस्तत्रास्त्यसाढः किमपि परममाहेश्वरः श्रीनिवासः,
प्रेक्ष्य व्यासस्य दौष्ट्यं समजनि सकुलः श्राद्धरत्नं क्षणाद् यः ।
तत्सूनुर्जामुणागो निरवधिविभवस्तस्य वोहित्थसाधु-
स्तत्पुत्रः पद्मदेवोऽग्रजनन इतरः शुद्धधीर्वील्हनामा ॥२॥
दीपः प्रदीपादिव पद्मदेवात् क्षेमंधरोऽभूदनुरूपरूपः ।
यद्बाहुगेहं गुणलिप्सयेव चक्रे रमा साध्व्यपि नित्यवासं ॥ ३ ॥
महेन्द्र-प्रद्युम्नौ यतिपरिवृढौ स्वाग्रजसुतौ, य उत्प्रेक्ष्योत्सूत्राचरितभणिती सात्त्विकमणिः ।
परौ वा संत्यज्याऽऽश्रयत जिनचंद्रं गुरुमथो, महेन्द्रप्रद्युम्नौ न हृदि जिनचंद्रेक्षणकणे ॥४॥
यो व्यातनोदजयमेरुपुरे पुरस्तात् पार्श्वप्रभोः किमपि मण्डपमद्भुतश्रि ।

क्रमाङ्क २७५

सामाचारी बीजकसह पत्र १८८। **भा.** सं.। **क.** तिलकाचार्य। **ले. सं.** १४०९। **संद्द** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ११×२।

अन्त—

इति श्रीतिलकाचार्यविरचिता सामाचारी समाप्ता ॥छ॥श्रीः॥ संवत् १४०९ वर्षे पोष शुदि १० रवौ श्रीपूर्णिमापक्षीय प्रथमशाषीय। श्रीसर्व्वाणंदसूरिपट्टे श्रीजयसमुद्रसूरिपट्टे श्रीगुणप्रभसूरि शिष्य वीरचंद्रेन वचावाग्रामे सामाचारीपुस्तिका लिखिता ॥छ॥श्रीः॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया। यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥१॥
भग्नपृष्टिकटिग्रीवा हन्युमन्युस्तथैव च। कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥२॥
उदकानलचौरेभ्यो मूषकेभ्यस्तथैव च। कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥३॥

क्रमाङ्क २७६

अभयकुमारचरित्र पत्र २२०। **भा.** सं.। **क.** चंद्रतिलकोपाध्याय। **ग्रं.** ८९६४। **र. सं.** १३१२। **ले. सं.** अनु. १५ मी शताब्दी। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १६॥×२।।

पत्र २८, ३४, ५४, ५५, १११, १४२. १४४ नथी।

क्रमाङ्क २७७

अभयकुमारचरित्र त्रूटक पत्र २९४। **भा.** सं.। **ले. सं.** अनु. १५ मी शताब्दी। **संद्द.** जीर्णप्राय। **द.** श्रेष्ठ। **लं. प.** १८×२।। वचमां केटलांक पानां नथी।

क्रमाङ्क २७८

ऋषिमंडलप्रकरण वृत्तिसह प्रथमखंड पत्र १९९। **भा.** प्रा. सं.। **ले. सं.** १३८०। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १७॥×२।

अन्त—संवत् १३८० आषाढ सुदि ५ भौमे ॥छ॥

क्रमाङ्क २७९

(१) **आशापल्लीयउदयनविहारस्थजिनबिम्बअवन्ध्यत्वमतव्यवस्थापन** पत्र २-४२। **भा.** सं.। **क.** प्रद्युम्नसूरि। पत्र ३१-३२ नथी

आदि—

स्याद्वादामृतसंसिक्ताः कदाग्रहविषापहाः। वन्दे जैनेश्वरीर्वाचः परास्तसुमनःशुचः ॥१॥

अन्त—

ततश्च निःशेषदोषप्रमोषपोषितः परतीर्थिकापरिगृहीतत्वे सति श्वेताम्बरयतिप्रतिष्ठिताईद्बिम्बत्वादिति हेतुः स्वसाध्यं साधयन्न गीर्वाणप्रभुणाऽप्यपहस्तयितुं पार्यते इति। तथा च—

औष्ट्रिकमतकालकूटकुम्भो भुवनातङ्कनिमित्तमत्र योऽभूत्।
उपपत्तिपरम्पराप्रहारैः सोऽयमभञ्जि सभासदां समक्षम् ॥१॥

आसीत् चर्वितवादिगर्वगरिमा श्रीदेवसूरिप्रभुस्तत्पादाब्जमधुव्रतः समजनि श्रीमन्महेन्द्रप्रभुः।
शिष्यस्तस्य पितुः प्रबोधविधये सिद्धान्तसिन्धोः सुधामुद्धृत्यास्खलितं विचारमचिरात् प्रद्युम्नसूरिर्व्यधात्॥छ॥

आदि—

इह च यद्यप्यार्यसम्भूतविजयादीन् सूत्रकारो भगवानग्रे प्रणंस्यति, तेषामपि चरितानां यशोभद्रयुगप्रवरचरितानुषक्तत्वेन तान्यप्यत्रैव प्रतिपादितानीति । अत्र च यशोभद्राचार्यस्य गृहस्थपर्यायो द्वाविंशति २२ वर्षाणि, व्रतपर्यायश्चतुर्दश १४ वर्षाणि, युगप्रधानपदं पञ्चाशत् ५० वर्षाणि, सर्वायुष्कं षडशीति ८६ वर्षाणि मास ४ चतुष्कं दिन ४ चतुष्टयं च । तथा सम्भूतविजयाचार्याणां द्विचत्वारिंशत् ४२ वर्षाणि गृहस्थपर्यायः, चत्वारिंशत् ४० वर्षाणि व्रतपर्यायः, अष्टौ ८ वर्षाणि युगप्रधानपदम्, सर्वायुः ९० नवतिवर्षाणि मास ५ पंचकं दिन ५ पञ्चकं च ॥

अन्त—

इति श्रीजिनदत्तसूरियुगप्रवरविरचितस्य श्रीगणधरसार्धशतकाख्यप्रकरणस्य वृत्तिः समाप्ता ॥छ॥

जज्ञे श्रीजिनदत्तसूरिसुगुरोः पट्टाचलोद्योतनस्फूर्ज्जज्ज्ञानरुचिप्रतानतनुतानीता नतोद्यत्तमाः ।
सूरिः श्रीजिनचन्द्र इत्यपमलप्राग्घसुवृत्तातुलः, सौन्दर्यादिकवर्यनिर्मलगुणैश्चित्रीयितक्ष्मातलः ॥१॥
तस्याऽभूद् भूपमूर्द्धोद्भटमुकुटतटीकोटिघृष्टांह्रिपद्मः, शिष्यः शस्यो बुधौघैर्जिनपतिरिति सन्नामतः सूरिरुच्चैः ।
विख्यातः क्षोणिपीठे सुविहितयतिराट्चक्रचक्राधिनाथश्छन्दोलङ्कारतर्कप्रमुखनिखिलसद्ग्रन्थविस्तारितार्थः ॥२॥

प्रतिदिनमपि सिद्धिप्रेयसीसंगसौख्यानुगतनवकथास्वाक्षिप्तचित्तं निरीक्ष्य ।
क्षणमपि दयितं तज्ज्ञानचारित्रलक्ष्मौ मुमुचतुरुदिता......त्मभीत्येव यं च ॥३॥
सगुणनिजपतीनां कालदोषादभावे ध्रुवमतिगुरुशोकात् सर्वविद्याः समेत्य ।
वत हृदयसमुद्रेऽस्ताघगाम्भीर्यभाजि प्रकटितगुरुसत्त्वे यस्य सद्यो निपेतुः ॥४॥

तस्य स्वाचारनिष्ठाप्रसरगुरुतरावद्धकक्षस्य शश्वत्, निःक्लेशः शिष्यलेशः सुमतिगणिरिति ज्याप्रसिद्धाभिधानः ।
निर्देशात् सद्गुरूणां सुनिविडजडताश्लिष्टधीरप्यधीताऽल्पग्रंथस्तत्प्रसादाद् व्यरचयदमलां वृत्तिमेतां सुचेताः ॥५॥
प्रारब्धा श्रीस्तम्भतीर्थवेलाकूले कुले श्रियाम् । मण्डपदुर्गे विबुधैः स्वर्गे चेयं समर्थिता ॥६॥

तथा प्रायः—

प्रथमादर्शे लिखिता वृत्तिरियं श्रीजिनेश्वरगुरूणाम् । अस्मद्गुरुगुरुपट्टप्रतिष्ठितानां प्रभाववताम् ॥७॥
शिष्येण परोपकृतौ तपसि च बद्धोद्यमेन सदमेन । कायोत्सर्गेऽतन्द्रेण साधुना कनकचन्द्रेण ॥८॥

किञ्चिच्च—

हेमप्रभः शालिभद्रोऽमृतमूर्त्तिरिहाभवन् । लेखनात् पट्टिकामार्ष्टेर्घुंटनाच्चोपकारिणः ॥९॥
इह यदनवबोधाद्राभसिक्यान्मया वा उत पतदुपयोगादन्यथा किञ्चिदुक्तम् ।
तदलमनलसाः स्राग् ज्ञातसिद्धान्ततत्त्वा, मयकि कृतकृपाः श्रीधीधनाः शोधयन्तु ॥१०॥
कृत्वेमां विवृतिं यत्पुण्यं समुपार्जितं मया किमपि । तेन विधिधर्मरागी भूयाल्लोकः समस्तोऽयम् ॥११॥
शरनिधिदिनकरसंख्ये १२९५ विक्रमवर्षे गुरौ द्वितीयायाम् । राधे पूर्णीभूता वृत्तिरियं नन्दतात् सुचिरम् ॥१२॥
इति श्रीजिनपतिसूरियुगप्रवरविनेयपण्डितसुमतिगणिनामधेयविरचिता श्रीगणधरसार्द्धशतकवृत्तिः समाप्ता ॥छ॥

मङ्गलमस्तु समस्तसंघस्येति ॥छ॥ संवत् १२९५ वर्षे श्रीमद्धारापुरीनलकच्छकादिकनविहारक्रमेण सुमतिगणिना श्रीमण्डपदुर्गे वृत्तिरियं समर्थितेति । ग्रथाग्रं १२१०५ श्लोकमानेन ॥छ॥ॐ॥छ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
भग्नपृष्ठिकटिग्रीवा स्तब्धदृष्टिरधोमुखः । कष्टेन लिखितं शास्त्रं यत्नेन प्रतिपालयेत् ॥छ॥
विदुषा जल्हणेनेदं जिनपादाम्बुजालिना । प्रस्पष्टं लिखितं शास्त्रं वन्द्यं कर्मक्षयप्रदम् ॥शुभं भवतु ॥छ॥

क्रमाङ्क २८२

सुखबोधासामाचारी पत्र १११ । **भा.** प्रा. । **क.** श्रीचंद्रसूरि । **ग्रं.** १३११ । **ले. सं.** अनु. १४ मी शताब्दी प्रारंभ । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १५×२. । पत्र १–५, ८१, ९२–९५, ९७ नथी ।

आदि—

इह च यद्यप्यार्यसम्भूतविजयादीन् सूत्रकारो भगवानग्रे प्रणंस्यति, तेषामपि चरितानां यशोभद्रयुगप्रवरचरितानुपक्तत्वेन तान्यप्यत्रैव प्रतिपादितानीति। अत्र च यशोभद्राचार्यस्य गृहस्थपर्यायो द्वाविंशति २२ वर्षाणि, व्रतपर्यायश्चतुर्दश १४ वर्षाणि, युगप्रधानपदं पञ्चाशत् ५० वर्षाणि, सर्वायुष्कं षडशीति ८६ वर्षाणि मास ४ चतुष्कं दिन ४ चतुष्टयं च। तथा सम्भूतविजयाचार्याणां द्विचत्वारिंशत् ४२ वर्षाणि गृहस्थपर्यायः, चत्वारिंशत् ४० वर्षाणि व्रतपर्यायः, अष्टौ ८ वर्षाणि युगप्रधानपदम्, सर्वायुः ९० नवतिवर्षाणि मास ५ पंचकं दिन ५ पञ्चकं च ॥

अन्त—

इति श्रीजिनदत्तसूरियुगप्रवरविरचितस्य श्रीगणधरसार्धशतकाख्यप्रकरणस्य वृत्तिः समाप्ता ॥छ॥

जज्ञे श्रीजिनदत्तसूरिसुगुरोः पट्टाचलोद्योतनस्फूर्ज्जज्ज्ञानरुचिप्रतानतनुतानीता नतोद्यत्तमाः ।
सूरिः श्रीजिनचन्द्र इत्यपमलप्राज्ञसुवृत्तातुलः, सौन्दर्यादिकवर्यनिर्मलगुणैश्चित्रीयितक्ष्मातलः ॥१॥
तस्याऽभूद् भूपमूर्द्धोद्भटमुकुटतटीकोटिघृष्टांह्रिपद्मः, शिष्यः शस्यो बुधौघैर्जिनपतिरिति सन्नामतः सूरिरुच्चैः ।
विख्यातः क्षोणिपीठे सुविहितयतिराट्चक्रचक्राधिनाथश्छन्दोलङ्कारतर्कप्रमुखनिखिलसद्ग्रन्थविस्तारितार्थः ॥२॥

प्रतिदिनमपि सिद्धिप्रेयसीसंगसौख्यानुगतनवकथास्वाक्षिप्तचित्तं निरीक्ष्य ।
क्षणमपि दयितं तज्ज्ञानचारित्रलक्ष्मौ मुमुचतुरुदिता......तमभीत्येव यं च ॥३॥
सगुणनिजपतीनां कालदोषादभावे ध्रुवमतिगुरुशोकात् सर्वविद्याः समेत्य ।
वत हृदयसमुद्रेऽस्ताघगाम्भीर्यभाजि प्रकटितगुरुसत्त्वे यस्य सद्यो निपेतुः ॥४॥

तस्य स्वाचारनिष्ठाप्रसरगुरुतरावद्धकक्षस्य शश्वत्, निःक्लेशः शिष्यलेशः सुमतिगणिरिति ज्याप्रसिद्धाभिधानः ।
निर्देशात् सद्गुरूणां सुनिविडजडताश्लिष्टधीरप्यधीताऽल्पग्रंथस्तत्प्रसादाद् व्यरचयदमलां वृत्तिमेतां सुचेताः ॥५॥
प्रारब्धा श्रीस्तम्भतीर्थवेलाकूले कुले श्रियाम् । मण्डपदुर्गे विबुधैः स्वर्गे चेयं समर्थिता ॥६॥

तथा प्रायः—

प्रथमादर्शे लिखिता वृत्तिरियं श्रीजिनेश्वरगुरूणाम्। अस्मद्गुरुगुरुपट्टप्रतिष्ठितानां प्रभाववताम् ॥७॥
शिष्येण परोपकृतौ तपसि च बद्धोद्यमेन सदमेन। कायोत्सर्गेऽतन्द्रेण साधुना कनकचन्द्रेण ॥८॥

किञ्चिच—

हेमप्रभः शालिभद्रोऽमृतमूर्त्तिरिहाभवन्। लेखनात् पट्टिकामार्ष्टेर्घुंटनाच्चोपकारिणः ॥९॥
इह यदनवबोधाद्वाभसिक्यान्मया वा उत पतदुपयोगादन्यथा किञ्चिदुक्तम् ।
तदलमनलसाः स्राग् ज्ञातसिद्धान्ततत्त्वा, मयकि कृतकृपाः श्रीधीधनाः शोधयन्तु ॥१०॥
कृत्वेमां विवृतिं यत्पुण्यं समुपार्जितं मया किमपि। तेन विधिधर्मरागी भूयाल्लोकः समस्तोऽयम् ॥११॥
शरनिधिदिनकरसंख्ये १२९५ विक्रमवर्षे गुरौ द्वितीयायाम्। राधे पूर्णीभूता वृत्तिरियं नन्दतात् सुचिरम् ॥१२॥
इति श्रीजिनपतिसूरियुगप्रवरविनेयपण्डितसुमतिगणिनामधेयविरचिता श्रीगणधरसार्द्धशतकवृत्तिः समाप्ता ॥छ॥

मङ्गलमस्तु समस्तसंघस्येति ॥छ॥ संवत् १२९५ वर्षे श्रीमद्धारापुरीनलकच्छकादिकृतविहारक्रमेण सुमतिगणिना श्रीमण्डपदुर्गे वृत्तिरियं समर्थितेति। ग्रथाग्रं १२१०५ श्लोकमानेन ॥छ॥ॐ॥छ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया। यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
भग्नपृष्ठिकटिग्रीवा स्तब्धदृष्टिरधोमुखः। कष्टेन लिखितं शास्त्रं यत्नेन प्रतिपालयेत् ॥छ॥
विदुषा जल्हणेनेदं जिनपादाम्बुजालिना। प्रस्पष्टं लिखितं शास्त्रं वन्द्यं कर्मक्षयप्रदम् ॥शुभं भवतु ॥छ॥

क्रमाङ्क २८२

सुखबोधासामाचारी पत्र १११। **भा.** प्रा.। **क.** श्रीचंद्रसूरि। **ग्रं.** १३११। **ले. सं.** अनु. १४ मी शताब्दी प्रारंभ। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५×२.। पत्र १-५, ८१, ९२-९५, ९७ नथी।

(२) आशापल्लीयउदयनविहारस्थजिनबिम्बावन्द्यत्वमतनिरास (अपूर्ण) पत्र ४३-११० । भा. सं.। ले. सं. अनु. १४ मी शताब्दी। संह. श्रेष्ठ। द. श्रेष्ठ। लं. प. १३॥×२।। पत्र ८४-८६ नथी

आदि—

५० ॥यस्यान्तः[illegible] [illegible], [illegible] [illegible] [illegible]।
शंके तत्तदुदग्रविग्रहभवोपग्राहिकर्मद्विपाऽग्मा [illegible] [illegible] [illegible] [illegible] न वीरो जिनः ॥१॥

इह हि भगवदागमेषु [illegible] [illegible] [illegible] [illegible] अस्पर्शितया कदभिनिवेशावेशास्कन्दितमानसा [illegible] [illegible] [illegible] 'आयत-नमेवार्हद्विम्बम् न तु कथञ्चिदनायतनमपीति [illegible] [illegible] [illegible] [illegible] श्रीमदाशापल्लीपुरेऽसंख्यसंख्यावत्[illegible] [illegible] [illegible] सिद्धान्तरहस्यसुधारसं पायिता अपि भाग्य[illegible] [illegible] [illegible] [illegible] स्वयमेव प्रकृतप्रमेयस्य सभानर्हतां सूचयन्त आजन्मप्रपीनोत्[illegible] [illegible] [illegible] चिकीर्षन्तः प्रकृतिस्वच्छस्य कज्जलसन्निधेः कालिम्नावभासिनः स्फटिक[illegible] [illegible] [illegible] प्रतिभास्वरस्यापि तस्यायतनत्वसिद्ध्येऽनुमानप्रमाणमेवमुपन्यस्यन्ति-आशाप[illegible] [illegible] विहारान्तर्व-र्तीन्यर्हद्विम्बानि यतिगृहिणां वन्दनीयानि, परतीर्थिकापरिगृहीतत्वे सति [illegible] [illegible]। यदेवं तदेवं यथोभयवादिसम्प्रतिपन्नमनिश्राकृतं, तथा चैतानि, तस्माद् वन्दनीयानि इति ॥

अन्त—

उद्धृत्य श्रुतवारिधेर्निरवधेः प्राक्सूरिवृन्दारकैर्न्यस्ता [illegible] [illegible] [illegible]।
तामेतां ग्रसमान उद्धततमोरूपो निरूप्यैकको, निष्कण्ठः कठिनेतरा[illegible](ति)राचकेण [illegible](के) बुधाः॥
पूज्यश्रीजिनवल्लभप्रभुपदा[illegible] [illegible] (तः)।
शिष्यः श्रीजिनचन्द्रसूरिसुगुरोर्विद्यासरस्वानिति, [illegible] [illegible] सूरिः प्रबोधोदयम् ॥

क्रमाङ्क २८०

गणधरसार्द्धशतकप्रकरण वृत्तिसह द्वितीय खंड पत्र ३१६। बीजी गाथाथी शरु। **भा.** प्रा. सं.। **मू. क.** जिनदत्तसूरि। **वृ. क.** सुमतिगणि। **ले. सं.** अनु. १४ मी शताब्दी प्रारंभ। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५॥×२

आदि—

आद्यजिनप्रथमगणधरनमस्कारमाविष्कृत्येदानीं शेषतीर्थकृदशेषगणधारिणः स्तुवन्नाह ॥
अजियाइजिणिंदाणं जणियाणंदाण पणयपाणीणं। थुणिणोऽवीणमणो हं गणहारीणं गुणगणोहं ॥ २ ॥

अन्त—

इति श्रीयशोभद्राचार्य-संभूतविजयाचार्य-भद्रबाहुस्वाम्याचार्य-स्थूलभद्रस्वाम्याचार्याणां युगप्रधानानां चरितानि समाप्तानि ॥१३॥छ॥ॐ॥ शुभं भवतु ॥छ॥छ॥

क्रमाङ्क २८१

गणधरसार्द्धशतकप्रकरण वृत्तिसह तृतीयखंड पत्र ३९३। **भा.** प्रा. सं.। **मू. क.** जिन-दत्तसूरि। **वृ. क.** सुमतिगणि। **र. सं.** १२९५। **ग्रं.** १२१०५। **ले. सं.** अनु. १४ मी शताब्दी प्रारंभ। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५॥×२।

आदि—

इह च यद्यप्यार्यसम्भूतविजयादीन् सूत्रकारो भगवानग्रे प्रणंस्यति, तेषामपि चरितानां यशोभद्रयुगप्रवरचरितानुषक्तत्वेन तान्यप्यत्रैव प्रतिपादितानीति । अत्र च यशोभद्राचार्यस्य गृहस्थपर्यायो द्वाविंशति २२ वर्षाणि, व्रतपर्यायश्चतुर्दश १४ वर्षाणि, युगप्रधानपदं पञ्चाशत् ५० वर्षाणि, सर्वायुष्कं षडशीति ८६ वर्षाणि मास ४ चतुष्कं दिन ४ चतुष्टयं च। तथा सम्भूतविजयाचार्याणां द्विचत्वारिंशत् ४२ वर्षाणि गृहस्थपर्यायः, चत्वारिंशत् ४० वर्षाणि व्रतपर्यायः, अष्टौ ८ वर्षाणि युगप्रधानपदम्, सर्वायुः ९० नवतिवर्षाणि मास ५ पंचकं दिन ५ पञ्चकं च ॥

अन्त—

इति श्रीजिनदत्तसूरियुगप्रवरविरचितस्य श्रीगणधरसार्धशतकाख्यप्रकरणस्य वृत्तिः समाप्ता ॥छ॥

जज्ञे श्रीजिनदत्तसूरिसुगुरोः पट्टाचलोद्योतनस्फूर्ज्जज्ज्ञानरुचिप्रतानतनुतानीता नतोद्यत्तमाः ।
सूरिः श्रीजिनचन्द्र इत्यपमलप्राद्यत्सुवृत्तातुलः, सौन्दर्यादिकवर्यनिर्मलगुणैश्चित्रीयितक्ष्मातलः ॥१॥
तस्याऽभूद् भूपमूर्द्धोद्भटमुकुटतटीकोटिघृष्टांह्रिपद्मः, शिष्यः शस्यो बुधौघैर्जिनपतिरिति सन्नामतः सूरिरुच्चैः ।
विख्यातः क्षोणिपीठे सुविहितयतिराट्चक्रचक्राधिनाथश्छन्दोलङ्कारतर्कप्रमुखनिखिलसद्ग्रन्थविस्तारितार्थः ॥२॥
प्रतिदिनमपि सिद्धिप्रेयसीसंगसौख्यानुगतनवकथास्वाक्षिप्तचित्तं निरीक्ष्य ।
क्षणमपि दयितं तज्ज्ञानचारित्रलक्ष्मौ मुमुचतुरुदिता......त्मभीत्येव यं च ॥३॥
सगुणनिजपतीनां कालदोषादभावे ध्रुवमतिगुरुशोकात् सर्वविद्याः समेत्य ।
वत हृदयसमुद्रेऽस्ताघगाम्भीर्यभाजि प्रकटितगुरुसत्त्वे यस्य सद्यो निपेतुः ॥४॥
तस्य स्वाचारनिष्ठाप्रसरगुरुतराबद्धकक्षस्य शश्वत्, निःक्लेशः शिष्यलेशः सुमतिगणिरिति ज्याप्रसिद्धाभिधानः ।
निर्देशात् सद्गुरूणां सुनिविडजडताश्लिष्टधीरप्यधीताऽल्पग्रंथस्तत्प्रसादाद् व्यरचयदमलां वृत्तिमेतां सुचेताः ॥५॥
प्रारब्धा श्रीस्तम्भतीर्थवेलाकूले कुले श्रियाम् । मण्डपदुर्गे विबुधैः स्वर्गे चेयं समर्थिता ॥६॥

तथा प्रायः—

प्रथमादर्शे लिखिता वृत्तिरियं श्रीजिनेश्वरगुरूणाम् । अस्मद्गुरुगुरुपट्टप्रतिष्ठितानां प्रभाववताम् ॥७॥
शिष्येण परोपकृतौ तपसि च बद्धोद्यमेन सदमेन । कायोत्सर्गेऽतन्द्रेण साधुना कनकचन्द्रेण ॥८॥

किञ्चिच—

हेमप्रभः शालिभद्रोऽमृतमूर्त्तिरिहाभवन् । लेखनात् पट्टिकामार्ष्टेर्घुटनाच्चोपकारिणः ॥९॥
इह यदनवबोधाद्राभसिक्यान्मया वा उत पतदुपयोगादन्यथा किञ्चिदुक्तम् ।
तदलमनलसाः स्राग् ज्ञातसिद्धान्ततत्त्वा, मयकि कृतकृपाः श्रीधीधनाः शोधयन्तु ॥१०॥
कृत्वेमां विवृतिं यत्पुण्यं समुपार्जितं मया किमपि । तेन विधिधर्मरागी भूयाल्लोकः समस्तोऽयम् ॥११॥
शरनिधिदिनकरसंख्ये १२९५ विक्रमवर्षे गुरौ द्वितीयायाम् । राधे पूर्णीभूता वृत्तिरियं नन्दतात् सुचिरम् ॥१२॥
इति श्रीजिनपतिसूरियुगप्रवरविनेयपण्डितसुमतिगणिनामधेयविरचिता श्रीगणधरसार्द्धशतकवृत्तिः समाप्ता ॥छ॥
मङ्गलमस्तु समस्तसंघस्येति ॥छ॥ संवत् १२९५ वर्षे श्रीमद्धारापुरीनलकच्छकादिकृतविहारक्रमेण सुमतिगणिना श्रीमण्डपदुर्गे वृत्तिरियं समर्थितेति । ग्रंथाग्रं १२१०५ श्लोकमानेन ॥छ॥ॐ॥छ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
भग्नपृष्ठिकटिग्रीवा स्तब्धदृष्टिरधोमुखः । कष्टेन लिखितं शास्त्रं यत्नेन प्रतिपालयेत् ॥छ॥
विदुषा जल्हणेनेदं जिनपादाम्बुजालिना । प्रस्पष्टं लिखितं शास्त्रं वन्द्यं कर्मक्षयप्रदम् ॥शुभं भवतु ॥छ॥

क्रमाङ्क २८२

सुखबोधासामाचारी पत्र १११। **भा.** प्रा.। **क.** श्रीचंद्रसूरि। **ग्रं.** १३११। **ले. सं.** अनु. १४ मी शताब्दी प्रारंभ। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५×२.। पत्र १–५, ८१, ९२–९५, ९७ नथी।

क्रमाङ्क २८३

अणुव्रतविधि पत्र ७७। भा. प्रा.। ग्रं. १७००। ले. सं. ११६१। संद. श्रेष्ठ। द. श्रेष्ठ। लं. पं. १४×२।

आदि—नमो जिनागमाय ॥

नमिऊण गुण.........................महावीर । वोच्छं [illegible] [illegible] ॥

तुब्भे पुण तवचरणं काऊण [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] ॥

ग्रंथ श्लोक। १७०० ॥

एवं अणुव्वयविहिं जो पढइ सुणेइ भावए निच्चं । सो [illegible] [illegible] होइ ॥छ॥

अणुव्वयविही सम्मत्ता ॥छ॥छ॥ॐ॥ संवत् ११६१ [illegible] [illegible] [illegible] लिखितेति ॥छ॥

अणुव्रतानां [illegible] [illegible] ।
[illegible] श्रावकेण [illegible] [illegible] ॥१॥
[illegible] [illegible] [illegible] [illegible] ।
व्यतीर्णतया जिन[illegible] [illegible] [illegible] ॥२॥

[illegible] [illegible] । [illegible] [illegible] [illegible] लोके ॥३॥छ॥

क्रमाङ्क २८४

(१) तपोटमतकुट्टनशत पत्र १-७। भा. सं.। क. जिनप्रभसूरि।

आदि—

निर्लोठितशठकमठं त्रैलोक्यप्रथितनाथ[illegible] । प्रणिपत्य श्रीपार्श्वं तपोटमतकुट्टनं वक्ष्ये ॥१॥

अन्त—

इति जिनप्रभसूरिकृतं तपोमतविकुट्टनशास्त्रमनन्यमनाः ।
भवति सूक्ष्मधिया परिभावयन् बुधजनो विविमार्गविचक्षणः ॥१०२॥
॥ इति तपोटमतकुट्टनशतम् ॥

(२) तपोटर्पिमतखंडन स्वोपज्ञवृत्ति सह पत्र ७-२०। भा. सं.। क. गुणप्रभसूरि। ले. सं. अनु. १६ मी शताब्दी। संद. श्रेष्ठ। द. श्रेष्ठ। लं. प. १५।×२।। आ प्रतिना अक्षरो घसाइ गया छे।

आदि—

श्रीवर्धमानमानम्य तथा जिनप्रभं गुरुम् । स्वोपज्ञकाव्यटीकेयं क्रियते बोधहेतवे ॥१॥

प्रोद्भूतः सगुणो गणो खरतरोऽशीत्यग्रचन्द्रग्रहे १०८०
वर्षे नन्दखरुद्र ११०९ कालजनितो राकीयपक्षोऽपरः ।
अब्ध्येकांशुमिते तदाऽञ्चलमतं विश्वाग्निके त्रैस्तुतः
कायाग्नीनमिते १२३६ यतिक्षणिगुणो द्रवलिचैवेसरः ॥१॥

व्याख्या—पूर्वं सुविहितत्वेन प्रसिद्धो (इत्यादि)

अन्त—

अतस्तपोटर्षीणां जमाल्यन्वयोद्भूतित्वं न विरुद्धमिति। यदुक्तं श्रीगुरुभिः—

एषां जमालिसाधर्म्ये पूर्वयुक्त्या प्रतिष्ठिते । निह्नवत्वं कथंकारं न श्रद्धेयं विवेकिभिः ॥

इत्यादि मत्वा एतान् तपोटर्षीन् परिहृत्य सर्वसुविहितेष्वादरः कार्य इति ।।छ।। श्रीमज्जिनप्रभसूरिपौत्रेण गुणप्रभेण कृतं तपोटर्पिमतखंडनं समाप्तं ॥छ॥शुभं भवतु ॥छ॥

क्रमाङ्क २८५

कातंत्रव्याकरण दुर्गसिंहवृत्ति विवरणपंजिका टिप्पणी सह-तद्धितपाद पर्यंत अपूर्ण पत्र १८१। **भा.** सं. । **क.** त्रिलोचनदास। **ले. सं.** अनु. १४ शताब्दी पूर्वार्द्ध । **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५×२।

आदि—

॥ ॐ नमः सरस्वत्यै ॥

प्रणम्य सर्वकर्त्तारं सर्वदं सर्ववेदिनम् । सर्वीयं सर्वगं शर्वं सर्वदेवनमस्कृतम् ॥

दुर्गसिंहोक्तकातंत्रवृत्तिदुर्गपदान्यहम् । विवृणोमि यथाप्रज्ञमज्ञसज्ज्ञानहेतुना ॥

तत्रादौ तावदिष्टदेवतानमस्कारप्रतिपादनार्थं शास्त्रस्य सम्बन्धप्रयोजनाभिधानार्थं च वृत्तिकारः श्लोकमेकं चकार। देवदेवमित्यादि ॥

क्रमाङ्क २८६

कातंत्रव्याकरण दुर्गसिंहवृत्ति विवरणपंजिका-आख्यातवृत्ति पत्र २०३। **भा.** सं. । **क.** त्रिलोचनदास। **ले. सं.** १३०८। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १३॥×२।

आदि—

ॐ सिद्धिः ॥ अथ इह यद्यपि प्रश्नानंतर्यमंगलाधिकारेष्वथशब्दो वर्त्तते तथाऽप्यानंतर्यार्थ एव युज्यते। तथाहि-प्रश्नः पर्यनुयोग उच्यते। स च सामान्यरूपेणावगतस्य विशेषरूपतयाऽनवधारितस्य वस्तुनो भवति। यथा अथ किमिदमिति। त्यादीनि तु सर्वथाऽविदितान्येव, न तस्यावकाशः । अधिकारार्थोऽपि न युज्यते।

अन्त —

इति त्रिलोचनदासविरचितायां दुर्गसिंहोक्तकातंत्रवृत्तिपंजिकायामाख्यातेऽष्टमः पादः समाप्तः ॥ छ ॥ संवत् १३०८ वर्षे आषाढ वदि १ गुरावद्येह नलकच्छकपुरे समस्तराजावलीविराजिमहाराजाधिराजप्रौढप्रतापलिम्बार्यावर-लब्धश्रीकश्रीमज्जयवर्म्मदेवराज्ये आख्यातवृत्तिपंजिका लिखिता ॥

क्रमाङ्क २८७

कातंत्रव्याकरणदुर्गसिंहवृत्तिविवरणपंजिका-आख्यातवृत्ति तथा कृद्वृत्ति पत्र १९६। **भा.** सं.। **क.** त्रिलोचनदास। **ले. सं.** १४११। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५×२।

अन्त—

॥छ॥ इति त्रिलोचनदासविरचितायां दुर्गसिंहविरचितकातंत्रवृत्तिविवरणपंजिकायां कृत्सु षष्ठः पादः समाप्तः ॥छ॥छ॥छ॥ संवत् १४११ वर्षे पौष शुदि ७ सोमे अद्येह श्रीमदणहिलपुरपत्तने खरतरगच्छीय भट्टारिक-श्रीजिनचंद्रसूरिशिष्येण पं. सोमकीर्त्तिगणिना आत्मावबोधनार्थं वृत्तित्रितयपंजिका लिखापिता ॥ लिखितं पं. महिपाकेन ॥छ॥छ॥छ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया। यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥

क्रमाङ्क २८८

(१) **कातंत्रव्याकरणदुर्गसिंहवृत्ति विवरणपंजिका-आख्यातवृत्ति** पत्र २७०। **भा.** सं.। **क.** त्रिलोचनदास ।

(२) **कातंत्रव्याकरणदुर्गसिंहवृत्ति विवरणपंजिका-कृद्वृत्ति** पत्र १६४। **भा.** सं.। **क.** त्रिलोचनदास। **ले. सं.** अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४॥×२।। पत्र ५९-६० नथी।

क्रमाङ्क २८९

कातंत्रव्याकरणदुर्गसिंहवृत्ति दुर्गपदप्रबोध पत्र १९१। **भा.** सं.। **क.** प्रबोधमूर्ति गणि। **ग्रं.** ७४९१। **र. सं.** १३२८। **ले. सं.** अनु. १४ शताब्दी उत्तरार्ध। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १०॥×२

आदि—

॥ अर्हम् ॥ अथ। सूत्रे द्योतकादथशब्दात् सिः। कश्चित्तु वृत्तावनन्तराणीति दर्शनाज्जसित्याचष्टे। द्वयस्याऽप्यव्ययाच्चेति लोपः। परस्मैपदानीत्यत्रालुक्समासः ॥१॥ अथशब्द आनन्तर्ये च तद्धितपादमपेक्ष्य वेदितव्यम्। तादृशं चानन्तर्यं त्यादीनामेवास्ति, न तु सन्नादीनामपि, तेषामनेन पादेन व्यवहितत्वादित्याह। अथानन्तराणि त्यादीनि स्यामहिपर्यन्तानीति।

अन्त—

इति श्रीजिनेश्वरसूरिशिष्यलेशप्रबोधमूर्त्तिगणिविरचिते वृत्तिदुर्गपदप्रबोधे कृत्सु षष्ठः पादः समाप्तः ॥छ॥

ग्रन्थं सम्यगमुं विभाव्य निखिलां वृत्तिं प्रसङ्गात्तथा, क्वापि क्वापि च पञ्जिकामपि सभावार्थी विदित्वा जनाः।
विज्ञाय क्रमशस्ततोऽखिलमतग्रन्थार्थसारं समालोच्याऽऽसेव्य च मुक्तिमार्गमचिराज्ज्ञानं लभन्तां परम् ॥१॥
चान्द्रे कुलेऽजनि गुरुर्जिनवल्लभाख्योऽर्हच्छासनं प्रथयिताऽद्भुतक्वचरित्रः।
तच्छिष्यमौलिर्जिनदत्तगुरुप्रवीरश्चक्रेऽखिलं विधिपथं सुवहं समन्तात् ॥२॥
तच्छिष्यो जिनचन्द्रसूरिरुदगाच्चित्रैरनन्तैर्गुणैः, सौन्दर्यादिभिरुच्यते स्म कृतिभिर्यः पञ्चविंशो जिनः।
तत्पट्टाब्जसितच्छदो जिनपतिः सूरिः प्रतापाद्भुतो, मायद्वादिगजेन्द्रसिंह उदयत्सौभाग्यभाग्यावधिः ॥३॥
ज्ञानस्वर्द्रुभवैर्वरस्तवसुमैः सत्सौरभैरद्भुतैस्तत्कालग्रथितैर्जिनौकसि जिनान् येऽभ्यर्चयन्त्यन्वहम्।
यत्कीर्त्तिप्रसवस्रजा तु जनता भूषत्यशेषा दिशस्ते श्रीसूरिजिनेश्वरा युगवरास्तत्पट्टमध्यासते ॥४॥
वृत्तेर्दुर्गपदप्रबोधरसवत्येषा जगत्यै भृशं निःस्वेनापि धिया व्यधायि सुगुरोरस्य प्रसादान्मया।
तन्निःशेषविशेषबोधनिपुणैरेषाऽधिकं सस्पृहैः सद्बुद्धयङ्गविवृद्धये रविविभा यावन्मुदा स्वाद्यताम् ॥५॥
षट्तर्कागमशब्दलक्ष्मसुखसद्विद्याब्धिकुम्भोद्भवैर्यैः काव्यं मुखशुक्तिजं कृतधियां निर्दूषणं सद्गुणम्।
दीप्रं चाऽपि कृतं सतामधिहृदं हारायते तैरसौ, श्रीलक्ष्मीतिलकाभिषेकतिलकैर्ग्रन्थो ह्युदज्वल्यत ॥६॥
विक्रमनृपवर्षेऽष्टाविंशत्यधिके त्रयोदशशतेऽसौ १३२८। पूर्णः शुच्यां प्रतिपदि राधेऽश्विन्यां गुरौ वारे ॥७॥
चतुःसप्ततिशत्यस्यैकनवत्यधिका मितिः। चतुःसप्ततिमाधत्तां.................मतां मताम् (?) ॥८॥
सप्रशस्तिग्रन्थाग्रं ७४९१ ॥छ॥

क्रमाङ्क २९०

(१) **कातंत्रोत्तर विद्यानंदिवृत्ति-पंचसंधिपर्यंत अपूर्ण** पत्र ७४। **भा.** सं.। **क.** विजयानंद।

(२) **कातंत्रोत्तर विद्यानंदिवृत्ति-नामद्वितीयपादपर्यंत टिप्पणीसह** पत्र ४६। **भा.** सं.। **क.** विजयानंद। **ले. सं.** १२४५।

॥छ॥ इति विजयानन्दविरचिते कातंत्रोत्तरे विद्यानंदापरनाम्नि नाम्नि द्वितीयः पादः समाप्तः ॥ संवत् १२४५ अशिनि (अश्विन) सुदि २ शुक्रे। शिवमस्तु सर्व्वे[षा]म् ॥

(३) **कातंत्रोत्तर विद्यानंदिवृत्ति-कारकप्रकरण** पत्र २७। **भा.** सं.। **क.** विजयानंद। **ले. सं.** १२४५। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२।×२।।

अन्त—

॥छ॥ इति विजयानन्दविरचिते कातंत्रोत्तरे वियानंदापरनाम्नि कारकप्रकरणं समाप्तमिति ॥छ॥छ॥ सम्वत् १२४५ ॥छ॥छ॥छ॥

क्रमाङ्क २९१

कातंत्रोत्तर विधानंदवृत्ति-तद्धितप्रकरण पर्यन्त पत्र २०९ । **भा.** सं. । **क.** विजयानन्द । **ले. सं.** अनु. १४ मी शताब्दी अन्त । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १८×२।

क्रमाङ्क २९२

पंचग्रंथी-बुद्धिसागरव्याकरण पत्र ३७४ । **भा.** सं. । **क.** बुद्धिसागरसूरि । **र. सं.** १०८० । **ग्रं.** ७००० । **ले. सं.** अनु. १३ मी शताब्दी । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १७×२। । पत्र २०१ नथी ।

क्रमाङ्क २९३

सिद्धहेमशब्दानुशासन बृहद्वृत्ति सप्तमाध्याय पत्र १९३ । **भा.** सं. । **क.** हेमचन्द्राचार्य । **ले. सं.** अनु. १४ मी शताब्दी उत्तरार्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १६।×२।

क्रमाङ्क २९४

सिद्धहेमशब्दानुशासन बृहद्वृत्ति-आख्यातवृत्ति तथा कृद्वृत्ति पत्र २७७ । **भा.** सं. । **क.** हेमचन्द्राचार्य । **ले. सं.** अनु. १४ मी शताब्दी पूर्वार्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १२।×२।

क्रमाङ्क २९५

सिद्धहेमशब्दानुशासनबृहद्वृत्ति-तद्धितप्रकरण अपूर्ण पत्र २६५ । **भा.** सं. । **क.** हेमचंद्राचार्य । **ले. सं.** अनु. १४ मी शताब्दी पूर्वार्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १९॥×२।। पत्र २०, २५ नथी ।

क्रमाङ्क २९६

(१) सिद्धहेमशब्दानुशासन बृहद्वृत्ति द्वितीयाध्याय तृतीयपाद पत्र ५४–८६ । **भा.** सं. । **क.** हेमचंद्राचार्य । **ले. सं.** १३मी शताब्दी अंत । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १३।×२।

अन्त—

॥छ॥ मंगलमस्तु आचार्यश्रीचंद्रप्रभसूरेः ॥छ॥छ॥

(२) सिद्धहेमशब्दानुशासन बृहद्वृत्ति तृतीयाध्याय द्वितीयपाद पत्र २०४–२४८ । **भा.** सं. । **क.** हेमचंद्राचार्य । **ग्रं.** ८१२ । **ले. सं.** अनु. १३मी शताब्दी अंत । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १३।×२। पत्र २४८ मां सरस्वतीदेवीनुं ऊभीमुद्रामां सुंदर चित्र छे ।

क्रमाङ्क २९७

सिद्धहेमशब्दानुशासन लघुवृत्ति पंचमाध्याय-कृद्वृत्ति पत्र ९१ । **भा.** सं. । **क.** हेमचंद्रसूरि । **ग्रं.** १६७८ । **ले. सं.** १२०६ । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४×१॥

अन्त—

॥छ॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ पंचमोऽध्यायः समाप्तः ॥छ॥ शिवमस्तु सर्वभूतानां ॥छ॥ ग्रं. श्लो. १६७८ । संवत् १२०६ आषाढ वदि ५ सोमे ॥छ॥छ॥

क्रमाङ्क २९८

सिद्धहेमशब्दानुशासनलघुवृत्ति तृतीयाध्याय तृतीयपादथी पंचमाध्याय चतुर्थपादपर्यन्त-आख्यातवृत्ति तथा कृद्वृत्ति पत्र १२३। भा. सं.। क. हेमचन्द्राचार्य। ग्रं. १६००। ले. सं. अनु. १४ मी शताब्दी। संद. श्रेष्ठ। द. श्रेष्ठ। लं. प. १६॥×२

क्रमाङ्क २९९

सिद्धहेमशब्दानुशासन लघुवृत्ति तद्धितवृत्ति अपूर्ण पत्र १३१। भा. सं.। क. हेमचन्द्राचार्य। ले. सं. अनु. १४ मी शताब्दी। संद. श्रेष्ठ। द. श्रेष्ठ। लं. प. ११॥×२.। पत्र ९९-११२ नथी।

क्रमाङ्क ३००

सिद्धहेमशब्दानुशासन लघुवृत्ति षष्ठ सप्तमाध्याय-तद्धितवृत्ति टिप्पणीसह पत्र १३८। भा. सं.। क. हेमचन्द्राचार्य। ले. सं. अनु. १३ शताब्दी उत्तरार्ध। संद. जीर्णप्राय। द. श्रेष्ठ। लं. प. ११×२।.। टिप्पणी सूक्ष्मसूक्ष्माक्षरी।

क्रमाङ्क ३०१

सिद्धहेमशब्दानुशासन रहस्यवृत्ति (सिद्धहेम लघुवृत्तिसंक्षेप) पत्र १६०। भा. सं.। ले. सं. १२१८। संद. श्रेष्ठ। द. श्रेष्ठ। लं. प. १३॥×२।

अन्त—

॥छ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां स्वोपज्ञसिद्धहेमचन्द्रशब्दानुशासनरहस्यवृत्तौ सप्तमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ सप्तमोऽध्यायः ॥छ॥ शुभं ॥छ॥ संवत् १२१८ वर्षे ॥ श्रावण वदि ७ रवौ मंडलीवास्तव्य-श्रीजाल्योधरगच्छसंतानके आनंदसू। ठे० पद्मसिंह श्रीअभयदेवसूरियोग्या पुस्तकं लिखितमिति ॥छ॥छ॥

क्रमाङ्क ३०२

सिद्धहेमशब्दानुशासन लघुन्यास (दुर्गपदव्याख्या)-व्याकरणचतुष्कावचूर्णि षष्ठपाद-पर्यन्त पत्र १८६। भा. सं.। क. कनकप्रभसूरि। ग्रं. २८१८। ले. सं. १२७१। संद. श्रेष्ठ। द. श्रेष्ठ। लं. प. १५×२.। प्रथम आदर्श (?)।

अन्त—

व्याकरणचतुष्कावचूर्णिकायां षष्ठः पादः समाप्तः ॥ प्रथमपुस्तिका प्रमाणीकृता ॥छ॥ संवत् १२७१ वर्षे कार्तिक शुदि षष्ठयां शुक्रे श्रीनरचन्द्रसूरीणां आदेशेन प. गुणवल्लभेन समर्थितेयं पुस्तिकेति ॥छ॥ ग्रन्थाग्रं २८१८ ॥ मंगलमस्तु ॥छ॥

क्रमाङ्क ३०३

(१) धातुपाठ पत्र १८। भा. सं.। ले. सं. अनु. १३ शताब्दी। संद. श्रेष्ठ। द. श्रेष्ठ। लं. प. १२।×२

आदि—

ॐ नमः शिवाय ॥ भू सत्तायामुदात्तः। एध वृद्धौ। स्पर्द्ध संघर्षे। गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च। बाधृ लोटने। नाथृ याच्ञोपतापैश्वर्याशीःषु।

अन्त—

श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्चपुच्छादिषु धात्वर्थे इति सिद्धम् ॥छ॥
चुरादयो ण्यन्ताः ॥छ॥ इति धातवः सम्पूर्णाः ॥छ॥

(२) **विभक्तिविचार** पत्र १६। **भा.** सं.। **ले. सं.** अनु. १३ मी शताब्दी। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२॥×२

आदि—

७॥ नमो जिनाय॥ सुप्तिङन्तं पदं। अत्र सुपिति स्यादयः सप्त विभक्तयो युज्यंते। तत्र प्रथमा, प्रथममवगता प्रथमैव तावद्विचार्यते, का पुनरियं प्रथमा ? सि औ जसिति। तस्याः पुनरेतल्लक्षणं, प्रातिपदिकार्थेत्यादि, तत्र प्रातिपदिकार्थः सत्ताऽद्वयवादीनामेतद्दर्शनं, सत्ता प्रातिपदिकार्थ इति, तथा च तेषां दर्शन–सत्ता नाम काचिदनादिनिधनरूपा नित्यत्वेन व्यवस्थिता सर्वशब्दैरभिधीयत इति। तदुक्तं-संबधिभेदात्सत्तेव विद्यमाना गवादिषु जातिरुच्यते। तस्यां सर्वे शब्दा व्यवस्थिताः, प्राप्तक्रमविशेषेषु क्रियाभिधीयते। क्रमरूपस्य संहारे तत्सत्त्वमिति चोच्यते। अतस्तासां प्रातिपदिकार्थं धात्वर्थं च प्रचक्षते। सा नित्या सा महानात्मा तामाहुस्तत्वलादयः।

अन्त—

तथाहि–पाकोऽधिश्रयण तुपसंप्रक्षेपेण दर्विघटनलक्षणो देवदत्तव्यापारो नासौ काष्ठादीनां भवितुमर्हति। काष्ठस्य व्यापारो ज्वलनं। स्थाल्याश्च संभवधारणं। तस्मात्प्रतिकारक क्रियाभेदो अंगीकर्तव्यः। यद्येव क्रियाभेदेन परस्परासंबंधादसत्येकवाक्यत्वे देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीति ॥छ॥ **विभक्तिविचारः** समाप्तः ॥०॥ श्रीम**ज्जिन**चंद्रसूरिशिष्येण **जि**नमतसाधुना पुस्तकमिदमलेखि ॥छ॥

क्रमाङ्क २०४

स्याद्यंतप्रक्रिया पत्र ९४। **भा.** सं.। **क.** सर्वधरोपाध्याय। **ले. सं** १२०७। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२×२।

आदि—

ॐ ॥ सर्वज्ञाय नमः ॥

प्रणम्य शिरसा सार्धं सर्वज्ञं जगतां गुरुं। स्याद्यन्तप्रक्रियां वक्ष्ये सविशेषं समासतः ॥

रूढिशब्दाः प्रकीर्त्यन्ते पुंसि क्लीबे स्त्रियामपि। गुणद्रव्यक्रियायोगात् त्रिलिंगास्तदनंतरम् ॥

विप्राग्निसखिपत्यंशुक्रोष्टुप्रतिभुवः पिता। ना प्रशास्ता च रा गो ग्लौः स्वरान्ताः पुंसि कीर्त्तिताः।

तत्र विप्रशब्दस्य धातुविभक्तिवर्जमर्थवल्लिंगमिति लिंगसंज्ञायामेकवाक्यतापक्षे तस्मात् परा विभक्तय इत्यादिना सि औ जसित्यादीनि सप्त त्रयाणि सप्त विभक्तयः प्रथमादिशब्दवाच्या भवंति ॥

अन्त—

॥छ॥ भवंति चात्र संग्रहश्लोकाः ॥

एकादिका भवेत्संख्या संख्येये च दशावधेः। ऊनविंशत्यादिस्त्वेके सदा संख्येयसंख्ययोः ॥

ऊनविंशत्यादेर्भेदे वृत्तिर्द्वित्वादिकेष्वपि। आद्यंतरं त्रिलिंगेषु निर्लिङ्गान्तदशावधेः ॥

स्त्रियां वा नवतेस्तत्र शतादिस्तु नपुंसके। स्त्रीनपुंसकयोर्लक्षमर्बुदं पुंनपुंसकम् ॥

स्त्रियामेव भवेत्कोटिर्भूम्नि कतिरलिंगकः। यतिस्ततिरपीत्येके स्त्रियां पंक्तिर्दशार्थिका ॥छ॥

इत्युपाध्याय**सर्व**धरविरचित**स्याद्यं**तप्रक्रियायां त्रिलिंगकाण्डश्चतुर्थः समाप्तः ॥छ॥ संवत् १२०७ माघ सुदि २ रवौ मंगलम् ॥

क्रमाङ्क २०५

प्राकृतप्रकाश अपूर्ण पत्र २८। **भा.** सं.। **क.** वररुचि। **ले. सं.** अनु. १४ मी शताब्दी। **संद्द.** जीर्णप्राय। **द.** श्रेष्ठ। **लं. प.** १२॥×२

क्रमाङ्क ३०६

हैम लिंगानुशासन स्वोपज्ञविवरणसह पत्र १०२। भा. सं.। क. हेमचंद्राचार्य स्वोपज्ञ। ग्रं. ३३८४। ले. सं. अनु. १४ मी शताब्दी अंत। संद्द. श्रेष्ठ। द. श्रेष्ठ। लं. प. २५×२।

क्रमाङ्क ३०७

हैम उणादिगण स्वोपज्ञ विवरणसह पत्र ८३। भा. सं.। क. हेमचंद्राचार्य। ग्रं. ३००२। ले. सं. अनु. १४ मी शताब्दी अंत। संद्द. श्रेष्ठ। द. श्रेष्ठ। लं. प. २५×२।

क्रमाङ्क ३०८

धातुपारायण पत्र १८१। भा. सं.। क. हेमचंद्राचार्य स्वोपज्ञ। ग्रं. ५५००। ले. सं. अनु. १३ मी शताब्दी अंत। संद्द. श्रेष्ठ। द. श्रेष्ठ। लं. प. २४॥×२।

क्रमाङ्क ३०९

हैम अनेकार्थकोश अनेकार्थकैरवाकरकौमुदीटीकासह प्रथमखंड त्रिस्वरकांड१२८श्लोकपर्यन्त पत्र ३३६। भा. सं.। मू. क. हेमचंद्राचार्य। टी. क. महेन्द्रसूरि। ले. सं. अनु. १४ मी शताब्दी प्रारंभ। संद्द. श्रेष्ठ। द. श्रेष्ठ। लं. प. १९×२।

क्रमाङ्क ३१०

हैम अनेकार्थकोश अनेकार्थकैरवाकरकौमुदीवृत्तिसह द्विस्वरकांडपर्यन्त प्रथमखंड अपूर्ण पत्र २६४। भा. सं.। मू. क. हेमचंद्राचार्य। वृ. क. महेन्द्रसूरि। ले. सं. अनु. १३ मी शताब्दी। संद्द. श्रेष्ठ। द. श्रेष्ठ। लं. प. १६×२। पत्र १९५, २०५, २२२–२२७ नथी।

आदि—९०॥ अर्हम् ॥

परमात्मानमानम्य निजाऽनेकार्थसङ्ग्रहे। वक्ष्ये टीकामनेकार्थकैरवाकरकौमुदीम् ॥१॥

विश्वप्रकाश-शाश्वत-रभसा-ऽमरसिंह-मंख-दुर्गाणाम्। व्याडि-धनपाल-भागुरि-वाचस्पति-यादवादीनाम् ॥२॥

शास्त्राणि वीक्ष्य शतशो धन्वंतरिनिर्मितं निघण्टुं च। लिङ्गानुशासनानि च क्रियतेऽनेकार्थटीकेयम् ॥३॥

लिङ्गानुशासनेऽस्माभिर्वर्णितो लिङ्गनिर्णयः। अतो न ग्रथितः सूत्रे ग्रन्थगौरवभीरुभिः ॥४॥

इह सोऽप्यज्ञविज्ञानहेतवे दर्शयिष्यते। गुणशब्दो गुणे पुंसि वाच्यलिङ्गस्तु तद्वति ॥५॥

प्राणिजातिध्वनिर्यस्तु पुल्लिङ्गः पुंसि दर्शितः। तस्यैव वर्त्तमानस्य स्त्रियां स्त्रीलिङ्गता मता ॥६॥

कुत्राऽपि रूपभेदेन क्वचिच्च प्रत्ययादिभिः। लिङ्गानां निर्णयो ज्ञेयो विशेषस्त्वभिधास्यते ॥७॥

व्युत्पत्तिर्लिङ्गनिर्णीतिर्विषमार्थप्रकाशनम्। प्रायेण दृष्टदृष्टान्तो वाच्यमत्र चतुष्टयम् ॥८॥

अथ ग्रन्थारम्भे सूत्रकारः शिष्टसमयपरिपालनाय प्रत्यूहव्यूहोपशान्तये अभिधेयप्रयोजनसम्बन्धप्रतिपादनाय च समुचितेष्टदेवतानमस्कारपूर्वकमुपक्रमते।

ध्यात्वाऽर्हतः कृतैकार्थशब्दसन्दोहसङ्ग्रहः। एकस्वरादिषट्काण्ड्या कुर्वेऽनेकार्थसङ्ग्रहम् ॥१॥

क्रमाङ्क ३११

हैम अनेकार्थकोश अनेकार्थकैरवाकरकौमुदीवृत्तिसह त्रिस्वरकांड द्वितीयखंड पत्र २३९। भा. सं.। मू. क. हेमचंद्राचार्य। वृ. क. महेन्द्रसूरि। ले. सं. अनु. १४ मी शताब्दी पूर्वार्ध। संद्द. श्रेष्ठ। द. श्रेष्ठ। लं. प. १५।×२।

आदि—

९० ॥ अर्हं ॥ अथ तृतीयं त्रिस्वरकांडमारभ्यते ॥ तत्रादौ कांताः ॥छ॥ अणुको निपुणेऽल्पे च । निपुणोऽणुकः ।

अन्त—

इत्याचार्यश्रीहेमचन्द्रविरचितायामनेकार्थकैरवाकरकौमुदीत्यभिधानायां स्वोपज्ञाऽनेकार्थसङ्ग्रहटीकायां त्रिस्वर-काण्डस्तृतीयः परिपूर्णः ॥छ॥

श्रीहेमसूरिशिष्येण श्रीमन्महेन्द्रसूरिणा । भक्तिनिष्ठेन टीकेयं तन्नाम्नैव प्रतिष्ठिता ॥१॥
सम्यग्ज्ञाननिधेर्गुणैरनवधेः श्रीहेमचन्द्रप्रभोर्ग्रन्थे व्याकृतिकौशलं विलसति क्वास्मादृशां तादृशम् ।
व्याख्यामः स्म तथापि तं पुनरिदं नाऽऽश्चर्यमन्तर्मनस्तस्याऽजस्रमपि स्थितस्य हि वयं व्याख्यामनुब्रूमहे ॥२॥
यल्लक्ष्यं स्मृतिगोचरे समभवद् दृष्टं च शास्त्रान्तरे, तत् सर्वं समदर्शि किन्तु कतिचिन्नो दृष्टलक्ष्याः क्वचित् ।
अभ्यूह्यं स्वयमेव तेषु सुमुखैः शब्देषु लक्ष्यं बुधैर्यस्मात् सम्प्रति तुच्छकश्मलधियां ज्ञानं कुतः सर्वतः ॥३॥
एकत्रापि कृताऽभिधेयविषये व्युत्पत्तिरर्थान्तरे, कर्त्तव्या स्वयमेव दर्शितदिशा निर्वेदवन्ध्यैर्बुधैः ।
वर्णाद्यं क्रमवर्णनं च न कृतं तच्चापि कार्यं स्वयं, यत्कृत्स्नप्रतिपादनेन विवृतिः कामं वरीवृध्यते ॥४॥

मङ्गलं महाश्रीः॥

क्रमाङ्क ३१२

हैम अनेकार्थकोश अनेकार्थकैरवाकरकौमुदीवृत्तिसह तृतीयखंड चतुःस्वरकांडथी अंत-पर्यंत पत्र १३४। **मू. क.** हेमचंद्राचार्य। **वृ. क.** महेन्द्रसूरि। **ले. सं.** १२८६। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४×२।

आदि—

ए० ॥ अर्हं ॥ अथ चतुर्थं चतुःस्वरकांडमारभ्यते ॥ तत्रादौ कान्ताः ॥छ॥

अन्त—

इत्याचार्यश्रीहेमचन्द्रविरचितायामनेकार्थकैरवाकरकौमुदीत्यभिधानायां स्वोपज्ञाऽनेकार्थसंग्रहटीकायामनेकार्थशेषा-व्ययकाण्डः सप्तमः ॥छ॥छ॥

श्रीहेमसूरिशिष्येण श्रीमन्महेन्द्रसूरिणा । भक्तिनिष्ठेन टीकेयं तन्नाम्नैव प्रतिष्ठिता ॥१॥
सम्यग्ज्ञाननिधेर्गुणैरनवधेः श्रीहेमचन्द्रप्रभोर्ग्रन्थे व्याकृतिकौशलं विलसति क्वास्मादृशां तादृशम् ।
व्याख्यामः स्म तथापि तं पुनरिदं नाऽऽश्चर्यमन्तर्मनस्तस्याजस्रमपि स्थितस्य हि वयं व्याख्यामनुब्रूमहे ॥२॥
यल्लक्ष्यं स्मृतिगोचरं समभवद् दृष्टं च शास्त्रान्तरे, तत् सर्वं समदर्शि किन्तु कतिचिन्नो दृष्टलक्ष्याः क्वचिद् ।
अभ्यूह्यं स्वयमेव तेषु सुमुखैः शब्देषु लक्ष्यं बुधैर्यस्मात् सम्प्रति तुच्छकश्मलधियां ज्ञानं कुतः सर्वतः ॥३॥
एकत्रापि कृताऽभिधेयविषये व्युत्पत्तिरर्थान्तरे, कर्त्तव्या स्वयमेव दर्शितदिशा निर्वेदवन्ध्यैर्बुधैः ।
वर्णाद्यक्रमवर्णनं च न कृतं तच्चापि कार्यं स्वयं, यत्कृत्स्नप्रतिपादनेन विवृतिः कामं वरीवृध्यते ॥४॥छ॥
परिपूर्णा चेयमनेकार्थसंग्रहटीकाऽनेकार्थकैरवाकरकौमुदीत्यभिधानेति ॥छ॥छ॥छ॥

लेखकप्रशस्ति—

सुदृढश्रेयोमूलः परार्ध्यशाखाप्रपञ्चरोचिष्णुः । वंशोऽस्ति धर्कटानां फलभृदपि न नश्वरप्रकृतिः ॥१॥
तत्राऽऽसीत् पार्श्वनागाख्यः श्राद्धः श्रद्धालुतानिधिः। तस्याङ्गजः सतां मुख्यो गोकः प्रोल्लासिकीर्तिभाक् ॥२॥
जिनदत्तसूरिसुगुरोराज्ञां चूडामणीमिव प्रवराम् । बिभरांचकार निजमूर्ध्नि दलितदारिद्र्यमुद्रां यः ॥३॥

यः प्रातरेव रचयाञ्चकार चिन्तां सार्मणां नृणाम् । ग्लानानां निःस्वानां निर्जोऽपार्थमहाश्राद्धः ॥४॥

पुरे च यः श्रीमरुकोट्टनाम्नि क्षोणीपतेः सिद्धनरस्य मन्त्री ।

कान्ता निशान्ता नितरामचीकरच्चन्द्रप्रभस्योन्नमनुकृतहर्म्यम् ॥५॥

तच्च शुचिरुचिरचरितैर्गुरुणा वादीन्द्रकेसरिणा । जिनचन्द्रसूरिगुरुणा मुदा प्रतिष्ठापयामास ॥६॥

तस्याऽऽसंश्चत्वारः पुत्राः प्रथमस्तत्रिभिरिलामिख्यातः । सम्यक्त्वाद् यच्चेतो न चलति सुरैरपि विचलितं ॥७॥

लक्ष्मीधरो लक्षितधर्मलक्ष्मः समुद्धरः सद्गुणभासिदक्षः ।

नाम्ना मुणागः कृतपुण्यरागस्तथाऽऽसिगो वस्तुरशुद्धबुद्धिः ॥८॥

तत्राऽऽसिगस्य पुत्रास्त्रयोऽभवन् वीरपालनामाऽऽद्यः । आशापालः शुभधीस्तार्तीयीको जयतिपालः ॥९॥

तेषामाशापालः साधुः श्राद्धः प्रवर्द्धितश्रद्धः । यः शेषामिव जिनपतिसुगुरोराज्ञां वहति मूर्ध्ना ॥१०॥

देवगुरुकृत्यकुशलो गाम्भीर्यौदार्यधैर्यगुणयुगुणः । रमालङ्कारित नितरां यो भूरवाप्तकं ॥११॥

फुलचन्द्र-वीरदेवाख्य-पद्मदेवैः सुतैर्विहितविनयः । साधूनां साध्वीनां श्राद्धानां श्राविकाणां च ॥१२॥

प्रचकारोपष्टम्भं योऽशनवरपानवस्त्रपात्राद्यैः । शुभमतिनाम्नी भार्या शीलविभिरञ्जते यस्य ॥१३॥

स बुद्ध्वा सज्ज्ञानप्रवितरणमत्यस्तफलदं भवक्षाराम्भोधिप्रपतितजनोत्तारकरणम् ।

महामोहव्यूहव्यपनयनदक्षं क्षतभयः समस्तानां श्रीणां प्रभवभवदानोत्तमगुणम् ॥१४॥

स्वर्गापवर्गसंसर्गकारणं पापवारणम् । कल्याणानां पराध्यानां निधानं ध्याननन्दनम् ॥१५॥

अभिधानकोशमेतदनेकार्थं लिलेख भोः । हष्टिवसुसूर्यसंख्ये १२८६ विक्रमभूपवत्सरे ॥१६॥

सुलेखकोऽत्र लावण्यसिंहनामा प्रसिद्धिभाक् । तदक्षरविनिर्माता श्रावकोऽत्र प्रकीर्तितः ॥१७॥छ॥

॥ मङ्गलं महाश्रीः ॥छ॥

क्रमाङ्क ३१३

(१) अभिधानचिंतामणिनाममाला स्वोपज्ञवृत्तिसह चतुर्थकांड पत्र १८३ । **भा.** सं. । **क.** हेमचंद्राचार्य स्वोपज्ञ । **ग्रं.** २६२० । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४।×२

(२) अभिधानचिंतामणिनाममाला स्वोपज्ञवृत्तिसह पंचमषष्ठकांड पत्र ८५ । **भा.** सं. । **क.** हेमचंद्राचार्य स्वोपज्ञ । **ग्रं.** ११२० । **ले. सं.** अनु. १३ मी शताब्दी उत्तरार्ध । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४।×२

क्रमाङ्क ३१४

(१) जयदेवछंदःशास्त्र पत्र १० । **भा.** सं. । **क.** जयदेव । **ले. सं.** ११९० । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १२॥।×१॥।

आदि—

९॥ गायत्रं छन्दसां पूर्वं वर्द्धमानाक्षरं परम् । वाग्मण्डनकरं नौमि चित्रवृत्तप्रसिद्धये ॥१॥

अन्त—

इति जयदेवच्छन्दसि अष्टमोऽध्यायः समाप्तः ॥छ॥छ॥ संवत् ११९० मार्ग शुदि १४ सोम दिने श्रीसर्वदेवाचार्यशिष्यस्य देवचन्द्रस्यार्थे पं. श्रीधरेण जयदेवच्छन्दमूलसूत्रमलेखि ॥

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठं गुरुं विजानीयादेतच्छ्लोकस्य लक्षणम् ॥१॥छ॥

(२) जयदेवछंदःशास्त्र वृत्तिसह पत्र १–५५ । **मू. क.** जयदेव । **वृ. क.** हर्षट । **ले. सं.** अनु. १३ मी शताब्दी पूर्वार्ध । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १३।×२।

आदि—५०॥ नमः सर्वज्ञाय ॥

सङ्करं शाश्वतं सौरिं प्रणम्य विवृणोम्यहम् । जयदेवानि सूत्राणि स्वरूपविधिना स्फुटम् ॥१॥

अन्त—

भट्टमुकुलकात्मजहर्षटविरचितायां जयदेवच्छन्दोविवृतावष्टमोऽध्यायः ॥छ॥ समाप्तं जयदेवच्छन्दोविवरणं ॥छ॥ शुभमस्तु ॥छ॥छ॥ मङ्गलं महाश्रीः ॥छ॥छ॥

(२) **कइसिट्ठ छंदःशास्त्र प्राकृत गाथाबद्ध** पत्र ५६–८९ । **भा.** प्रा. । **क.** विरहाङ्क ।

आदि—५०॥ नमः सर्वज्ञाय ॥

देइं सरस्सइं पणमिऊण गरुअकइगंधहत्थिं च । सब्भावलंछणं पिंगलं च अवलेवइण्हं च ॥१॥

अन्त—

इअ कविसिट्ठवित्तजाईसमुच्चये छट्ठो णिअमो समत्तो ॥छ॥ कइसिट्ठछंदं समत्तं ॥छ॥छ॥ सुभमस्तु ॥छ॥ मङ्गलं महाश्रीः ॥छ॥५॥

(४) **कइसिट्ठछंदःशास्त्रवृत्ति** पत्र ९०–१८३ । **भा.** सं. । **क.** भट्ट गोपाल । **ले. सं.** अनु. १३मी शताब्दी पूर्वार्द्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १३×२ ।

आदि—५०॥

एते[...]दामितसरोजदलाभिरामा कान्तिर्जितेत्यसहमान इवाञ्जनेन ।

शून्यानि यस्त्रिदशवैरिविलासिनीनां नेत्रोत्पलानि विदधेऽस्तु स वो हिताय ॥१॥

नत्वा पिङ्गलसैतवकात्यायन भरतकम्बलाऽश्वतरान् । विरहाङ्कविरचितायाश्छन्दोविचितेः करोम्यहं व्याख्याम् ॥

पुस्तकलेखकदोषादसंस्कृतानां मुखे च पतितत्वात् । प्रभ्रष्टा ये पाठाये चान्यैरन्यथा रचिताः ॥

तानाप्तेभ्यो नामा (ज्ञात्वा) पुस्तकमंदर्शना[त्] समाहृत्य ।

अन्येभ्यः शास्त्रेभ्यः स्वधिया च विचार्य रचितेयम् ॥

प्रथमं तावद्गाथायुगलेनाभिमतदेवादिनमस्कारश्रव्यापारो(?) दर्शयितुमाचार्य आह ॥छ॥ देइं सरस्सइमिति ॥

देवीं सरस्वतीं प्रणम्य गुरुककविगन्धहस्तिनं च । सद्भावलाञ्छनं पिङ्गलं चाऽवलेपचिह्नं च ॥

कामिनीकपोलपद्मपरितनुबुद्धिविभवोऽपि दयितायै । साधयति समुच्चयं विरहलाञ्छनो वृत्तजातीनाम् ॥

वृत्तजातीनां समुच्चयं छन्दोऽवचयविशेषसारसङ्ग्रहं विरहलाञ्छनाख्य आचार्य दयितायै साधयति कथयति । किं कृत्वा? देवीं सरस्वतीं भगवतीं वागीश्वरीं प्रणम्य स्तुत्वा, सद्भावलाञ्छनं स्वगुरुं च स्तुत्वा, कीदृशम्? गुरुकविगन्धहस्तिनम्, गुरव एव गुरुकाः, स्वार्थे कः, अन्ये त्वाहुः प्राकृतभाषायामेव लालित्यार्थमेवं रूपम्, न तु संस्कृते, अर्थान्तरासम्भवात्, तेन गुरवश्च ते कवयः गुरुकवयः इत्येव साधीयः, गन्धहस्ती वरगन्धहस्ती, गुरुकवीनां गन्धहस्ती गुरुकविगन्धहस्ती, तं हि गन्धहस्तिभयाद्धि सामान्यद्विपाः स्वजन्मभूमिं वनमप्युत्सृजन्ति, किमु सम्मुखा भविष्यन्ति?। किञ्च-पिङ्गलं प्रणम्य छन्दःशास्त्राचार्यम् । अवलेपचिह्नं च कविमुख्यं विशेषेण नत्वेति योजनीयम् । किम्भूतो विरहलाञ्छनः? कामिन्या उत्तमाया योषितः कपोललक्ष्मणा गण्डशोभावयवेन सदृशः परितनुबुद्धिविभवो मतिविस्तारो यस्य, अनेन स्वविशेषणद्वारेण नासूक्ष्मदर्शितारोऽस्मिन् सुखेनावगतिरिति दर्शिता । देवतादिनमस्कारेणानेककल्मषप्रभवविघ्नोपशमार्थं सर्वकार्यारंभेषु अभिमतदेवतानमस्कारो विधेयः ।

अन्त—

चक्रपालात्मजगोपालविरचितायां कृतशिष्टविवृतौ षष्ठो नियमः ॥छ॥ समाप्तेयं कैसट्टटीका ॥छ॥ कृतिर्भट्टचक्रपालसूनोर्गोपालस्य ॥छ॥ मङ्गलं महाश्रीः ॥छ॥छ॥

(५) **छंदोनुशासन** पत्र २८। **भा.** सं.। **क.** जयकीर्तिसूरि। **ले. सं.** ११९२। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२॥×२।

आदि—ॐ नमः शिवाय ॥

श्रीवर्द्धमानमानम्य छन्दसां पूर्वमक्षरम्। लक्ष्यलक्षणमालोक्य वक्ष्ये छन्दोऽनुशासनम् ॥

छन्दःशास्त्र यदित्र तद् विशोः काव्यसागरम्। छन्दोभागं वाङ्मयं सर्वं न किंचिच्छन्दसा विना ॥

अन्त—

माण्डव्य-पिङ्गल-जनाश्रय-सेतवाख्य-श्रीपूज्यपाद-जयदेवबुधादिकानाम् ।

छन्दांसि वीक्ष्य विविधानपि सत्प्रयोगान् छन्दोनुशासनमिदं जयकीर्तिनोक्तम् ॥

इति जयकीर्तिकृतौ छन्दोनुशासने...........। नमो देवेभ्यः। स्वस्ति प्रजाभ्यः। ॐ नमः शिवाय। ॐ नमो नारायणाय। ॐ नमो ब्रह्मणे। ॐ नमो सर्वदेवेभ्यः। शिवमस्तु पाठकलेखकयोरिति। संवत् ११९२ आषाढ शुदि १० शनौ लिखितमिदमिति ॥छ॥

(६) **वृत्तरत्नाकर** पत्र १५। **भा.** सं.। **क.** भट्ट केदार। **ले. सं** अनु. १४ मी शताब्दी उत्तरार्द्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १३×२।.। पत्र १० मुं नथी।

क्रमाङ्क ३१५

छंदोनुशासन स्वोपज्ञ छंदश्चूडामणिवृत्तिसह पत्र २१४। **भा.** सं.। **क.** हेमचन्द्राचार्य स्वोपज्ञ। **ग्रं.** ४१००। **ले. सं.** १४९०। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४×१॥।

अन्त—

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञच्छन्दोऽनुशासनवृत्तौ प्रस्तारादिव्यावर्णनो नामाष्टमोऽध्यायः समाप्तः ॥छ॥ संपूर्ण छंदोऽनुशासनमिति ॥छ॥ ग्रन्थाग्रं ४१०० ॥छ॥

संवत् १४९० वर्षे आषाढ शुदि ६ शनिदिने श्रीमति स्तंभतीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे विजयिनि श्रीमत्खरतरगच्छे जिनराजसूरिपट्टे लब्धिलीलानिलय-धुरबहुबुद्धियोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचंदनतरुमलययुगपवरोपममिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्रीजिनभद्रसूरीश्वराणामुपदेशेन प. गूजरसुतेन रेपाप्राप्तसुश्रावकेन प. धरणाकेन पुत्रसाइयासहितेन च्छंदश्चूडामणिपुस्तकं लखापितं ॥छ॥छ॥श्रीः॥ पुरोहित हरीयाकेन लिखितम् ॥ शुभं भवतु ॥ कल्याणमस्तु ॥छ॥॥श्रीः॥छ॥

क्रमाङ्क ३१६

(१) **कल्पलताविवेक (कल्पपल्लवशेष) तृतीयपरिच्छेद अपूर्ण पर्यन्त** पत्र २५९। **भा.** सं.। **ले. सं.** अनु. १३ मी शताब्दी पूर्वार्द्ध।

(२) **कल्पलताविवेक (कल्पपल्लवशेष) चतुर्थ परिच्छेद** पत्र १४८। **भा.** सं.। **ले. सं.** अनु. १३ मी शताब्दी पूर्वार्द्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १६×२।

क्रमाङ्क ३१७

कल्पलताविवेक (कल्पपल्लवशेष) पत्र ३८९। **भा.** सं.। **ग्रं.** ६५००। **ले. सं.** १२०५। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २५।×२॥.। अंत्य पत्रमां **शोभन** छे।

आदि—

यत् पल्लवे न विवृतं दुर्बोधं मन्दबुद्धिभिश्चापि। क्रियते कल्पलतायां तस्य विवेकोऽयमतिसुगमः ॥

सूर्याचन्द्रमसाविति। "खद्योतपोतकौ यत्र सूर्याचन्द्रमसावपी"ति पाठे प्राकरणिकानुवादेनाप्राकरणिकस्य स्वगुणोपसंक्रमणद्वारेण विधेयता न भवेदित्यनुवाद्ययोः सूर्याचन्द्रमसोरादावुपादानमिति। एष चार्थो रूपके कल्पलतायामविमृष्टविधेयांशवाक्यदोषे कल्पपल्लवे च वितत्य वक्ष्यते ।

अन्त –

अनुद्भटमतमिति । उद्भटो ह्यलङ्कारान्तरप्रतिभोत्पत्तिहेतुमेव श्लेषं प्रतिजानीते। तेन "येन ध्वस्तमनोभवेने"-त्यत्रापि तुल्ययोगिताप्रतिभया सङ्कर एव स्यादिति श्लेषस्य निर्विषयत्वापत्तिस्तदवस्थैवेति । जयतीति। सर्वोत्कर्षेण वर्त्तते ॥छ॥

इति कल्पपल्लवशेषे कल्पलताविवेकेऽर्थालङ्कारनिर्णयो नाम चतुर्थः परिच्छेदः समाप्तः ॥छ॥ इति समाप्तः कल्पलताविवेकाऽभिधानः कल्पपल्लवशेषः ॥छ॥छ॥

कल्पपल्लवमात्रेण न ये कल्पलतां विदुः । कल्पपल्लवशेषोऽयं निर्मितस्तद्विदेऽपरः ॥छ॥१॥छ॥

अपर इति । एकस्मिन् विवरणे कृतेऽपरविवरणकरणं श्रोतृणामवोधहेतुतया श्रेयस एवेत्यर्थः ॥छ॥

पल्लवकलशविराजिनि कल्पलताविबुधमन्दिरे रचितः । शेषध्वजो विजयतां छेदपरुर्ध्वनिपताकोऽयम् ॥छ॥

सम्वत् १२०५ श्रावण शुदि १४ शनौ ॥छ॥ मङ्गलं महाश्रीः ॥छ॥

क्रमाङ्क ३१८

काव्यमीमांसा (कविरहस्य) पत्र ९०। **भा.** सं.। **क.** राजशेखर। **ले. सं.** १२१६ । **संद्द.** अतिजीर्ण । **द.** श्रेष्ठ। **लं. प.** ११॥×२।

अन्त—

इह सिद्धो महाकविः ॥छ॥ इति श्रीराजशेखरकृतौ काव्यमीमांसायां कविरहस्ये प्रथमेऽधिकरणे कालविभागो नाम समीक्षा अष्टादशोऽध्यायः ॥छ॥ समाप्तं चेदं कविरहस्यं प्रथममधिकरणमष्टादशोऽध्यायः ॥छ॥ शुभमस्तु ॥ लेखकपाठकयोः ॥छ॥ मंगलं महाश्री ॥छ॥छ॥ संवत् १२१६ फाल्गुन वदि ९ सोमदिने ॥छ॥छ॥

क्रमाङ्क ३१९

काव्यादर्श (काव्यप्रकाशसंकेत) सप्तम उल्लास पर्यन्त पत्र २०७। **भा.** सं.। **क.** सोमेश्वर भट्ट। **ले. सं.** अनु. १४ मी शताब्दी उत्तरार्द्ध । **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ११॥।×१॥।

आदि—॥ स्वस्ति ॥

पदार्थकुमुदव्रातसमुन्मीलनचन्द्रिकाम् । वन्दे वाचं परिस्पन्दजगदानन्ददायिनीम् ॥

समुचितेति यत् किल प्रस्तुतं वस्तु काव्यालङ्करणं तदधिदैवतरूपा च वक्ष्यमाणरामणीयकहृदयहारिणी वाणी। अनन्यपरतन्त्रामिति। कवेरपेक्षयाऽन्यशब्दनिर्देशः ।

अन्त—

येषां ताण्डवमाधत्ते चित्ताध्वनि रसध्वनिः । त एवास्य सुवर्णस्य परीक्षाकषपट्टकाः ॥

इति भट्टश्रीसोमेश्वरविरचिते काव्यादर्शे काव्यप्रकाशसङ्केते सप्तम उल्लासः ॥छ॥ शुभं भवतु ॥छ॥

क्रमाङ्क ३२०

काव्यादर्श (काव्यप्रकाशसंकेत) पत्र २२२। **भा.** सं.। **क.** सोमेश्वर भट्ट। **ले. सं.** १२८३ । **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४॥।×२।

अन्त—

इत्येष इति। एष मार्गोऽद्भुतं वर्त्म विदुषां ध्वनिकारादीनां नानाग्रन्थतया विभिन्नोऽप्यनेकरूपोऽपि एकरू-

क्रमाङ्क ३२४

काव्यप्रकाश अवचूरि पत्र १२ । **भा.** सं. । **ग्रं.** १२५० । **ले. सं.** अनु. १४ शताब्दी प्रारंभ। **संद.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १३।×२ । प्रथम पत्रनो टुकडो नथी।

आदि—

प्रभावनिर्माप्यत्वात् भारतीसमुचिता । परामृशतीति स्मरति । नियतीत्यादि

अन्त—

इतीति। विदुषां ध्वनिकृत्प्रभृतीनां य एष मार्गः स्वसिद्धान्तस्तत्तद्ग्रन्थमतत्वेन पृथगवस्थितोऽपि एकरूपतया प्रतिभाति । तत्र संघटनैव निमित्तम्, विक्षिप्तस्य सुखावबोधायैकत्र संग्रहणं संघटना, तद्वशादेवैकात्मताप्रतिभासादिति ॥छ॥ इति **काव्यप्रकाशावचूर्णौ** दशम उल्लासः समाप्तः ॥छ॥

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ । व्यंक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥छ॥छ॥

ग्रन्थाग्रं १२५० ॥

क्रमाङ्क ३२५

व्यक्तिविवेक काव्यालंकार पत्र १९८। **भा.** सं.। **क.** राजानक महिम। **ले. सं.** अनु. १२ मी शताब्दी अंत। **संद.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४॥×२

पत्र—२, ३, ५, ६, ८, १९, २०, २३, ३१, ३४, ३७, ३९, ४१, ४४, ४८–५०, ५३, ५७, ६४-६६, ७१, ७८, ८०–८२, ८६, ९१, ९२, ९५, ९७, १०४, ११२, ११८, १२२, १२८, १२९, १४७ १४९, १५०, १८० नथी ।

आदि—॥ स्वस्ति ॥

अनुमानान्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम् । व्यक्तिविवेकं कुरुते प्रणम्य महिमा परं वाचम् ॥

युक्तोऽयमात्मसदृशान् प्रति मे प्रयत्नो नास्त्येव तज्जगति सर्वमनोरमं यत् ।
केचिज्ज्वलन्ति विकसन्त्यपरे निमीलन्त्यन्ये यदभ्युदयभाजि जगत्प्रदीपे ॥
इह सम्प्रतिपत्तितोऽन्यथा वा ध्वनिकारस्य वचोविवेचनं नः ।
न च तं यशसे प्रपत्स्यते यन्महतां संस्तव एव गौरवाय ॥

सहसा यशोऽभिसर्तुं समुद्यता दृष्टदर्पणा मम धीः । स्वालङ्कारविकल्पप्रकल्पने वि...कथमिवावद्यम् ॥
ध्वनिवर्त्मन्यतिगहने स्खलितं वाण्याः पदे पदे सुलभम् । रभसेन यत्प्रवृत्त्या प्रकाशकं चन्द्रिकाद्यदृष्ट्वैव ॥

अन्त—

व्यक्तिविवेके काव्यालङ्कारेऽन्तर्भावोपदर्शनं नाम तृतीयो विमर्शः ॥छ॥ समाप्तश्चायं **व्यक्तिविवेकाख्यः काव्यालङ्कारः** ॥छ॥

आधाय व्युत्पत्तिं नप्तॄणां क्षेमयोगभोगानाम् । स सुप्रथितनयानां भीमस्यामितगुणस्य तनयनम् ॥छ॥
श्रीधैर्य्यस्याङ्गभुवा महाकवेः श्यामलस्य शिष्येण। **व्यक्तिविवेको** विदधे **राजानकमहिमनाम्ना**ऽयम् ॥
प्रतिपाद्यबुद्ध्यपेक्षौ प्रायः संक्षेपविस्तरौ वक्तुः । तेन न बहुभाषित्वं विद्वद्भिरसूयितव्यं नः ॥ इति ॥

अन्यैरनुल्लिखितपूर्वमिदं ब्रुवाणो न्यूनं स्मृतेर्विषयतां विदुषामुपेयात् ।
हासैककारणगवेषणया नवार्थतत्त्वावमर्शपरितोषसनीहया वा ॥छ॥

॥ मङ्गलं महाश्रीः ॥

क्रमाङ्क ३२८

वक्रोक्तिजीवित (काव्यालंकार) सटीक अपूर्ण पत्र ३००। **भा.** सं.। **क.** कुत्तक कवि। **ले. सं.** अनु १४ मी शताब्दी पूर्वार्द्ध। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२॥।×१॥।

आदि—

जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम्। शिवं शक्तपरिस्पन्द...............॥
यथातत्त्वं विविच्यन्ते भावास्त्रैलोक्यदर्शिभिः। यदि तन्नाद्भुतं नाम दैवरक्ता हि किंशुकाः॥
वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम्। देवीं सूक्ति...........सुन्दराभिनयोज्ज्वलाम्॥
वाचा विषयनैयत्यमुत्पादयितुमुच्यते। आदिवाक्येऽभिधानादि निर्मितेर्मानसूत्रवत्॥
लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये। काव्यस्यायमलङ्कारः कोऽप्यपूर्वोऽभिधीयते॥

पत्र २५२ मध्ये—इति कुत्तकविरचिते वक्रोक्तिजीविते द्वितीयोन्मेषः॥

अन्त—

तस्य स्वात्मनि क्रियाविरोधादलङ्करणत्वानुपपत्तेः। अथवा रसस्य संश्रयो रसेन संश्रयो यस्तस्मा...

क्रमाङ्क ३२९

उद्भटकाव्यालंकारलघुवृत्ति पत्र ८६। **भा.** सं.। **वृ. क.** प्रतीहारेंदुराज। **ग्रं.** १६३९। **ले. सं.** ११६०। **संह** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १८।×१॥

अन्त—

एतच्चेह वहुवक्तव्यत्वान्न वैतत्येन प्रपञ्चितम्। कुशाग्रीयवुद्धीनां हि दिग्मात्र एवोपदर्शिते सति वुद्धिवल्ली प्रतानशतैर्नानादिग्व्यापित्वेन विस्तारमासादयतीति ॥छ॥ महाश्री॥ प्रतीहारेन्दुराजविरचितायामुद्भटालङ्कारसारसङ्ग्रहे लघुविवृतौ षष्ठोऽध्यायः ॥छ॥

मीमांसासारमेघात् पदजलधिविधोस्तर्कमाणिक्यकोशात्
साहित्यश्रीमुरारेर्बुधकुसुममधोः सौरिपादाब्जभृङ्गात्।
श्रुत्वा सौजन्यसिन्धोर्द्विजवरमुकुलात् कीर्त्तिवल्ल्यालवालात्,
काव्यालङ्कारसारे लघुविवृतिमधात् कौङ्कणः श्रीन्दुराजः ॥छ॥

मङ्गलं महाश्रीः ॥छ॥ ग्रन्थाग्रं १६३९ उद्देशतः॥ संवत् ११६० कार्त्तिकवदि ६ सोमे लिखितमिति॥

क्रमाङ्क ३३०

उद्भटालंकारलघुवृत्ति पत्र १४२। **भा.** सं.। **वृ. क.** प्रतीहारेंदुराज। **ग्रं.** १६३९। **ले. सं.** अनु. १४ मी शताब्दी पूर्वार्द्ध। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १३।×२

क्रमाङ्क ३३१

अभिधावृत्तिमातृका पत्र ३१। **भा.** सं.। **क.** भट्ट मुकुल। **ग्रं.** ५१४। **ले. सं.** अनु. १४ मी शताब्दी पूर्वार्द्ध। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** [११×२]

अन्त—

ग्रंथाग्रं ५१४। भट्टकल्लटात्मजमुकुलविरचिता अभिधावृत्तिमातृका समाप्तेति ॥छ॥ श्रीमज्जिनपतिसूरीणां पुस्तिकेयम् ॥छ॥

अर्थतः शब्दतो वाऽपि समान् धातून् निबध्नता । तथा हलायुधेनेदं कृतं कविरहस्यकम् ॥३॥
आभासन्ति पदान्यत्र प्रचुराण्यपशब्दवत् । तद्विषमं स्वभावेन निबन्धनमपेक्षते ॥४॥
ततष्टीका प्रसिद्धार्था व्याख्यातुरुपयोगिनी । मुग्धबुद्धिप्रबोधार्थं क्रियते रविधर्मणा ॥५॥
गुणान्वितां सुवर्णाढ्यां बह्वर्थां विपुलां घनाम् । इमामहं न मुञ्चामि क्षुद्रभीतेर्युगामिव ॥६॥
नौरिवेह भवाम्भोधिरुत्ताराय सतामियम् । गाढबंधसमायोगा भिद्यते न जडैर्दृढा ॥७॥
विचारयन्तु तां सन्तो मात्सर्येण विवर्जिताः । हलायुधकथाख्याने नूनं नारायणः क्षमः ॥८॥
कविः स्वकाव्यस्यादाविष्टदेवतानमस्कारं करोति । तन्नमस्कारकरणात् पुण्यसम्भारो भवति । पुण्यसम्भारात् विघ्ननाशो जायते । तं विघ्नविनाशं मन्यमानो हलायुधः प्राह ॥छ॥
जयन्ति मुरजित्पादनखदीधितिदीपिकाः । मोहान्धकारविध्वंसान्मुक्तिमार्गप्रकाशिकाः ॥

अन्त—

श्रीशब्दः समाप्तौ मंगलवाचको दर्शितः ॥छ॥
काव्यं हलायुधकृतं कविगुह्यनामख्याते.........रविधर्मकृताऽस्ति टीका ।
अभ्यस्यतां यदि वदंति वुधा विवादे स्पष्टक्रियेतरपदैर्विजयं लभंते ॥
अपशब्दाभासाख्ये काव्ये टीका शतानि चतुर्दशानि । रचितानि कविरहस्यं नामक............॥
संवत् १२१६ चैत्र सुदि ५ सोमे । श्रीअजयमेरुदुर्गे पुस्तकमिदं लिलिखे ॥

क्रमाङ्क ३३८

भट्टिकाव्य (रामकाव्य) पत्र १४४ । **भा.** सं. । **क.** भट्टि कवि वल्लभीवास्तव्य । **ले. सं.** अनु. १४मी शताब्दी प्रारंभ । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४×२।. । अंत्य पत्रमां शोभन छे ।

अन्त—

काव्यमिदं विहितं वलभ्यां श्रीधरसेननरेन्द्रपालितायाम् ।
कीर्ति.........वतान्नृपस्य क्षेमकरः क्षितिपो यतः प्रजानाम् ॥
॥ इति वलभीवास्तव्यश्रीस्वामिसूनोर्भट्टिब्राह्मणस्य कृतौ रामकाव्यं समाप्तम् ॥छ॥

क्रमाङ्क ३३९

भट्टिकाव्य वृत्ति सर्ग ८थी १५ पर्यन्त. पत्र १८९–४१५ । **भा.** सं. । **वृ. क.** पंडित अनिरुद्ध । **ले. सं.** अनु. १३मी शताब्दी उत्तरार्ध । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १२।×२

क्रमाङ्क ३४०

द्व्याश्रयमहाकाव्य वृत्तिसह तृतीयखंड १३मा सर्गथी संपूर्ण पत्र २७३ । **मू. क.** हेमचंद्राचार्य । **वृ. क.** अभयतिलकगणि । **सर्वग्रं.** १७५७४ । **वृ. र. सं.** १३१२ । **ले. सं.** अनु. १४मी शताब्दी । **संद.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १८॥।×२. । पत्र २७३मां जिनेश्वरसूरि अने सा. विमलचंद्रनुं चित्र छे ।

अन्त—

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचंद्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौ विंशतितमः सर्गः समर्थितः ॥छ॥ संपूर्णं चेदं द्व्याश्रयमहाकाव्यं । तत्संपूर्णा(र्णौ) च तद्वृत्तिरपीति शुभमस्तु ॥छ॥ नमः श्रीपार्श्वनाथश्रीजिनदत्तगुरुपादपद्मेभ्यः ॥ प्रसीदंतु श्रीजिनेश्वरसूरिगुरुपादाः ॥ सदासप्रसत्त्यै तत्रभगवत्यै सरस्वत्यै नमोऽस्त्विति ॥छ॥ ग्रंथाग्रं ८६१ ॥छ॥

पद्मानां दुर्गतानां समदगदगणैर्बाधितानां च नृणां हस्तालंबायमानो हृदयमपि महीभृत्ततेरावसंश्च ।
अर्हद्विंबप्रतिष्ठाप्रथिमसुपृथुलो पाथमी विभ्रदुच्चैः श्रीमानूकेशवंशः क्षितितलमखिलं लीलया पोपवीति ॥५॥
कीर्त्तिश्चैत्यप्रसररमयोद्योतिता कुंदु...वः स्फारस्फूर्जत्तमगुणगणैर्विश्वविश्वे प्रसिद्धः ।
मांगल्यश्रीपरिचयचणो विश्वहृक्पीयमानः पार्श्वः साधुप्रवर इह च श्रीध्वजायां बभूव ॥६॥
चत्वारस्तस्य पुत्रा अजनिषततरां तत्र चाद्यः श्रियाढ्यः श्रेयःसद्मा प्रणिधस्मरपरिचरणो मानदेवः शिवार्थी।
नामान्वर्थं दधानः कुलधर इतरः सर्वसामान्यलक्ष्मीरन्यौ मान्यौ वदान्यौ त्रिजगति वहुदेवो यशोवर्द्धनश्च ॥७॥
व्यद्योतंततमां त्रयोऽत्र धनदेवो राजदेवस्तथा नींबाकोऽपि च मानदेवतनयास्तेजोजिताग्नित्रयाः ।
माहात्म्यात् त्रितया इवादिपुरुषाः पावित्र्यतः किं त्रये वेदा ये विभरांवभूवुरखिलां लोकत्रयीं कीर्तिभिः॥८॥
पुण्यापुण्यविवेचनैकचतुरं विश्वोपकारोत्तरं क्रीडावेश्म वसुव्रजस्य विवुधाध्वन्यध्वनीनं सदा ।
सूर्येन्दुद्वितयं यथा कुलधरस्याऽऽसीत्तनूजद्वयं साधुर्देवधरो[......]स्मिल्लोहदेवस्तथा ॥९॥
तुग् याशोवर्धनः श्रीजिनपतिसुगुरुर्जज्ञिवान् जैनचंद्रे पट्टेऽजते कृताभ्युन्नतिरपि लघुकः पूर्ववातप्रतापात् ।
सर्वस्वद्व्यां(?) प्रसृत्य क्षितितलमतनोद् वाक्सुधावृष्टिसृष्ट्या श्रेयोंकूरोद्भिदाकृत्प्रमदपरवशं पुष्करावर्त्तवद् यः ॥१०॥
शश्वत्सद्गुरुवक्त्रपार्वणसुधाभीशूच्छलद्देशनाज्योत्स्नापानविधौ चकोरचतुरो दासानुदासोऽर्हताम् ।
नाट्यप्रेक्षणकक्षणेऽतिरसिकाक्षो वाहुदेवायनिः संजज्ञे जयदेवसाधुरमलार्थोत्पादनासत्कविः ॥११॥
लक्ष्मीर्नाम्नाऽस्य धुर्या समजनि दयिता रूपलावण्यलक्ष्म्या लक्ष्म्या मानं लुनाना प्रगुणगुणखनिः शीलभूषाधिराजम्।
सर्वांगीणं प्रवीणं परिदधतितमां या तथाऽभात् त्रिलोकीचूडामण्याऽपि मुक्त्या झगिति निजसखीत्वे यथोत्कंठ्यते स्म ॥१२॥

बलेन धर्मस्य चतुर्भिदः क्षिपत्तमा चतुर्दुर्गतिनो मुखे रजः ।
याऽनंतरायं विचरेच्छिवाध्वनि प्रिया द्वितीयाऽस्य च साऽस्ति लक्ष्मिका ॥१३॥

मदनापमानावहरूपधेयौ वरदेव-धींधीतिसुनामधेयौ ।
जयदेव-लक्ष्म्योः शुभभागधेयौ तनयावभूतां रमयाऽभिधेयौ ॥१४॥

तत्राऽऽद्योऽजनि दीर्घदर्शितिलकः प्राज्ञः सभावर्जकः प्रष्टव्यः समुपस्थितेऽतिविषमे कार्ये गुरुर्वाग्मिनाम् ।
उद्यत्प्रातिभवैभवश्च समवातीर्णो विदेशे महीपृष्ठे द्योतयितुं ध्रुवं सुरगुरुः सौवं मतेर्वैभवम् ॥१५॥
श्रीजावालिपुरे च वीरभवने श्रीपार्श्वतीर्थेशितुः सौवं पुण्यमहो नु देवगृहकं नैर्मल्यशाल्युन्नतम् ।
यः प्राचीकरदुद्ध्वजं हिमवता कूटं तनूजं निजं स्वर्णद्याऽऽत्मजया सह प्रहितमह्वार्घोपचारैः कृते(?) ॥१६॥
संतुष्टोदयसिंहराट्प्रहितया नांदीनिनादस्पृशा श्रीकर्याऽलमकारि धींध इतरः स्थास्नुः स्व एवौकसि ।
श्रीदेव्या स्वयमेतया कुलकलाद्रव्यर्जुतासत्यतासाधुत्वप्रियवादितादिकगुणैराकृष्टयेवोच्चकैः ॥१७॥
आद्याऽभूद् वरदेवसाध्वधिपतेः प्राणेश्वरी चाहिनी शालिन्यद्भुवनीगुणोल्वणमणीखानी जनानंदिनी ।
अम्लानां शुभसौरभां विकसितां श्रीशीलमालां सदा विभ्राणा हृदये भृशं दश दिशो या मोदयांचक्रुषी ॥१८॥

तस्याश्च पुण्यजलधेस्तनयस्त्रिलोक्या आह्लादने किल गृहीतसुचिह्नपट्टः ।
पद्मापदं विमलचंद्र इहास्ति कामायुष्टोमयज्वनृपतिर्वसतिः कलानाम् ॥१९॥

नाचिश्रीयत कस्य यः प्रणयिनां दारिद्र्यचूडोत्खनौ निष्णातो व्यवहारिधार्मिकजने धुर्यासनं प्राप्नुवन् ।
नित्याराधनयाऽर्हतः सुरतरोः संपूर्यमाणेप्सितस्तिष्ठन् सद्गुरुशासनस्य विधये चोत्पाटितैकांह्रिणा ॥२०॥
श्रीप्रह्लादनपत्तने जिनपतिं शांतिं प्रतिष्ठापयाञ्चक्रे सूरिजिनेश्वरैस्तदनु यः संस्थापयामासिवान् ।
प्रासादे प्रवरे सुशर्मनगरे मन्ये प्रतिष्ठां जने स्वं प्रापय्य ततः सुशर्मनगरे संस्थापयिष्यन् शिवे ॥२१॥
अंभोधौ विमलः स्थलेऽपि विमलो द्वेधा धरित्रीभृतामप्यंतर्विमलस्तथैव विमलो ग्रामे पुरे नीवृति ।
यद्वोच्चैर्विमलैकमप्यजनि यत्कीर्त्या त्रिलोकी ततः "सर्वं विष्णुमयं जगत्" स्मृतिरियं मिथ्यैव जज्ञेऽधुना ॥२२॥

तस्याः साऊ-रूयडे नाम पुत्र्यौ श्रेयोधाम्न्यौ[......]गुणानाम् ।
धर्मग्रंथाधीतिमार्गाध्वनीने प्रज्ञापाने श्राद्धसद्धर्म्मलीने ॥२३॥

यर्पती वसुसंचयं बहु चतुर्वर्णेऽत्र संघे सती भूयस्तारकुटुंबकंबरवती पीयूषनिर्मातगुः ।
सौम्याऽतीव च कौमुदी कुमुदिनी प्राणेशमूर्त्तेः प्रतिराजूर्नाम रमैकधामविमलेत्यस्य द्वितीया प्रिया ॥२४॥
विश्वव्याप्तिकृतो यशोव्यवहृतैः कामं मिथःसंगताः षट् पुत्रा गुणधामिभो भुवनकोऽसौ हेमचंद्रस्तथा ।
संत्यस्या महिपाल-रत्न-महनाख्याः षट् पदार्था यथा तिस्रः पुत्रितमाश्च धांध्यथ परा नोतूस्तथा तील्हिका॥२५॥
एकच्छत्रं नृपत्वं जगति विदधतः श्राद्धधर्मक्षितींदोरौचित्येन प्रयोगेऽभिमतसकलसत्कर्मनिर्माणशूराः ।
षट् पुत्रास्ते पवित्राः सुमृशमविभरुर्मूर्त्तषाड्गुण्यलक्ष्मीमेताः पुत्र्यस्तु तिस्रोऽप्रतिहतमहसो मूर्त्तशक्तित्रयाभाम्॥२६॥
अर्कस्यापि करासहेव वसनैः सर्वांगमंगावृता नीरंगीस्थगिनानना वितरणे कंबूल्लहस्तद्वया ।
आघाटः कुलयोषितां विमलचंद्रस्य प्रिया प्रेयसी पोढावश्यककृत्यकृद् विमलमत्याख्या विजेजीयते ॥२७॥
मन्ये ज्ञापयितुं जने गुणधनश्रीलक्षनाथं निजं या दीप्र विभृते सदा हृदि गृहे सम्यक्त्वदीपाधिपम् ।
शंकेऽन्तर्वसतः सदा जिनगुरू कांतं च दृष्ट्वांतिके लज्जालुर्मितभाषिणी विनयभाग् योत्तिष्ठते श्रेयसे ॥२८॥

एतस्याः स्तः क्षेमसिंहनामोद्दामश्चाहडनामकश्च पुत्रौ ।
विधिधर्ममहामहीभृतः श्रीकरणिव्ययकरणिश्रियं श्रयंतौ ॥२९॥

तत्र च—

ज्येष्ठो वैक्रियलब्धिमानिव समं स्वांते गुरूणां वसेद् ज्ञात्वाऽस्मादिव हेतुतो गुरुजनच्छंदोऽनुवर्तेत सः ।
हस्तालंबमसौ ददाति पततो दानस्य पंके कलौ प्रत्यष्ठान्निजधर्ममत्र च जिनं धर्मं प्रतिष्ठाप्य सः ॥३०॥
पाणौकृत्य द्वितीयः सुखयति पुरुषद्वेषिणीं दानलक्ष्मीं साधूनां स्वांतसारं हरति स लभते साधुवादं ब्रतोच्चैः ।
दष्टॄणां दृक्षु वर्षत्यमृतमति सदा न च्छिनत्त्येव तृष्णां नैकोऽप्युद्यद्गुणौघैर्जगति विजयते कीर्त्तिभिः सैक एव ॥३१॥
भांति स्वर्णविभूषणाः सुवसना रूप्याधिपा भोपला देदी नाम च लोहिनी त्रिभुवनी चास्याश्चतस्रः सुताः ।
मूर्त्ताः किं प्रहिता निजाश्चतसृभिर्दिग्देवताभिः श्रियस्तुष्टाभिर्विमलस्य कीर्त्तिकुसुमैरभ्यर्चनेनान्वहं ॥३२॥

इतश्च—

श्रीमान् सूरिजिनेश्वरोऽजनि कुले चांद्रेऽतिसांद्रे श्रिया यः श्रीदुर्ल्लभभूपतेरधिसभं श्रीपत्तनेऽस्थापयत् ।
क्लृप्तं चैत्यनिवासिभिर्गृहिगृहे वासं मुनीनां भृशं तान् न्यत्कृत्य कृती प्रतीतिसहितैः सिद्धान्तपत्राक्षरैः ॥३३॥
जज्ञेऽथो जिनचंद्रसूरिरिह यः संवेगशालामृतैरात्मारामगणं नृणामसिचत श्रेयःफलप्राप्तये ।
पट्टेऽस्याभयदेव आविरभवत् श्रीसूरिचक्रेश्वरो यश्चक्रेऽङ्गनिधीन् नव स्फुटतमार्थान् पुण्यवृत्तिश्रिया ॥३४॥
तत्पट्टे जिनवल्लभः प्रभुरुदैच्छ्रीमान् युगाग्रेसरः सम्यग्ज्ञानचरित्रदर्शनदलैः किं केवलैर्निर्मितः ।
भ्रेजे श्रीजिनदत्तसूरिरथ तत्पट्टाचले यद्यशोढक्कानां निनदः प्रबोधयति दुर्मोहेन सुप्तान् जनान् ॥३५॥
आसीच्छ्रीजिनचंद्रसूरिरथ तत्पट्टोदयाद्रौ रविर्यो रूपेण समाधिनाऽनवधिनाऽप्युच्चैर्विजिग्ये स्मरम् ।
सूरींद्रोऽजनि तत्पदे जिनपतिर्यस्योच्छलन् दुर्द्धरो गीष्पूरोऽस्खलि वादिभिर्नृपसभे स्राग् मौनमुद्राविधेः ॥३६॥

गुरुगुरुप्रवरोऽथ जिनेश्वरः समनुशास्ति जिनेश्वरशासनम् ।
कृतयुगं त्ववतीर्णमिहानुजं कलिकृतं प्रतिबोधयितुं कलिम् ॥३७॥

यत्तोतुंगमिहोत्तमाङ्गमभवच्छत्रं यदस्या मुखं पूर्णेन्दुप्रतिमं च नर्ममुकुरः प्रेंखे प्रलंबे श्रुती ।
सौवर्णोज्ज्वलनालकेलिकमलौ रक्तौ करौ सद्भुजौ व्यूढोरःकृशमध्यपीवरकटीयुक्तासनं चूडिकम् ॥३८॥

ऊरू क्रीडास्थले चांगुलिनखघुटिकभ्राजितावम्यजंघौ
पादौ केल्यौ च शाखाकिशलफलकलौ पादपौ सुप्रकांडौ ।

सेवाकारी जनश्चागणितगुणगणः संजमश्रीर्वयस्या
तस्माद् यस्याऽऽत्मरांधे विलसति बत योगाम्यलक्ष्मीः सुखेन ॥३९॥ युग्मम् ॥
अमुष्य सुगुरोर्गिरो विमलचंद्रसाधुः सुतृट् सुधामधुरिमस्पृशः परिपपौ मनोहृत्य ये ।
परेयवि कथाक्षणेऽह्नि रवित्विषा तापितश्चकोर इव चंद्रिकां शरदि पूर्णिमाया निशि ॥४०॥

तथाहि—

निबिडतिमिरपूर्णे दुःषमाकालदर्शे जिनसुसमयदीपो वस्तुसार्थविभासी ।
इह न तदवबोधः शब्दसाहित्यविद्यासु द्रुतद्रुतवहस्थोद्बोधनामंतरेण ॥४१॥
साहित्योद्यल्लक्षणोद्बोधरूपा चैषा हैमद्व्याश्रयग्रंथवृत्तिः ।
भो भो भव्या नव्यसृष्टेरमुष्याः श्रेयः श्रेयोऽकारणं लेखनं तत् ॥ ४२ ॥ युग्मम् ॥
स्वादुं कृत्वेति पीत्वा गुरुवचनसुधां हर्षनृत्यन्मनोब्धिः साधूद्धो वारदेविर्धनमुपलल्वायापि नो मन्यमानः ।
पत्रेषु श्रीपवित्रेष्वतुललिपिकृताऽस्याः प्रती अप्रती द्वे वृत्तेः श्रेयस्कृतेऽलीलिखदमृतकरेऽङ्कच्छलान्नाम च स्वम् ॥४३॥
अर्धांगे वासवत्या सहभुविलसतः शब्दविद्याधिराज्या साहित्यक्षोणिनेतुर्वशितदिश इदं पुस्तकानां चतुष्कम् ।
पुष्णात्याशाचतुष्के न्यसितुमुरुयशःस्तंभसंरंभभंगीं नृत्तस्तंभप्रभां चाधिकलयति चतुर्वर्णचक्षुर्नटानाम् ॥४४॥
चतुर्गतिचतुर्वार्द्धीस्तरीतुं तरणिश्रियः । गुरवे लेखयित्वाऽसौ चतुरः पुस्तकानदात् ॥४५॥
क्रीडाक्रीडेऽन्तरिक्षे विकसितकुसुमे तारकैस्तारतारैः स्वर्णद्या केलिनद्या रुचिरपरिसरे ज्योत्स्नया पट्टदेव्या ।
राजा नु क्रीडमानो विविध विलसितैर्यावदुत्कंठयेन् नूनेते श्रीपुस्तकाः स्वश्रवणमनुबुधास्तावदुत्कंठयंतु ॥४६॥
प्रातः प्रातर्निवेश्य त्रिभुवनजननीं भारतीं चित्तपट्टे भक्तिक्षीरैः प्रधाव्य क्रमकमलयुगं सन्नमस्यन्नमुष्याः ।
दासः पार्श्वस्य जैनेश्वरचलनकजासेवने षट्पदश्रीरेतां सोसूत्र्यते स्माभयतिलकगणिः सुप्रशस्तां प्रशस्तिम् ॥४७॥

पश्चाल्लिखिता—

संवत् ग्रहर्तुरसेंदु१६६९प्रमिते आश्विनमासि सकलतार्किकचक्रचूडामणिश्रीसाधुकीर्त्युपाध्यायानां विनेयवरेण्य-पंडितविमलतिलकगणिशाब्दिकविद्यासाक्षात्कृतगोनर्दीयोपमानवाचनाचार्यवर्य्यश्रीसाधुसुंदरगणीनां शिष्येण पं. विमल-कीर्तिमुनिना प्रतिरियमस्माद् भांडागारपुस्तकाल्लिखिता पठिता च । पं. विजयकीर्त्तिसहितानाम् तेषां श्रीविमलकीर्त्तीनां शिष्य पं. विमलचंद्रगणिः । तच्छिष्यो वाचकश्रीविजयहर्षगणिर्विजयमानस्तस्य शिष्य उपाध्यायश्रीधर्मवर्धनगणिभिः शिष्यजयसुंदर–कीर्त्तिसुंदराभ्यां सहितैः शोधिता विकीर्णपत्राणामनुक्रमांकीकरणात् । सं. १७४५श्रावण सुदि १३ दिने जेसलमेरमध्ये ॥

क्रमाङ्क ३४१

नैषधचरितमहाकाव्य (शशांकसंकीर्त्तन महाकाव्य) पत्र ३१७ । **भा.** सं. । **क.** श्रीहर्षकवि । **ले. सं.** १३७८ । **सह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १५॥×२।

अन्त—

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वाविंशो नवसाहसाङ्कहसाचरितें चम्पूकृतोऽयं गतः, काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥१४७॥

शशाङ्कसङ्कीर्त्तनं नाम ॥छ॥ सम्वत् १३७८ श्रीश्रीमालकुलोत्तंसेन श्रीजिनशासनप्रभावनाकरणप्रवीणेन सा॰ देदापुत्र रत्नेन सा॰ आनासुश्रावकेण सत्पुत्र उदारचरित्र सा॰राजदेव सा॰ छजल सा॰ जयतसिंह सा॰ अश्वराज प्रमुखपरिवारपरिवृतेन युगप्रवरागमश्रीजिनकुशलसूरिसुगुरूपदेशेन श्रीनैषधसूत्रपुस्तिका मूल्येन गृहीता ॥छ॥

क्रमाङ्क ३४२

नैषधचरित्रमहाकाव्य पत्र ३४९। **भा.** सं.। **क.** श्रीहर्षकवि। **ले. सं.** अनु १४ मी शताब्दी पूर्वार्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १६॥×१॥.। पत्र १८३ मुं नथी।

अन्त—

शशाङ्कसङ्कीर्त्तनं नाम ॥छ॥

यथा यूनस्तद्वत् परमरमणीयाऽपि रमणी कुमाराणामन्तःकरणहरणं कैव कुरुते ।

मदुक्तिश्चेतश्चेन्मदयति शुचीभूय सुधियः किमस्या नाम स्यादरसपुरुषानादरभरैः ॥१४९॥

दिशि दिशि गिरिग्रावाणस्तां वमन्तु सरस्वतीं तुलयति मिथस्तामापातस्फुरद्ध्वनिडम्बराम् ।

न परमपरः क्षीरोदन्वान् यदीयमुदीयते मथितुरमृतं खेदच्छेदिप्रमोदनमोदनः ॥१५०॥

॥ मङ्गलं महाश्रीः लेखकपाठकयोः ॥

क्रमाङ्क ३४३

नैषधीयमहाकाव्य साहित्यविद्याधरीटीका प्रथमखंड द्वादश सर्ग पर्यन्त पत्र ३७७। **भा.** सं.। **क.** विद्याधर पंडित। **ले. सं.** अनु १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २५॥×२।

क्रमाङ्क ३४४

नैषधीयमहाकाव्य साहित्यविद्याधरीटीका द्वितीयखंड १२ मा सर्गथी चालु पत्र ७७ त्रूटक अपूर्ण। **भा.** सं.। **क.** विद्याधर पंडित। **ले. सं.** अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २५॥×२।.। वचमां घणां पानां नथी।

क्रमाङ्क ३४५

नैषधचरित्रमहाकाव्य साहित्यविद्याधरीटीका चतुर्थसर्ग पर्यन्त पत्र ६-२१८। **भा.** सं.। **क.** विद्याधर पंडित। **ले. सं.** अनु. १४ मी शताब्दी। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५॥×२

क्रमाङ्क ३४६

(१) **विक्रमांककाव्य टिप्पणीयुक्त** पत्र १५८। **भा.** सं.। **क.** विल्हणकवि। **ग्रं.** २५४५।

आदि—

भुजप्रभादंड इवोर्द्ध्वगामी स पातु वः कंसरिपोः कृपाणः ।
यः पाञ्चजन्यप्रतिबिम्बभङ्ग्या धाराम्भसः फेनमिव व्यनक्ति ॥१॥
श्रीधाम्नि दुग्धोदधिपुण्डरीके यश्चञ्चरीकद्युतिमातनोति ।
नीलोत्पलश्यामलदेहकान्तिः स वोऽस्तु भूत्यै भगवान् मुकुन्दः ॥२॥
वक्षःस्थली रक्षतु सा जगंति जगत्प्रसूतेर्गरुडध्वजस्य ।
श्रियोऽङ्गरागेण विभाव्यते या सौभाग्यहेम्नः कषपट्टिकेव ॥३॥

अन्त—

यस्य स्वेच्छाशवरचरितालोकनत्रस्तयेव, न्यस्तश्चूडाशशिकलिकया क्वापि दूरे कुरङ्गः।

स व्युत्पत्तिं सुकविवचनेष्वादिकर्त्ता श्रुतीनां देवः प्रेयानचलदुहितुर्निश्चलं वः करोतु ॥१०८॥

इति श्रीत्रिभुवनमल्लदेवविद्यापतिकाश्मीरकभट्टश्रीविल्हणस्य कृतिर्विक्रमाङ्काभिधानं समाप्तम् ॥छ॥ एवं आत ग्रंन्थाग्रं २५४५।

(२) **घटकर्परकाव्य** पत्र २। **भा.** सं.। **का.** २१।

आदि—

निचितं खमुपेत्य नीरदैः प्रियहीना हृदयावनीरदैः ।
सलिलैर्निहितं रजः क्षितौ रविचन्द्रावपि नोपलक्षितौ ॥१॥

अन्त—

भावानुरक्तवनितासुरतैः सपेयं आलभ्य चाम्बु तृषितः करकोशपेयम् ।
जीयेय येन कविना यमकैः परेण तस्मै वहेयमुदकं घटकर्परेण ॥२१॥

॥ घटकर्परकाव्यं समाप्तम् ॥छ॥

(३) **मेघाभ्युदयकाव्य** पत्र ३–६। **भा.** सं.। **का.** ३८।

आदि—

काचित् काले प्रमुदितनदन्नीलकण्ठेघनागे व्योमाटव्यां प्रतिदिशमलं सञ्चरन् मेघनागे ।
बद्धारम्भं वदति वनिता स्म प्रवासाय कान्तं कामश्चापं वहति हितदा विस्फुरच्छायकान्तम् ॥१॥

अन्त—

विद्युल्लता लसति काञ्चनसन्निभाऽरं धाम्नो वहन्ति घनवन्ति न भानि भारम् ।
उच्चै रसत्यविरतं जलदोऽस्तवारिरस्मिन् प्रयातु समये प्रिय यस्तवारिः ॥३८॥छ॥

॥ इति मेघाभ्युदयकाव्यं समाप्तमिति ॥छ॥२॥

(४) **वृन्दावनमहाकाव्य** पत्र ६–१०। **भा.** सं.। **क.** मानांक कवि। **का.** ५२।

आदि—

वरदाय नमो हरये पतति जनोऽयं स्मरन्नपि न मोहरये ।
वहुशश्चक्रंद हता मनसिदितिर्येन दैत्यचक्रं दहता ॥१॥

अन्त—

इत्याह पीतवाससमायतनेत्रस्तं कंसासुरात् पशुमतामायतने त्रस्तम् ।
हसितानां विमलतया सहलीलाजानां छायां विकरन् दशनैः सह लीलाजानाम् ॥५२॥छ॥

॥ इति वृन्दावनमहाकाव्यं समाप्तम् ॥छ॥

(५) **मधुवर्णनकाव्य** पत्र १०–१५। **भा.** सं.। **क.** केलिकवि। **का.** ६९।

आदि—

मुदमुपैतु बुधो मधुवर्णनात् सुकविकेलिकृतात् कृतनिस्वनात् ।
अलिकुलादिव वद्धसचम्पकविमरकेसरकेसरकेलितः ॥१॥

अन्त—

अदयमयमभूत् कृतप्रकामविधुरतनुर्मधुरा वयो रटन्ति ।
प्रियतम दिवसा वृथा च येषु विधुरतनुर्मधुरा वयो रटन्ति ॥६९॥

॥ इति केलिकृतं मधुवर्णनं नाम काव्यं समाप्तम् ॥छ॥

(६) **विरहिणीप्रलापकाव्य (षड्ऋतुवर्णनकाव्य)** पत्र १५–१८। **भा.** सं.। **क.** केलिकवि। **का.** ५५।

आदि—

सा वोध्या भारती भव्या न नताऽमरसेनया । एकया भक्तिपरया न न तामरसेन या ॥१॥

अन्त—

अकार्षीत् स इदं काव्यं केलिः सज्जनयोगतः । श्लाघ्यतां यस्य सत्काव्यकेलिः सज्जनयोगतः ॥५५॥
॥ इति केलिकृतं विरहिणीप्रलापनाम काव्यं समाप्तमिति ॥छ॥

(७) **चंद्रदूतकाव्य** पत्र १८-२० । **का.** २३ ।
ले. सं. १३४३ । **संद्द.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४×२।

आदि—

यदतिसितशराग्रग्रस्तमापन्नदुःखं त्यजति जगदशेषं दीनमापन्नदुःखम् ।
स्मरत तदत नूनं सर्वदा शासनस्य प्रभुमजरमनन्तं श्रीभिदाशासनस्य ॥१॥

अन्त—

इति विविधवचोभिश्चन्द्रमायामवत्यां गदित उदयमानो दीनमायामवत्याम् ।
कथयितुमिव तस्मै तूर्णमध्वन्यवध्वा सरति रतिमिलाभृत्यम्बराध्वन्यवध्वाः ॥२३॥

॥इति **चन्द्रदूताभिधानं** काव्यं समाप्तम् ॥छ॥ सम्वत् १३४३ वैशाख शुदि ६ भां. **धांधलसुत** भां. **भीम** भां. श्रीछाहडसुत भां. जगसिंह भां. **खेतसिंह**श्रावकैः श्री**चित्रकूट**वास्तव्यैः मूल्येनेयं पुस्तिका पुनर्गृहीता ॥

क्रमाङ्क ३४७

(१) **वृन्दावनकाव्य सटीक** पत्र १-३१ । **भा.** सं. । **मू. क.** मानांक । **टी. क.** शांतिसूरि पूर्णतल्लगच्छीय । **ले. सं.** १२१५ ।

आदि—॥ नमः सर्वज्ञाय ।

वर्द्धमानं सुधामानं देवेन्द्रैः कृतसत्क्रियम् । वर्द्धमानं महामानं तथा देशितसत्क्रियम् ॥१॥
वृन्दावनादिकाव्यानां यमकैरतिदुर्विदाम् । वक्ष्ये मन्दप्रबोधाय पञ्चानां वृत्तिमुत्तमाम् ॥२॥

आदौ तावत् काव्यकरणे प्रवर्त्तमान उग्रसेनतनयो **मानाङ्को** मङ्गलप्रतिपादनाय शिष्टसमाचारपरिपालनाय चेष्टदेवतायै विष्णवे नमस्कारमाह ।

वरदाय नमो हरये पतति जनोऽयं स्मरन्नपि न मोहरये । बहुशश्चक्रंद हता मनसिदितिर्येन दैत्यचक्रं दहता ॥१॥

अन्त—

वृन्दावनाख्यकाव्यस्य कृत्वा वृत्तिं सुनिर्मलाम् । यदर्जितं मया पुण्यं तेन निर्वान्तु देहिनः ॥
श्रीपूर्णतल्लगच्छसम्बन्धिश्री**वर्द्धमानाचार्य**स्थापितश्री**शान्तिसूरि**विरचिता **वृन्दावनकाव्यवृत्तिः** समाप्तेति ॥छ॥ मङ्गलं महाश्रीः ॥ शुभं भवतु लेखकपाठकयोः ॥

(२) **घटकर्परकाव्य सटीक** पत्र ३२-४२=११ । **भा.** सं. । **टी. क.** शांतिसूरि पूर्णतल्लगच्छीय ।

आदि—॥ नमो जिनाय ॥

निचितं खमुपेत्य नीरदैः प्रियहीना हृदयावनीरदैः । सलिलैर्निहितं रजः क्षितौ रविचन्द्रावपि नोपलक्षितौ ॥१॥

प्रोषितप्रमदयेदमुच्यते इति वक्ष्यति । ततश्चायमर्थः । प्रोषितप्रमदया गतभर्तृकया सख्याऽग्रत इदं पूर्वोक्तं निचितमित्यादिकं वक्ष्यमाणं चोच्यते ॥

अन्त—

श्रीपूर्णतल्लगच्छसम्बन्धिश्री**वर्द्धमानाचार्य**निजपदस्थापितश्री**शान्तिसूरि**विरचिता **घटकर्पराख्यकाव्यवृत्तिः** समाप्ता ॥
घटकर्परकाव्यस्य वृत्तिं कृत्वा सुनिर्मलाम् । यदर्जितं मया पुण्यं तेन निर्वान्तु देहिनः ॥छ॥

(३) **शिवभद्रकाव्य सटीक** पत्र ४३-८७=४५ । **भा.** सं. । **मू. क.** शिवभद्र कवि । **टी. क.** शांतिसूरि पूर्णतल्लगच्छीय ।

आदि—७०॥ॐ नमो वीतरागाय ॥ साम्प्रतं **शि**वभद्राख्यकाव्यस्य वृत्तिः क्रियते ।
तत्र चादौ **शि**वभद्रनामा कविरिष्टदेवतायै नमस्कारं मङ्गलार्थमाह ॥छ॥
प्रणमत सदसिगदंतं चैत्रमहन्योऽप्रियाणि सदसिगदंतं । चूर्णितचक्रतुरंगं रुक्मिणमसुञ्चच यस्य चक्रतुरंगं ॥१॥

अन्त—

वीक्ष्य शरन्मुखमुडुपतिविशेषकोपे तं प्रणयेन वर्त्तमानं विशेषकोपेतम् ।
कृत उपकारः सख्यं न वञ्चनामेति अस्मद्विधमनुगमयन् नवं च नामेति ॥४६॥

स लक्ष्मणो न वञ्चनां स्खलनामेति गच्छति। किं कारयन् अनुगमयन् योजयन् । कथमस्मद्विधं मांसदृशं। कमनुगमयन् तं रामं। कथं कृत उपकारः सख्यं न वञ्चनामेति कृतो विहितोऽस्माभिर्भवतामुपकारस्ताराम-सर्पणलक्षणः तथा सख्यं मित्रत्वं च नवं नूतनं कृतं भवद्भिः सहास्माभिः कथं नाम व्यक्तमित्यनेन प्रकारेण। कीदृशं तं वर्त्तमानं तिष्ठन्तं। क्क विशेषकोपे। किं कृत्वा वीक्ष्यावलोक्य। किं तत् शरन्मुखं शरत्कालप्रारम्भं। कीदृशमुडु-पतिविशेषकोपेतं चन्द्रतिलकयुक्तं। केन वीक्ष्य प्रणयेन प्रीत्या ॥छ॥

श्रीपूर्णतल्लगच्छसम्बधिश्वेताम्बरश्री**शा**न्तिसूरिविरचितायां **शि**वभद्रकाव्यवृत्तौ द्वितीय आश्वासकः समाप्तः ॥छ॥

(४) मेघाभ्युदयकाव्य सटीक. पत्र ८८–११४=२७। **भा.** सं.। **टी. क.** शांतिसूरि पूर्णतल्लगच्छीय।

आदि—

शिवभद्रवृत्तिरुक्ता। साम्प्रतं **मे**घाभ्युदयस्य वृत्तिः क्रियते। तत्र चायं सम्बन्धः। काचिद्वनिता मेघागमसमये प्रियतमं प्रवसन्तं वदति समाप्तिं यावदाह। तत्र चाद्यः श्लोकः ॥छ॥

अन्त—

श्रीपूर्णतल्लगच्छसम्बन्धिश्री**व**र्द्धमानाचार्यस्वपदस्थापितश्री**शा**न्तिसूरिविरचिता **मे**घाभ्युदयकाव्यवृत्तिः समाप्ताः ॥

(५) चंद्रदूतकाव्य सटीक पत्र ११५–१३२=१८। **भा.** सं.। **मू. क.** जंबूनाग। **टी. क.** शांतिसूरि पूर्णतल्लगच्छीय।

आदि—७०॥ ॐ नमः सर्वज्ञाय ॥

जम्बूनागकविश्चन्द्रदूतकाव्यकरणे प्रवर्त्तमान आदौ मङ्गलार्थं इष्टदेवतायै नमस्कारमाह ॥छ॥

अन्त—

चन्द्रदूतस्य काव्यस्य वृत्तिं कृत्वा सुनिर्मलाम् । यदर्जितं मया पुण्यं तेन निर्वान्तु देहिनः ॥१॥छ॥

(६) राक्षसकाव्य सटीक पत्र १३३–१४६=१४। **भा.** सं.। **क.** जिनचन्द्र।

आदि—॥नमः सरस्वत्यै ॥

कश्चिद्वनं वहुवनं विचरन् वयस्योऽवश्यां वनात्मवदनां वनितां वनार्द्राम् ।
तर्वर्यरिप्रदमुदीक्ष्य समुत्थितं खे नागामिमां मदकलः सकलां बभाषे ॥१॥

कश्चिदित्यनिर्दिष्टनामधेयः । ना इति पुरुषः । वनं काननम् । वहूनि वनानि जलानि यत्र तद् वहुवनम्।

अन्त—

काव्यराक्षसस्य टीका परिसमाप्ता ॥ मङ्गलमस्तु ॥छ॥
चरणकरणदक्षः क्षीणदोषो जिताक्षः क्षपितविधिविपक्षः क्षान्तिमान् वद्धकक्षः ।
यतिपति**जि**नदत्ताचार्यदत्तोपदेशास्खलितमहिमयोगात् कान्तकीर्त्तिर्मुनीन्द्रः ॥१॥
समजनि **जि**नचन्द्रश्चन्द्रवच्चारुरोचिर्गणधरपदलाभाल्लब्धलोकप्रतिष्ठः ।
जिनमतयतिरेतत् तद्विनेयः सुशान्तो व्यलिखदमलवुद्धिः कृत्स्नकर्मक्षयाय ॥२॥
शरचन्द्रसूर्यसङ्ख्ये १२१५ सम्वद्विक्रमभूपतेः । अतियाति नभोमासे पञ्चदश्यां तिथौ रवौ ॥३॥

यावज्जिनप्रवचनं प्रवरप्रभावं यावज्जिनागमविदो यतिनोऽपपापाः ।
यावत् सुदर्शनभृतः स्थिरधीरचित्ताः तावत् सुपुस्तकमदः सुधियः पठन्तु ॥४॥ ॥ इति शुभम् ॥

(७) घटकर्परकाव्य सटीक पत्र ३९-५३ । **भा.** सं. । **टी. क.** पूर्णतल्लगच्छीय शांतिसूरि । **ले. सं. संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** ११॥।×१॥।

क्रमाङ्क ३४८

वासवदत्ता आख्यायिका टिप्पणी सहिता पत्र ४७ । **भा.** सं. । **क.** सुबंधु महाकवि । **ले.सं.** १२०७ । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १२×२॥

अन्त —

इति महाकविसुबंधुविरचिता **वासवदत्ता** नाम कथा समर्थिता ॥ संवत् १२०७ श्रावण वदि १४ सोमे । रुद्रपल्लीसमावासे राजश्रीगोविंदचंद्रदेवविजयिराज्ये श्रीयशोधरेण आचार्याणां कृते लिखितेयं **वासवदत्ते**ति ॥
शिवमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः । दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥
॥छ॥ मंगलं महाश्रीः ॥छ॥

क्रमाङ्क ३४९

चक्रपाणिविजयमहाकाव्य पत्र ११७ । **भा.** सं. । **क.** लक्ष्मीधर भट्ट । **ले. सं.** अनु. १४ मी शताब्दी । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४॥×१॥।

आदि—द० ॥ स्वस्ति ॥ ॐ नमः सर्व्वविदे ॥

कालिंदीजलकालकालियकुलक्रीडाविनाशैषिणा दुष्टारिष्टकठोरकंठवलनव्याश्लिष्टकंठस्रजा ।
रोहत्केशिकिशोरदत्तपदवीक्लिष्टेन पुष्णातु वो दोष्णा दुर्द्धरदैत्यदर्प्पदलनद्वारेण **दामोदरः** ॥१॥

अन्त—

पुष्पश्रीसमलंकृतं मधुमिव प्राप्यानिरुद्धं ततः सार्द्धं दानवकन्यया त्रिभुवनभ्रान्तप्रतापोदयः ।
विश्राणः स्वरविभ्रमं स भगवानन्तः प्रविश्याखिलामुन्मत्तामिव तां चकार परितः पौरोत्सवैर्द्वारकाम् ॥६३॥
॥छ॥ इति भट्टलक्ष्मीधरकृतौ **चक्रपाणिविजये** महाकाव्ये बाणदोःखंडनं नाम विंशतितमः सर्गः समाप्तः ॥ ॥छ॥ मंगलं महाश्री ॥

क्रमाङ्क ३५०

शब्दभेदप्रकाश नाममाला पत्र ३६ । किंचिदपूर्ण । **भा.** सं. । **ले. सं.** अनु. १४ मी शताब्दी पूर्वार्द्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४॥×१॥।

आदि—॥ ॐ नमो वीतरागाय ॥

प्रबोधमाधातुमशाब्दिकानां कृपामुपेत्यापि सतां कवीनाम् ।
कृतो मया रूपमवाप्य **शब्दभेदप्रकाशो**ऽखिलवाङ्मयाब्धेः ॥१॥

अन्त—

श्री**साहसाङ्क**चरितप्रमुखाः सुगद्यपद्यप्रबन्धरचनासु वितन्वते......।
व्युत्पत्तिमुज्ज्वलतमां परमां च शक्तिमुल्लासिता जगति येन सरस्वतीयम् ॥
निःशेषवैद्यकमताम्बुधिपारदृश्वा शब्दागमांबुरुहषण्डरविः कवीन्द्रः ।
यत्नान्महेश्वरकविर्निरमात् प्रकामं आलोच्यतां सुकृतिभिस्तदसावनर्घः ॥४६॥

नानपारायणोणादिनिरुक्तोक्तविकल्पितः । शब्दैर्वर्णविधेर्भ्रान्तैः सन्दृब्धोऽप्येष साधुभिः ॥४७॥
कर्तु चेतश्चमत्कारं............[अपूर्ण]

क्रमाङ्क ३५१

निर्वाणलीलावतीमहाकथाउद्धार (लीलावतीसार) पद्य पत्र २६७ । **भा.** सं. । **क.** जिनरत्नसूरि । **सं.** १३४१ । **ले. सं.** अनु. १४ मी शताब्दी पूर्वार्ध । **संद्द.** श्रेष्ठ । **द्.** श्रेष्ठ । **लं. प.** ११॥×२॥। आ पोथी कागळ उपर लखेली छे ।

दि—

.........रसंगसंगिपादांबुजन्मने । नमो.......................शसेव्यायने.........॥१॥
वर्द्धमानप्रभोः पादाः स्ताद् दृगंऽनन्त्यशालिनः । मोक्षाचलारोहि...............श्रये ॥२॥
द्वाविंशतेर्जिनेन्द्राणां गावः पांतु रवेरिव।.....................यो वासरसंगताः ॥३॥

न्त—

तदिदमनुपमानं मुक्तिशर्मातिमान सततमनुभवन्तः सर्वतः क्षेमवन्तः ।
सुगुरुसमरसेनाद्या मुनीन्द्राश्चतुर्विंशतितमजिनरत्नश्रीसुसङ्गं पृणंतु ॥५९॥

इति श्री**निर्वाणलीलावतीमहाकथे**तिवृत्तोद्धारे **लीलावतीसारे** जिनाङ्के श्री**सिंहसूरि**श्री**पद्मकेसरराजर्षिलीलावती**-**सुन्दरीरमणमतीश्रीकान्तवीर्य**सद्गुरुकेवलज्ञाननिर्वाणव्यावर्णनो नाम एकविंशतितम उत्साहः समाप्तः ॥छ॥ तत्समाप्तौ समाप्तोऽयं श्री**लीलावतीसारो** नाम महाकथाविशेषः। एवं च—

कौशाम्ब्यां विजयादिसेननृप इत्यादौ मया यत् प्रतिज्ञातं तन्महसा **जिनेश्वरगुरु**श्रीपादपङ्केरुहाम् ।
गीर्देव्याः स्फटिकेन्दुकुन्दकुमुदप्रालेयशङ्खद्युतेरश्रान्तं प्रणिधानतश्च सुधिया सिद्धिं समभ्यासितम्॥१॥छ॥ग्रं.११५॥
तीर्थे श्री**वर्द्धमान**स्य **सुधर्मस्वामि**नोऽन्वये । श्रीवर्द्धमानः सुगुरुः सुधर्मस्वाम्युदैयत ॥१॥
तच्छिष्यमौलिमणिरैधत **गूर्जर**त्रासुत्रामदुर्लभनरेश्वरमूर्द्धसेव्यः ।
श्रीमान् **जिनेश्वरगुरु**र्गुरुधामपूरैः सूरं विजित्य बत सत्पथमैक्षयद् यः ॥२॥
सन्नीतिरत्नाकरसुरुयतर्कान् श्रीअष्टकादेर्विवृतीश्च सृष्ट्वा ।
चम्पूमिमामद्भुतवाग्विलासां **लीलावतीं** यः सुकथामसूत ॥३॥
तत्पादपद्ममधुपो **जिनचन्द्रसूरि**राद्योऽद्युतन्निखिलवाङ्मयसिन्धुसिन्धुः ।
संवेगसारसरितो............तन्निबन्धमिषतः परितो निरीयुः ॥४॥
श्री**स्तम्भना**भिधसुतीर्थमणिप्रदीपोऽनू.......................रोऽभयदेवसूरिः ।
आशैशवादपि हि यो विमुखो नवाङ्गया वृत्ति......त काश्चिदहो नवाङ्ग्याः ॥५॥
तत्पट्टनेताऽतुलसौविहित्यज्ञानाम्बुधिः श्री**जिनवल्लभो**ऽभूत् ।
यद्दत्तसद्ग्रन्थसुधाप्रपास्ताः सेव्याः समस्तैरपि मुक्तिपान्थैः ॥६॥
तदीयगच्छाम्बुजपण्डचण्डभानुर्बभौ श्री**जिनदत्तसूरिः** ।
यत्पादसेवा बत राजभिस्तैः सर्वाङ्गसम्पूर्णतमैर्वितेने ॥७॥
तदनु च **जिनचन्द्रसूरिसिंहः** समजनि शैशवशालिनाऽपि येन ।
प्रबलमदभरान्धवादिदन्तावलदलना खलु लीलयैव चक्रे ॥८॥
तत्पट्टपूर्वाचलहेलिकेलिः प्रद्योतनः श्री**जिनपत्यधीशः** ।
यस्योदये संप्रससार धाम नान्यस्य कस्यापि हि सर्वदिक्षु ॥९॥

(२) **धर्मरसायनरासक सटीक** पत्र ३८-(?)। **भा.** अप. सं.। **ले. सं.** अनु. १४ मी शताब्दी उत्तरार्द्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ।

पत्र १७, १९, २०, २२, २४, ५३, ६१-६३, ६५, ६८, ७०, ७१, ७३, ७४, ७६, ७८-८१, ८३-८७, ८९, ९४, ९६-१०३, १०५ नथी.

क्रमाङ्क ३५४

गउडवहोमहाकाव्य सटीक पत्र २४८। **भा.** प्रा. सं.। **मू. क.** वाक्पतिराज। **टी. क.** भट्ट उपेन्द्रहरिपाल। **ले. सं.** अनु. १३ मी शताब्दी अंत। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १३॥×२

क्रमाङ्क ३५५

अनर्घराघवनाटक पत्र १६९। **भा.** प्रा. सं.। **क.** मुरारि कवि। **ले. सं.** अनु. १४ मी शताब्दी पूर्वार्द्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४॥×२।

क्रमाङ्क ३५६

अनर्घराघवनाटक टिप्पनक पत्र २०३। **भा.** सं.। **क.** मलधारी नरचंद्रसूरि।
ले. सं. अनु. १४ मी शताब्दी उत्तरार्द्ध। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४×१॥

आदि—

परब्रह्ममयं ज्योतिः प्रणिधाय विधीयते। इदं मुरारिमाहात्म्यव्याख्यानोत्साहसाहसम् ॥१॥
नमस्तेभ्यो मतिर्येषां जगदुल्लङ्घ्य वर्तते। मादृशाः सन्ति ये केचित्तदर्थमयमुद्यमः ॥२॥
उत्साय मत्सरध्वान्तं विवेकालोकसम्पदा। अस्मिन् गुणांश्च दोषांश्च विचिन्वन्तु सचेतसः ॥३॥

अन्त—

समाप्तमिदमनर्घराघवटिप्पनकम् ॥छ॥
जज्ञे हर्षपुरीयगच्छसविता श्रीमान्मुनीन्दुप्रभुर्देवानन्द इति प्रभुः स विजयी देवप्रभश्च प्रभुः।
तत्पादाब्जनखांशुभिः प्रशमिते ध्वान्तेऽमरेन्दोर्मतिमात्रेऽस्मिन् पदपद्धतिं व्यपगतव्यासंगमासूत्रयत् ॥१॥
मुरारिवाचामुच्चैर्यो महिमा नहि मादृशैः। किन्तु किञ्चिन्निबन्धोऽय यथाबुद्धि व्यधीयत ॥२॥
शब्दप्रमाणसाहित्यत्रिवेणीसङ्गमश्रियाम्। श्रीमद्भिर्मलसूरीणामिदमुद्यमवैभवम् ॥३॥
॥ समाप्तमिदं टिप्पनकम्। कृतिरिय श्रीनरचन्द्रसूरीणाम् ॥ ग्रं. ६६१ ॥छ॥

क्रमाङ्क ३५७

(१) **मुद्राराक्षसनाटक टिप्पणी सह** पत्र १-९५। **भा.** प्रा. सं.। **क.** विशाखदेव। **ले. सं.** १३१४।

अन्त—

॥ संवत् १३१४ वर्षे लौ. आषाढ वदि शनौ अद्येह श्रीवामनस्थल्यां स्थित महं० देयड सुत ठ. आसाधीतेन पुस्तकं लिखितमिति। शुभं भवतु लेखकपाठकवाचकानां अन्येषामेव ॥

(२) **प्रबोधचन्द्रोदयनाटक टिप्पणी सह** पत्र ९६-१६५। **भा.** प्रा. सं.। **क.** कृष्णमिश्र। **ले. सं.** १३१८। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४×२॥

अन्त—

॥ संवत् १३१८ वर्षे...शुदि ६ रवौ अद्येह श्रीभृगुकच्छे सा० महं. देयड सुत ठ. आसाधीत्यस्य स्वार्थे प्रबोधचंद्रोदयं नाम नाटकं लिखितं ॥छ॥ शुभं भवतु लेखकपाठकयोः ॥

क्रमाङ्क ३५८

वेणीसंहारनाटक पत्र ७३ । भा. प्रा. सं. । क. भट्टनारायणकवि । ग्रं. १३५० ।
ले. सं. अनु. १४ मी शताब्दी पूर्वार्ध । संद. श्रेष्ठ । द. श्रेष्ठ । लं. प. १४॥×१॥।

क्रमाङ्क ३५९

(१) **हम्मीरमदमर्दननाटक** पत्र ५० । भा. प्रा. सं. । क. जयसिंहसूरि । ग्रं. १००० । ले. सं. १२८६ । संद. श्रेष्ठ । द. श्रेष्ठ । लं. प. १८×२

अन्त—

॥ संवत् १२८६ वर्षे आषाढ वदि ९ शनौ हम्मीरमर्दनं नाम नाटकं ॥छ॥ ग्रं. १००० ॥

(२) **वस्तुपालप्रशस्ति** पत्र १–१३ । भा. सं. । क. जयसिंहसूरि । का. ७७ । ग्रं. १८० ।

(३) **वस्तुपालस्तुतिकाव्य** पत्र १३–१६ । भा. सं. । का. १३ । अंत्य पत्रमां शोभन छे ।

क्रमाङ्क ३६०

नागानंदनाटक पत्र ५६ । भा. प्रा. सं. । क. श्रीहर्षकवि ।
ले. सं अनु. १३मी शताब्दी उत्तरार्द्ध । संद. श्रेष्ठ । द. श्रेष्ठ । लं. प. १४×२

क्रमाङ्क ३६१

चंद्रलेखाविजयप्रकरणनाटक पत्र २०३ । भा. प्रा. सं. । क. देवचंद्रमुनि हेमचंद्रशिष्य । ले. सं. अनु. १३ शताब्दी पूर्वार्ध । संद. श्रेष्ठ । द. श्रेष्ठ । लं. प. ९॥×१॥. ।

आदि—

॥ अर्हम् ॥

चिन्मयमूर्त्तिः परमो ब्रह्मादिभ्योऽपि यः परः पुरुषः । अकलितकलाभिरामो दिशतु शिवं नाभिसूनुर्वः ॥१

अपि च—

त्रिभुवनजयोद्दामभ्राम्यच्छिलीमुखशालिनः कुसुमधनुषः प्रध्वंसेनाजितो विदितः प्रभुः ।
भवजलनिधौ मज्जद्विश्वं समुद्धरति स्म यः सुभगहृदयः स श्रेयांसि द्वितीयजिनः क्रियात् ॥२॥

(नान्यन्ते)

सूत्रधारः—(समन्तादवलोक्य) कथं प्रभातप्रारम्भः ? । तथाहि—
व्योमाभोगविजृम्भिभास्वरमहःस्फारस्फुरत्केसरं विश्वव्यापिसहस्रपादमुदितं प्राचीगुहामध्यतः ।
दृष्ट्वा नव्यहरिं विहङ्गमरुतैश्चीत्कारमुच्चैस्तरां मुञ्चन्नेष निलीयते गुरुगिरिद्रोण्यां तमोवारणः ॥३॥

अपि च—

दृष्ट्वाऽन्धकारकलितं पङ्कमग्नमिवाम्बरम् । अरुणेन गिरेर्मुर्ध्नि क्षणं दध्रे रवे रथः ॥४॥
येनाशेषमपीदमन्धतमसं ज्योत्स्नाजलैः क्षालितं कामोऽनङ्गतयापि येन विलसत्याकल्पमुर्वीतले ।
स श्रीकण्ठविभूषणं शशधरः शृङ्गारलीलागृहं धत्ते राजतदर्पणश्रियमयं प्रातः प्रतीच्यां दिशि ॥५॥ इति ।

(नेपथ्याभिमुखम्)

आर्ये ! इतस्तावत् ।

(प्रविश्य)

नटी—आणवेदु अज्जो ।

सूत्रधारः—आदिष्टोऽस्मि सततार्चिततरुणरोहिणीरमणचूडामणिप्रसादसमासादितोत्कटप्रतापालंकृतराज्यकमलाविलाससदनस्य समराजिरविजृम्भमाणप्रचण्डदोर्दण्डकलितकोदण्डविस्तृतशिलीमुखमण्डलखण्डित**शा**कम्भरीश्वरकीर्त्तिकुसुमस्य **मा**लवभूपालवल्लालमौलिकमलार्चितरणाङ्गणाधिदैवतस्य आजन्मनिर्वाहितसत्यव्रततिरस्कृतकुन्तीसुतस्य प्रत्यर्थिभूपालविलासिनीनिःश्वासपवनप्रेङ्खोलनानवरतप्रज्वलिताद्भुतप्रतापदहनस्य निरन्तरदानवाहिनीप्रवाहपूरप्लवमानयशोराजहंसस्य अमन्दकीर्त्तिमन्दाकिनीपूरपवित्रितत्रिभुवनस्य सर्वतोमुखप्रसरदमेयमहिमचमूचक्राक्रान्तसकलभूपालमौलिमण्डलीमुकुटमणीकिरणचुम्बितचरणनखचन्द्रस्य श्री**कुमारपालदेवनरेन्द्रस्य** परिषदा, यदद्य श्री**कुमारविहारवामपार्श्वावस्थितश्रीमद्**जितनाथदेवस्य वसन्तोत्सवे त्रैविद्यस्य श्री**देवचन्द्रमुनेः** कृतिः **चन्द्रलेखाविजयं** नाम प्रकरणमभिनेतव्यमिति। (सचमत्कारम्)

दृष्टः क्वापि श्रुतो वा कथयत सदसि प्रेक्षकाः! कोऽपि भूपः
सत्ये शौर्ये सदाने शरणमितवतां रक्षणे बद्धकक्षः।
एनं मुक्त्वा नरेन्द्रं समिति हठहृताराातिलक्ष्मीप्रसक्त्या
विभ्राणं विक्रमाङ्कं दिशि दिशि निहितप्रस्फुरत्कीर्त्तिहारम् ॥६॥

अपि च—

एकाकिनैव वीरेण येनाऽर्णोराजमन्थनात्। अनात्तमन्दरागेण हठाल्लक्ष्मीः करे धृता ॥७॥

नटी—(सविस्मयम्) अज्ज! एदस्स संपद को नरवदी समाणो भोदि ?।

सूत्रधारः—मुग्धे!

मान्धातृप्रमुखान् विहाय महतः पट्चक्रवर्त्तिप्रभूनेतस्याऽद्य **कुमारपालनृपतेः** कस्तुल्यतामञ्चति ?।
यः कान्तेर्विजयाक्षते रणमखप्राप्तैर्महासिद्धये कीर्त्तिक्षीरभरेण वाञ्छति चरु सिद्धं प्रतापाग्निना ॥८॥

नटी—अहो! अज्जमुअस्स सा का वि उत्तिवेचित्ती जं रन्नो वन्नणे वि पत्थुदपवधत्थो वित्थरीयदि। इति। (सचिन्तम्) अज्ज! कहं इत्थ मए सुत्थिदाए वन्निंयापरिग्गहो कादव्वो? जं मज्झ गुरू केणावि रत्तवडधारिणा मुंडियसीसेण पलोहिय देसंतरं णीदो। तत्थगदस्स य अन्नेण धुत्ततिलएण किं पि अपुव्वं इंदजालं दंसिऊण काम्व गहिलत्तणं संपादिदं।

सूत्रधारः—प्रिये! अलमनया चिन्तया,

विकलः स्वस्थितचेष्टो मितवागपरिग्रहो द्विधा चित्तः। परमस्पृहणीयोऽयं भविता तत्त्वप्रपञ्चनात्यागात् ॥९॥

नटी—अय्य! एवं उवदिसंतेण तए मज्झ किं संवोहणं कदं भोदि ? जं सो पर असलाहणीयो भविस्सदि।

सूत्रधारः—(विहस्य) प्रिये! मुग्धाऽसि, उक्तस्यास्य व्याख्या इत्थमवगन्तव्या, यत्-विशिष्टकलावान् स्वर्गायावस्थितव्यापारः मितवाग् निस्सङ्ग एकमनास्तत्त्वप्रपञ्चनया अविमुक्तः प्रकृष्टस्पृहणीयो भविष्यति।

नटी—(सानन्दम्) अय्य! अन्नं च मे सुम्वरिदं, जेण सो विप्पयारिय देसंतरं णीदो तस्स वि **तत्तपवंधो** णाम, ता किं तस्सेव संगेण सलाहणिज्जो भविस्सदि ?।

सूत्रधारः—प्रिये! एवमपि। अन्यच्च—

अनुज्झतस्तत्त्वहितोपदेशं प्रवर्त्तमानस्य यथातथापि।
पुंसोऽभियुक्तस्य महत्यपीह सिद्धिः खलु स्यान्ननु सम्मुखी ना ॥१०॥

नटी—(सविस्मयम्) एदं पि मह पडिवोहण तारिसं ज्जेव इति। (सकौतुकम्) अवि एदस्स कइणो पवंधेण रंजिदव्वा एसा सहा।

सूत्रधारः—

यो भाष्यार्णवमन्थमन्दरगिरिः पट्तर्कविद्यागुरुः साहित्यामृतसिन्धुरद्भुतनतिप्रज्ञाघनः काञ्चितः।
सूक्तैस्तस्य पवित्रितत्रिभुवनैः श्रीचित्रचिन्तामणिश्लोकोन्मीलित**पद्मप्रबन्ध**ललितैः को नाम न प्रीणितः ? ॥११॥

अपि च—

श्रोतोभिः क्रमशस्त्रिभिस्त्रिभुवनं दृष्ट्वा निनाय त्रिमार्गेव स्वर्गापवर्गौ हरिदश्वो हारस्त्रिय विभ्रतीम् ।

एकश्लोकपथप्रवृत्तिमगमद् यस्याऽऽस्य सारस्वत स्रोतः पुण्यमपि प्रयाति सुभगत् कल्लोलार्यितैः ॥१२॥

अथवा किं तस्य कीर्तनया !

संसारोर्जितकर्ममर्मभिदुरश्रीतीव्रांशुबिम्बामलज्ञानोन्मीलितविन्दुरप्यात्मज्ञानशेषप्रभुः ।

लीलानिर्दलितत्रिलोकविजयिकन्दर्पदर्पोद्धतः कारुण्यान्नितरां यदीय स गुरुः श्रीहेमचन्द्रो मुनिः ॥१३॥

नटी—अज्ज ! कधं एस कवी नाडयपबंधट्ठो पयरणं विरएदि ! ।

सूत्रधारः—प्रिये ! नाटकरचना हि पूर्वसूरमनुसरन्ती क्षुण्णपथो रसभावमार्गान् । तथाहि—

क्षुण्णे मार्गे सूत्रयन्तः पदानि के नाऽभूवन्नात्र यातानुयाताः ।

यन्नैवाऽऽसीत् सर्वथा यत्र भाति नव्यं किञ्चित् कल्पनाशिल्पनेन ॥१४॥

अन्यच्च—

भाषाः प्रवितरसा मधुराक्षरास्तः श्रव्या यतो भणितिरप्रतिमेव यस्याम् ।

एतस्य विधुमुखीनामपि मुद्रयन्ती सैव कृतिर्विजयते जयन्ती ॥१५॥

नटी—(अग्रतो विलोक्य) एस आणारिद्धमुनि मिलण नाणवीहुत्तणणविणिदहत्थो पत्तो ग्धेव रंगनिहीं।

सूत्रधारः—आर्ये ! तदेतावामपि अनन्तरकरणीयाय सज्जीभवावः । (इति निष्क्रान्तौ ।)

॥ प्रस्तावना ॥छ॥

अन्त—

भवलयति सुधाभिर्यावदिन्दुस्त्रिलोकीं जनितजनस्पृद्धी शेषराजा-ऽमराजौ ।

कृतसकलविशेषौ नन्दनस्तावदेषा विलसतु जगति श्रीदेवचन्द्रस्य कीर्तिः ॥

अपि च—

विद्याम्भोनिधिमन्थमन्दरगिरिः श्रीहेमचन्द्रो गुरुः सान्निध्यैकरतिर्विशेषविभवे श्रीशेषभट्टारकः ।

यस्य स्तः कविपुङ्गवस्य जयिनः श्रीदेवचन्द्रस्य सा कीर्त्तिस्तस्य जगत्त्रये विजयतां शार्दूललीलायितैः ॥छ॥

॥ इति श्रीदेवचन्द्रमुनिप्रणीतचन्द्रलेखाविजयप्रकरणे निर्वहणसन्धौ महासिद्धिलाभो नाम पञ्चमोऽङ्कः ॥ॐ॥

कलयति भुजगेन्द्रो मौलिना यावदुर्वी प्रमदमुकुलिताक्षा यावदेते कवीन्द्राः ।

नवरसवसतिश्रीदेवचन्द्रप्रतीतप्रकरणमधुधारां श्रोत्रपात्रैः पिबन्तु ॥छ॥

क्रमाङ्क ३६२

अनेकांतजयपताका टिप्पनक पत्र १३१ । **भा.** सं. । **क.** मुनिचंद्रसूरि । **ले. सं.** ११७१ ।
संह. श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १२॥×१॥।

आदि—॥ॐ नमः सर्व्वज्ञाय ॥

शेषमतमतिशयाना यस्याऽनेकांतजयपताकेह । हर्तुमशक्या केनापि वादिना नौमि तं **वीरम्** ॥१॥

कतिपयविषमपदगतं वक्ष्येऽनेकांतजयपताकायाः । वृत्तेर्विवरणमहमल्पबुद्धिबुद्धये समासेन ॥२॥

ननु शब्दार्थयोस्तादात्म्यतदुत्पत्तिसंबंधविरहात् वाच्यवाचकभाव एव नास्ति, ततः कथं सद्भूतवस्तुवादित्व-लक्षणश्चतुर्थोऽतिशयो घटते इत्याशंक्योक्तम् ।

अन्त—

इति श्रीमुनिचंद्रसूरिविरचितेऽनेकांतजयपताकावृत्तिटिप्पणके मुक्तिवादाधिकारः समाप्तः ॥छ॥ तत्समाप्तौ च समाप्तमिदं निजविनेयरामचंद्रगणिकृतात्यंतान्तरंगसाहाय्येन श्रीमदनेकांतजयपताकावृत्तिटिप्पणकमिति ॥छ॥

क्टो ग्रंथो मतिरनिपुणा संप्रदायो न तादृक् शास्त्रं तन्त्रान्तरगतगतं सन्निधौ नो तथापि ।

स्वस्य स्मृत्यै परहितकृते चात्मबोधानुरूपं मा भाषागःपदमहमिह व्याकुलश्चित्तशुद्धया ॥छ॥

॥ इत्यनेकांतजयपताकाटिप्पणकं समाप्तमिति ॥छ॥ संवत् ११७१ ज्येष्ठ वदि ४ शुक्रे । लिखितेयं रानदेवनेति ॥छ॥

क्रमाङ्क ३६३

सन्मतितर्कप्रकरण तत्त्वबोधविधायिनी वृत्ति सह द्वितीयखंड किंचिदपूर्ण पत्र २-२५२ । **भा.** प्रा. सं. । **मू. क.** सिद्धसेन दिवाकर । **वृ. क.** अभयदेवसूरि तर्कपञ्चानन । **ले. सं.** अनु. १२ मी शताब्दी पूर्वार्द्ध । **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २३×२. ।

पत्र १, ८, १५, २२, ७६, १०५, २३०-२३३ नथी ।

क्रमाङ्क ३६६

(१) **द्रव्यालंकार सटीक द्वितीयपरिच्छेद** पत्र १९७। **भा.** सं.। **क.** रामचंद्र–गुणचंद्र स्वोपज्ञ। पत्र ९१–९२, १२८ नथी।

आदि—॥९ अर्हम् ॥

एवं तावद् द्रव्यपंचकमध्याज्जीवद्रव्यं स्वपरपरिज्ञानसंपदा सकलद्रव्याणां मूर्द्धाभिषिक्तं प्रथमं व्याख्यायाधुना तदत्यंतोपकारकं पुद्गलद्रव्यं व्याख्यातुं तल्लक्षणमुच्यते। लक्षणं च क्वचिदभिन्नं भवति यथाग्नेरौष्ण्यं। क्वचित्तु भिन्नं यथाऽग्नेरेव धूमः। तदत्र पुद्गलद्रव्यस्याभिन्नं लक्षणमभिधातुकामः प्राह।

अन्त—

रूपं च सत्त्वमथ वादिविदैर्विलुप्तमित्थं यदा स्थितिमनीयत पुद्गलानाम्।
तन्मा कदाचिदपि पुद्गलतामभी नौ संदीदृशन् यदि भवंतितमां कृतज्ञाः॥
॥इति **रामचंद्र–गुणचंद्रविरचितायां स्वोपज्ञ**द्रव्यालंकारटीकायां द्वितीयः पुद्गलप्रकाशः समाप्तः॥छ॥ॐ॥छ॥

(२) **द्रव्यालंकार सटीक तृतीयपरिच्छेद** पत्र ११३। **भा.** सं.। **क.** रामचंद्र–गुणचंद्र स्वोपज्ञ। **ले. सं.** १२०२। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४॥।×१॥।

आदि—

॥ अर्हम्॥ प्रथमप्रकाशे तावदशेषद्रव्याणां प्रधानमात्मा स्वरूपभेदैः प्रमाणप्रतिष्ठितः कृतः, तदनु द्वितीयप्रकाशे तदत्यंतोपकारकाः पुद्गलाः। संप्रति पुनर्गतिस्थित्यवगाहदानेनोभयोपकारकाणां धर्मादीनामवसरः, ततस्तेऽपि स्वरूपतः प्रमाणप्रतिष्ठिताः क्रियन्ते। तत्र प्रत्येकं परिसमाप्तं लक्षणमनुदाहृत्यैव सर्वेषामेकप्रकाशप्रपंचननिबंधनं सामान्यधर्माभिधायि प्रथममधिकारसूत्रमाह॥ अथाकंपानीति। अथध्वनिरधिकारार्थो मंगलार्थो वा, अस्मिन् प्रकाशेऽकंपानि त्रीणि द्रव्याण्यधिक्रियते।

अन्त—

अकंपानां वृत्तौ यदजनि शुभं तेन पदवीं रिपुर्वा मित्रं वा सपदि लभतां तां जनगणः।
अकांडे कोधांधप्रभुविहितदंडप्रतिभयान्न कंपते यस्यां परिजनवपूंषि क्षणमपि॥
पूर्वैर्यस्य समुद्धृतिर्न विहिता धीरैः कुतोऽप्याशयादावाभ्यां स समुद्धृतः श्रुतनिधेर्द्रव्योत्करो दुर्लभः।
एनं यूयमनंतकार्यनिपुणं गृह्णीत तत्कोविदाः स्वातंत्र्यप्रसवां यदीच्छत चिरं सर्वार्थसिद्धिं हृदि॥
मध्ये बौद्धानृतजलनिधेर्गाढवान् भ्रांतवांश्च न्यायाटव्यां वचनशठताप्रोत्थसत्कंटकायाम्।
आम्नातीर्वादिपमविफलप्रक्रिये यो विशेषे शास्त्रारंभे यदि परमसौ दक्षतां लक्षयन्नौ॥
नोत्प्रेक्षावहुमानतो न च परस्पर्द्धासमुल्लासतो नापांडुद्युतिनिर्मलाय यशसे नो वा कृते संपदः।
आत्माभ्यासयमादनः किमु वृथा द्रव्यप्रपंचश्रमः संदर्भांतरनिर्मितावनवमप्रज्ञाप्रकर्षश्रिये॥छ॥
इतिश्री**रामचंद्र–गुणचंद्र**विरचितायां **स्वोपज्ञ**द्रव्यालंकारटीकायां तृतीयोऽकंपप्रकाश इति॥छ॥ संवत् १२०२ सहजिगेन लिखितमिति॥छ॥

क्रमाङ्क ३६७

(१) **प्रमाणमीमांसा** स्वोपज्ञ टीका सह। पत्र १–१११। **भा.** सं। **क.** हेमचन्द्राचार्य स्वोपज्ञ।

(२) **परीक्षामुखसूत्र** पत्र ११२–११९। **भा.** सं.।

(३) **सर्वज्ञसिद्धि** पत्र १२०–१३९। **भा.** सं.। **क.** हरिभद्रसूरि। **ले. सं.** अनु. १५ मी शताब्दी प्रमाणे। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५।×२।। पत्र १३८ मुं नथी।

आदि—॥ ॐ नमः सर्वज्ञाय। लक्ष्मीनुद्रीतरागः क्षतमतिरखिलप्रेक्षनाङ्घ्रिद्धनुतिः

क्रमाङ्क ३६८

रत्नाकरावतारिका पत्र २६१। **भा.** सं.। **क.** रत्नप्रभाचार्य। **ले. सं.** १२२५। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १८×२।

अन्त—

॥ संवत् १२२५ वर्षे कार्तिक शुदि ७ बुधे अद्येह श्रीवटपद्रके पंडितप्रभाकरगणिनाऽऽत्मार्थे रत्नाकरावतारिकापुस्तकं लिखापितमिति ॥छ॥ शुभं भवतु लेखकपाठकयोः ॥ शांतिर्भवतु ॥ मंगलं महाश्रीः ॥छ॥

क्रमाङ्क ३६९

प्रमालक्ष्मलक्षणसटीक पत्र २७२। **भा.** सं.। **क.** बुद्धिसागरसूरि। **ले. सं.** १२०१। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ११॥×२।

अन्त—

छव्वाससएहिं नउत्तरेहिं तइया सिद्धिं गयस्स वीरस्स।
कंबलियाणं दिट्ठी वलहिपुरीए समुप्पन्ना ॥छ॥

तस्मान्नायं मोक्षावहः पंथा इति। तथा च किं जातमित्याह ॥

श्रीबुद्धिसागराचार्यैर्वृत्तैर्व्याकरणं कृतम्। अस्माभिस्तु प्रमालक्ष्म वृद्धिमायातु सांप्रतम् ॥

श्रीबुद्धिसागराचार्यैः पाणिनि-चंद्र-जैनेन्द्र-विश्रांत-दुर्गटीकामवलोक्य वृत्तबंधैर्धातुसूत्रगणोणादि वृत्तबंधैः कृतं व्याकरणं संस्कृतशब्द-प्राकृतशब्दसिद्धये। अस्माभिस्तु प्रमालक्ष्मलक्षणम् अत एव पूर्वाचार्यगौरवदर्शनार्थं वार्त्तिकरूपेण। तत्रापि स्वाभिप्रायनिवेदनार्थं वृत्तिकरणेन च। ततः किम्? वृद्धिमायातु सांप्रतमधुनेति ॥ छ ॥छ॥छ॥ मंगलं महाश्रीः ॥छ॥ संवत् १२०१ माह वदि ८ बृहस्पति लिखितेति ॥

क्रमाङ्क ३७०

धर्मोत्तरटिप्पनक पत्र ९४। **भा.** सं.। **क.** आचार्य मल्लवादी। **ग्रं.** १३००। **ले. सं.** अनु. १२ मी शताब्दी उत्तरार्ध। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १५×१॥।। पत्र ८७ थी ९३ नथी।

आदि—५०॥ॐ नमो वीतरागाय ॥

प्रणिपत्य जिना [धीशान्]........................।

[श्री]न्यायविन्दुटीकायाः क्रियते टिप्पनकं (नं) मया ॥१॥

इह हि शिष्टाः कचिदिष्टे वस्तुनि प्रवर्त्तमानाः शिष्टसमयपरिपालनाय विघ्नविनायकोपशान्तये चेष्टामीष्टाधिकृतदेवतानां मध्येऽन्यतरस्या एकस्या अपि नमस्कारपुरस्सरमेव प्रवर्त्तन्ते। ततश्च धर्मोत्तरन्यायविन्दुप्रकरणविकरणनिवेशितान्तःकरणः सन्निष्टदेवतास्तवमाह जयन्तीत्यादि।

अन्त—

इति धर्मोत्तरटिप्पनके श्रीमल्लवाद्याचार्यकृते तृतीयपरिच्छेदः समाप्तः ॥छ॥ ग्रन्थाग्रं १३०० ॥छ॥ मंगलं महाश्रीः ॥ॐ॥

क्रमाङ्क ३७१

धर्मोत्तरटिप्पनक पत्र ७७। **भा.** सं.। **क.** आचार्य मल्लवादी। **ग्रं.** १३००। **ले. सं.** अनु. १३ मी शताब्दी पूर्वार्ध। **संद्द.** जीर्ण। **द.** श्रेष्ठ। पत्र १–४, ६, ७, ३०, ४४, ५४, ७५ नथी।

क्रमाङ्क ३७२

वार्तिकवृत्ति पत्र १५५। **भा.** सं.। **क.** शांतिसूरि। **ले. सं.** अनु. १३ मी शताब्दी। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२।×१॥।.। अंतनां ५ पत्र अति जीर्ण छे।

क्रमाङ्क ३७३

सर्वसिद्धांतप्रवेश (षड्दर्शनसमुच्चय जेवो गद्य ग्रंथ) पत्र १७। **भा.** सं.। **ले. सं.** अनु. १२ मी शताब्दी उत्तरार्ध। **संद्द.** जीर्ण। **द.** श्रेष्ठ। **लं. प.** १२॥।×१॥

आदि—द० ॥ नमः सर्वज्ञाय ॥

सर्वभावप्रणेतारं प्रणिपत्य जिनेश्वरम्। वक्ष्ये सर्ववि(र्वाधि ?) गमेषु यद्दिष्टं तत्त्वलक्षणम् ॥१॥

सर्वदर्शनेषु प्रमाणप्रमेयसमुच्चयप्रदर्शनायेदमपदिश्यते—नैयायिकदर्शने तावत् प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।

अन्त—इति लौकायतिकानां सङ्क्षेपतः प्रमाणप्रमेयस्वरूपम्। इति **लोकायतराद्धान्तः** समाप्तः ॥छ॥ **नैयायिक-वैशेषिक-जैन-सांख्य-बौद्ध-मीमांसक-लोकायतिक**मतानि सङ्क्षेपतः समाप्तानि ॥छ॥

क्रमाङ्क ३७४

न्यायप्रवेश पत्र ११। **भा.** सं.। **क.** आचार्य दिङ्नाग। **ले. सं.** अनु. १३मी शताब्दी। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १३।×१॥

क्रमाङ्क ३७५

(१) **न्यायप्रवेशसूत्र** पत्र १-१७। **भा.** सं.। **क.** दिङ्नाग।

(२) **सर्वसिद्धांतप्रवेश** पत्र १७-४१। **भा.** सं।

(३) **न्यायप्रवेशटीका** पत्र ४२-१३४। **भा.** सं.। **क.** आचार्य हरिभद्र। **ले. सं.** १२०१। **ग्रं.** ५९७। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** ९॥×१॥

अन्त—

न्यायप्रवेशकं यद् व्याख्यायावाप्तमिह मया पुण्यम्। न्यायाधिगमसुखरसं लभतां भव्यो जनस्तेन ॥छ॥

कृतिः **श्वे**ताम्बरश्रीहरिभद्राचार्यकृतन्**याय**प्रवेशप्रवेशकटीका समाप्तेति ॥छ॥छ॥ग्रंथ ५९७ ॥

संवत् १२०१ वर्षे माघमासीयचरमशकले तुरीयतिथौ तिमिरासहनवासरे **भृगुकच्छ**स्थितिमता पण्डितेन **यशसा** सहितेन **धवलेन** पुस्तिकेयमलेखि ॥

क्रमाङ्क ३७६

(१) **न्यायविंदु (लघुधर्मोत्तरसूत्र)** पत्र ७। **भा.** सं.। **क.** आचार्य धर्मकीर्ति।

(२) ,, **टीका** पत्र ८१। **भा.** सं.। **क.** आचार्य धर्मोत्तरपाद। **ग्रं.** १४७७। **ले. सं.** अनु. १३ मी शताब्दी पूर्वार्द्ध। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ।

क्रमाङ्क ३७७

तत्त्वसंग्रहसूत्र पत्र १८७। **क.** शान्तरक्षित। **भा.** सं.। **ग्रं.** ३९९७। **ले. सं.** अनु. १२ मी शताब्दी उत्तरार्द्ध। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १६॥×२।.। पत्र १८६ मुं नथी।

क्रमाङ्क ३७८

तत्त्वसंग्रहपंजिकावृत्ति पत्र ३१३। **भा.** सं.। **क.** आचार्य कमलशील। **ले. सं.** अनु. १२ मी शताब्दी उत्तरार्द्ध। **संद्द.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** २५॥×२॥ पत्र ६१, ११३, ३०२, ३११ नथी।

क्रमाङ्क ३७९

न्यायकंदलीटीका पत्र २८९ । **भा.** स. । **क.** श्रीधर भट्ट । **र. सं.** शाके ९१३ । **ग्रं.** ३७१६ **ले. सं.** अनु. १४ मी शताब्दी प्रारंभ । **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १४।।।×२।।

क्रमाङ्क ३८०

न्यायकंदलीटीका पत्र २३९ । **भा.** सं । **क.** श्रीधर भट्ट । **र. सं.** शाके ९१३ । **ग्रं.** ३७१६ **ले सं.** अनु. १३ मी शताब्दी पूर्वार्द्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४।×२

क्रमाङ्क ३८१

(१) **न्यायकंदलीटिप्पनक** पत्र १-१६४। **भा.** सं. । **क.** नरचंद्रसूरि मलधारी।
अन्त —

॥ इति श्रीमलधारिशिष्यपंडितश्रीनरचंद्रकृतौ कंदलीटिप्पनके समवायः पदार्थः समाप्तः ॥छ॥

पृथ्वीधरः सकलतर्कवितर्कसीमा धीमान् जगौ यदिह कंदलीकारहस्यम् ।

व्यक्तीकृतं तदखिलं स्मृतिबीजबोधप्रारोहणाय नरचंद्रमुनीश्वरेण ॥

समाप्तमिदं कंदलीटिप्पनकम् ॥ मंगलं महाश्री ॥छ॥श्रीः॥

(२) **न्यायावतारटिप्पनक** पत्र १६५-२३० । **भा.** सं । **क.** मलधारी देवभद्रसूरि हर्षपुरीयगच्छ **ले. सं.** अनु. १४८९ । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४।×२. । [धरणाक लेखित] ।
अन्त—

अक्षामधाम्नोऽभयदेवसूरेर्भानोरिवोज्जृम्भितभव्यपद्मात् ।
अभूत्ततो हर्षपुरीयगच्छे श्रीहेमचन्द्रप्रभुरंशुराशिः ॥१॥
जीयात्तृणीकृतजगत्त्रितयो महिम्ना श्रीचन्द्रसूरिरिति शिष्यमणिस्तदीयः ।
क्षीरोदविभ्रमयशःपटलेन येन शुभ्रीकृता दश दिशो मलधारिणाऽपि ॥२॥
शैशवेऽभ्यस्यता तर्कं रतिं तत्रैव वाञ्छता । तस्य शिष्यलवेनेदं चक्रे किमपि टिप्पनम् ॥३॥
न्यायावतारविवृतौ विषमं विभज्य किञ्चिन्मया यदिह पुण्यमवापि शुद्धम् ।
सन्त्यज्य मोहमखिलं भुवि शश्वदेव भद्रैकभूमिरमुनाऽस्तु समस्तलोकः ॥४॥छ॥

इति न्यायावतारटिप्पनकं समाप्तम् ॥छ॥ मङ्गलं महाश्रीः ॥श्री॥छ॥ सवत् १४८९ वर्षे श्रावण शुदि त्रयोदश्यां तिथौ लिखितम् ॥छ॥श्री॥

क्रमाङ्क ३८२

न्यायवार्तिक पत्र २-१५५। **भा.** सं. । **क.** उद्योतकर । **ले. सं.** अनु. १४मी शताब्दी। **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १२×२।.। वचमां वचमां थईने लगभग अर्धोअर्ध पानां नथी ।

क्रमाङ्क ३८३

(१) **प्रशस्तपादभाष्य पदार्थधर्मसंग्रह अपूर्ण** पत्र २३ । **भा.** सं. । **क.** प्रशस्तपाद । **ले. सं.** अनु. १२ मी शताब्दी पूर्वार्द्ध । **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२॥×२

(२) **न्यायकन्दलीटीका अपूर्ण** पत्र ८७ । **भा.** सं. । **क.** श्रीधर भट्ट । **र. सं.** शाके ९१३ । **ले. सं.** अनु. १२ मी शताब्दी उत्तरार्ध । **संह.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १२॥×२.। पत्र ८५ मुं नथी ।

क्रमाङ्क ३८४

खंडनखंडखाद्यशिष्यहितैषिणीवृत्ति टिप्पणीयुक्त पत्र १८१ । **भा.** सं. । **ग्रं.** ७०२५ । **ले. सं.** अनु. १३ मी शताब्दी अंत । **संद्द.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १६॥×२१. । प्रति शुद्ध छे ।

क्रमाङ्क ३८५

खंडनखंडखाद्य पत्र २६१ । **भा.** सं. । **क.** श्रीहर्ष । **ले. सं.** १२९१ । **संद्द.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १४×२

अन्त—

॥ इति श्रीश्रीहर्षकृतावनिर्वचनीयसर्वस्वे खंडनखंडखाद्ये तुरीयः संकीर्णपरिच्छेदः समाप्तः ॥छ॥ संवत् १२९१ वर्षे श्रावण वदि ७ बुधे पुस्तिका लिखितेति भद्रम् ॥छ॥

क्रमाङ्क ३८६

न्यायमंजरीग्रंथिभंग पत्र १८६ । **भा.** सं. । **क.** चक्रधर । **ले. सं.** अनु. १३मी शताब्दी पूर्वार्ध । **संद्द.** श्रेष्ठ । **द.** श्रेष्ठ । **लं. प.** १३।×२॥. । पत्र ७९, ८०, १८५, १८६ मां शोभनो छे ।

पत्र २-५, १०, ३३, ३४, १०२, ११५, १२२, १३१, १३३, १३५, १३६, १३९, १७०, १७२, १७८, १८१ नथी ।

आदि—॥ नमः शिवाय ॥

नमोऽनवसितासक्तचित्क्रियाशक्तिसंपदे । विष्णवे त्रिजगद्व्यापिपरमाश्चर्यमूर्त्तये ॥
संकल्पितफलावाप्तिकल्पपादपमंजरीम् । स्वान्ततापतमस्सां...दकां नौमि चंडिकाम् ॥
मधुरासु प्रसन्नासु ग्रंथयोऽतिरसास्वपि । जयन्तोक्तिषु दृश्यन्ते क्वचिदिक्षुलतास्विव ॥
सुकुमाराशयाः केचित्संति तद्भंगविक्लवाः । अतस्तेभ्यो व्यधत्ते...श्रीशांकरात्मजः ॥
प्राप्य चक्रधरश्चक्रमिव सर्वविदः श्रुतम् । शशांकधरतोऽभेद्यग्रंथिभेदाहितोद्यमः ॥

अन्त —

सति वेदाङ्गत्वेन व्याकरणात् प्रमाणभूतादर्थनिश्चये वेदस्याप्रतिपादकत्वाभावात् प्रामाण्यम् । सति च तत्प्रामाण्ये तदंगत्वेन व्याकरणप्रामाण्यमिति यदितरेतराश्रयं तत् कुतस्त्यम् । भोगिमतश्रुतसंगिभिः भोगी शेषः तन्मतं महाभाष्यं तच्छतेन संगशीला ये भर्तृहरिप्रभृतयः आर्या इति भद्रम् ॥ भट्टश्रीशांकरात्मजचक्रधरकृते न्यायमंजरीग्रंथिभंगे षष्ठमाह्निकं समाप्तम् ॥छ॥

॥ॐ॥ जयत्येकशराघातविदारितपुरत्रयः । धनुर्द्धराणां धौरेयः पिनाकी भुवनत्रये ॥छ॥

क्रमाङ्क ३८७

(१) **शाबरभाष्य प्रथम अध्याय** पत्र ५१ । **भा.** सं. ।

आदि—द०॥ नमः सर्वज्ञाय ॥

अथातो धर्मजिज्ञासा । लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम् । नाध्याहारादिभिरेष्यकल्पनीयोऽर्थः परिभाषितव्यो वा । एवं वेदवाक्यान्येभिर्विचार्यन्ते । इतरथा वेदवाक्यानि च व्यारेष्ठयानि(?) स्वपदार्थाश्च व्याख्येयास्तद्यत्र रौरवं प्रसज्येत । तत्र लोकेऽयमथशब्दो वृत्तादनन्तरस्य प्रक्रियार्थे दृष्टः, न किञ्चिदिह वृत्तमुपलभ्यते, भवितव्यं तु तेन, यस्मिन् सत्यनन्तरं धर्मजिज्ञासा च कल्पते ।

अन्त—

कथं वनस्पतयः सर्पा वा सत्रमासीरन्निति, उच्यते, विनियुक्तं हि दृश्यते परस्परेण सम्बन्धार्थं ज्योतिष्टोम

इत्यभिधाय कर्त्तव्यः इत्युच्यते। केनेत्याकाङ्क्षिते सोमेनेति। किमर्थमिति स्वर्गायेति। कथमिति चेत्थमिति। एवमवगच्छन्तः पदार्थैरभिसम्भूत पिण्डितं वाक्यार्थं कथमुन्मत्तवाक्यसदृशमिति वक्ष्यामः। नन्वनुपपन्नमिदं दृश्यते वनस्पतयः सत्रमासतेत्येवमादिनाऽनेनानुपपन्नेनाग्निहोत्रं जुहुयात् स्वर्गकाम इत्येवमाद्याः उपपन्नाः स्युः।

अपि च वनस्पतयः सत्रमासतेत्येवमाद्यापि नाऽनुपपन्नाः, स्तुतयो ह्येताः सत्रस्य, वनस्पतयोऽपि नानाचेतनाः इदं सत्रमुपासितवन्तः किं पुनर्विद्वांसो ब्राह्मणा इति, तद्यथा, लोके सन्ध्यायां मृगा अपि न चरन्ति किं पुनः, ब्राह्मणाः इति। अपि चाविगीतः सुहृदुपदेशः कथमिवाशङ्क्यतोन्मत्तवालवाक्यसदृश इति तस्माच्चोदनालक्षणो धर्म इति ॥छ॥ प्रथमस्य प्रथमः पादः समाप्तः ॥छ॥ श्रेयोऽस्तु ॥

(२) **प्रमाणान्तर्भाव** पत्र ५१-९७। **भा.** सं.। **क.** देवभद्र तथा यशोदेव। **ले. सं.** १११४। **संह.** श्रेष्ठ। **द.** श्रेष्ठ। **लं. प.** १२॥×२।

आदि—पत्र ५१—

यस्य प्रज्ञाप्रकाशः कवलयति जगच्चक्रमेवाकलङ्कः, सत्त्वार्थं वा विधातुं यदपर उदयी नासमर्थोऽकलङ्कः।
तन्नत्वा स्वार्थसम्पत्सुहितमनुपमो मन्जुवाग् यो न दीनः, प्रत्यक्षं वाऽनुमा धे(वे)त्यत उदितमिदं येन तुल्यो नदीनः॥
प्रत्यक्षं चानुमानं च प्रमाणमिदमेव हि। प्रमाणसंप्लवायोगात् प्रमेयद्वयसङ्गतेः॥
शब्दादिकं प्रमाणं हि भ्रान्तिमात्रात्तदन्यथा। प्रमाणलक्षणायोगात् प्रमाणाभं बहिःस्थितेः॥

पत्र ६४-६५ मां—

इत्यर्थिसङ्क्रिव्यवहारसिद्धं शाब्दं निजार्थेऽनुमितिप्रथसि (प्रयासे)।
वाह्ये तु नैवास्य परं प्रमाणं यथाकथञ्चिज्जगतामिहाऽऽस्था ॥

प्रमाणान्तर्भावे शाब्दः। **प्र**माणान्तर्भावे शाब्दप्रमाणान्तर्भावः प्रथमः परिच्छेदः ॥छ॥
उपमाऽपि प्रमा कैश्चिदिष्यते न्यक्षवुद्धिभिः। सादृश्येन परिच्छेदः परोक्षेऽर्थे न तां विना ॥
सादृश्यस्य च वस्तुत्वं न शक्यमपवाधितुम्। भूयोऽवयवसामान्ययोगो जात्यन्तरस्य तत् ॥
उपमाऽपि हि सादृश्ये परोक्षे वित्तिरीक्ष्यते। नानुमालक्षणं तत्र प्रथमं सदृशग्रहात् ॥

पत्र ७१ मां—

इत्यनिन्द्यविधिना निरूपितं नोपमानमनुमानतः परम्। एवमन्यदपि तेन गीयता प्रज्ञया नहि स दृश्यतेऽधिकः ॥
उपमानान्तर्भावो द्वितीयः परिच्छेदः ॥छ॥
प्रमाणवद्बविज्ञातो यत्रार्थो नान्यथाभवन्। अदृष्टं कल्पयेदन्यं साऽर्थापत्तिरुदाहृता ॥
ननु दृष्टः श्रुतो वाऽर्थ इति **भा**ष्यकृतो वचः। तत्कथं दृष्टिमात्रेण साऽर्थापत्तिर्निरूपिता ॥
अग्रे कृत्वा स नियममसुं संयमं वत्सकं तं, पूता शान्तिः सुरभिरभितो लिप्सुना वत्सलोच्चैः।
दुग्धा स्निग्धं मधुरमधिकं ज्ञानदुग्धं...सुग्ध, येनानूनं जिनपतिमिन **ना**भिसूनुं प्रणम्य ॥१॥

पत्र ८२—

या तन्त्रमन्त्रजडधीर्न विवेकभाजि तत्त्वे प्रवर्त्तनमुपैति न मे कथञ्चित्।
अन्धस्य तस्य न जातु मतेर्विशेषस्तस्य स्खलद्गतिनिवर्त्तनमेतदस्तु ॥
प्रमाणान्तर्गतौ तृतीयोऽर्थापत्तिपरिच्छेदः ॥छ॥
प्रमाणान्तरभावोऽपि **भा**ष्यकृत्प्रतिपादितः। अभावोऽपि प्रमाभावो नास्तीत्येतद् विनिश्चये ॥
अर्थस्यासन्निकृष्टस्य तथा चाह कुमारिलः। **भा**ष्यकारोक्तमेवार्थमुपपत्त्योपदर्शयन् ॥
प्रमाणपंचकं यत्र वस्तुरूपे न जायते। वस्तुसत्तावबोधार्थं तत्र(त्रा)भावप्रमाणता ॥

पत्र ९६, ९७—

इत्यद्भुताभावनिराक्रियेयं प्रतीतिसंस्पर्शितया प्रबन्धात् ।
विपरीत्य फल्गु स्फुरितं परेषां सदर्थनीतेरयमेव सारः ॥छ॥
प्रमाणान्तर्भावः समाप्तः ॥छ॥

